Bombay Sanskrit Series

No. XXXVI

# HYMNS FROM THE ṚGVEDA

1959

PRICE RUPEES 6·50

4.12
442

INDIAN INSTITUTE OF
ADVANCED STUDY
SIMLA

The Department of Public Instruction, Bombay

# HYMNS FROM THE ṚGVEDA

EDITED

WITH SĀYAṆA'S COMMENTARY, NOTES, AND
A TRANSLATION,

BY

PETER PETERSON, M. A.,

*Late Professor of Sanskrit, Elphinstone College, Bombay,*

*Seventh Edition, being Reprint of the Fourth*

BY

H. D. VELANKAR, M.A.

1959

PRICE RUPEES 6·50

Bombay Sanskrit Series, No. XXXVI.

Printed and published by Dr. R. N. Dandekar, M.A., Ph.D., at the
Bhandarkar Institute Press, Bhandarkar Oriental
Research Institute, Poona 4.

Library IIAS, Shimla
00005300

*All Rights Reserved*

# PREFACES.

## Preface to the Fourth Edition

A certain pathetic interest belongs to the publication of this edition. It was originally undertaken by my late lamented friend Prof. S. R. Bhandarkar, who intended to incorporate in it "new matter extending to three forms of sixteen pages each." But before he could carry out his intention he died, to the great loss of Sanskrit Scholarship in the Bombay Presidency. Nothing being known about the nature of the addition he intended to make, and there being no time to settle new lines of revision and enlargement— while students preparing for the B. A. Examination of the University of Bombay were being put to much inconvenience for want of copies– Government ordered that a mere reprint of the last edition, should be brought out with all possible speed, and that I should be appointed to see through the work. On the 18th of August 1916, I was asked to prepare a press-copy and submit it to the Office of the D. P. I. "within a couple of weeks or earlier if possible" working at it "outside office-hours." The press-copy was accordingly prepared and despatched by me to the D. P. I. on the 2nd of September. Arrangements with the press, however, were not completed before the 9th of October; and the actual printing commenced a few weeks later in November. The present edition is thus a work of about three months.

It does not pretend to be a 'revised and enlarged' edition; at the same time, I hope, it will be found to be something more than a mere reprint. In preparing the press-copy for the printers, Professor Max Müller's second edition of the Ṛg-Veda ( indicated by $M_2$ ), Pāṇini's Aṣṭādhyāyi, Patañjali's Vyākaraṇa Mahābhāṣya with the text of Kātyāyana's Vārttika, Śaunaka's Bṛhaddevatā and other necessary works were carefully consulted; and a few new references were also supplied

both in the body of the text of the former edition and in the shape of a new row of footnotes. Most of the additions[1], however, were made while reading the proof :— so far as this could be done without hampering the progress of printing. The new matter thus added comprises references to standard works— to such of them as are easily available to students— on points of grammar, accent, metre, philology and mythology. More emphasis is placed here on some of these points than was done in the previous editions; the subject of Vedic mythology is brought more prominently before the student; while the introduction of Indo-Iranian philology is an entirely new feature of the present edition. Had time and space permitted, I would have dealt with the last subject in greater detail than I have actually done. Another subject, which has been hitherto entirely neglected but deserves to be studied carefully, is the *viniyoga* of the different hymns. The elaboration of the sacrificial system in the Brāhmaṇas and the Sūtras was no doubt unkown to the period of the Hymns, but it is interesting to know how some of the Hymns were fitted into the later sacrificial scheme. I have to leave this work to the future editor of this Selection.

With a view to helping the student to a systematic study of the work apart from the Notes, I have added to the old brief list a longer classified list of principal books in English bearing upon the subject. I trust it will achieve its purpose.

Lastly, I must apologize to the reader for the many typographical errors which must have inevitably crept into this work, and which I have had no time to discover. Such of them, however, as I could notice by a hurried glance run through the pages, I have shown in the list of Errata. ( Now dropped and errors corrected in the New Impression ).

*Gujarat College,*
*Ahmedabad.*
*Feb. 10, 1917.*

A. B. DHRUVA.

---

[1] These are placed at the bottom of the page below a thick straight line.

## New Impression ( Fourth Edition )

THIS is practically a reprint of the Fourth Edition, various minor corrections being made.

*S. P. College,*
*Poona, Jan., 1937.* R. D. KARMARKAR.

---

This is a second reprint of the Fourth Edition, with necessary corrections.

*Bombay,*
*October 1959.* H. D. VELANKAR.

---

## Preface to the First Edition

THE Hymns from the Ṛgveda in this volume are those appointed to be read by candidates for the degree of B. A. in the University of Bombay ; and the book is little more than an attempt to furnish students here with the material without which anything like a full study, or commencement of study, of the Ṛgveda is hardly now practicable. I hope it may be accepted as a text-book in other Universities, in India or elsewhere, where Sanskrit is studied. But my primary object has been to fulfil a pledge, given I do not like to think how long ago, when I induced the University of Bombay to lead the way in making some knowledge at least of the Ṛgveda part of the ordinary qualification for a degree in Sanskrit.

Editing the text of the Hymns is almost if not altogether, a matter of correcting printer's proofs. I hope this has been done with due care. I have followed Hillebrandt in printing the hymns in such a way as to bring their true metrical character before the eye. This may occasion some difficulty at the end of a line, in cases where the original editors of the collection, if I may so speak, have written as one syllable what is really two, of which one belongs metrically to the

one line, and the other to the next. But both in such cases and elsewhere the student should be taught, in reading or learning the hymns by heart, to restore to the letters y and v their vocalic character.

For the text of Sāyaṇa I have had the use of three manuscripts, one of which I have compared throughout with Max Müller's text, while the other two have been constantly consulted. In a text-book of this kind I should gladly have contented myself with reproducing the text of the *editio princeps*. But that was not always possible. On the other hand, my manuscripts are as unsatisfactory as most of the manuscripts of Sāyaṇa made yet available appear to me to be. I cannot set them up against the weight to be assigned to the text of Sāyaṇa as given by Max Müller from a collation of the manuscripts at his disposal. In these circumstances I have followed a middle course. The text of Sāyaṇa in this book is that of the *editio princeps*, except where I have seen reason to deviate from that All such cases are, I believe, carefully noted, and the authorities are cited. But my notes for the most part pass over in silence cases where my manuscripts differ from Max Müller's, but not as seemed to me, for the better.

The obligations my book is under to Max Müller. the St. Petersburg Dictionary, Muir's Sanskrit Texts, Geldner and Kaegi's Siebenzig Lieder, Grassmann's Dictionary and Translation, Ludwig's Translation, are, I hope, apparent everywhere on the surface. I have given throughout references to Whitney's Sanskrit Grammar, a book which must be useful to every student of the Ṛgveda, and which is indispensable to those who are trying to study it without a teacher. I hope that my friend, Professor Whitney, will not find fault with me for thinking that I could not better furnish my students with the main facts of the accent in the Ṛgveda than by the extract from his book presented here as an Appendix to my Notes.

*23 August, 1888.* PETER PETERSON.

# Preface to the Second Edition

THE second edition of this book is, with a few corrections, merely a re-print of the first edition. It ought to have been stated in the foregoing preface to the first edition that the manuscript which I compared throughout with Professor Max Müller's text was one from Satara, lent to me by my friend, Mr. Inamdar. My other two manuscripts were one from Ulwar, and one from the Bhao Daji collection in the library of the Bombay Branch of the Royal Asiatic Society. Of these three manuscripts the last only has been available for occasional reference in preparing the second edition of my book. On the other hand, I have been able to consult a fourth manuscript, from Kohlapore, which was lent to me by my friend, Mr. Apte. Where it is referred to in the notes this manuscript is called K.

In the preface to the second edition of his Ṛgveda ( Vol. 4, pp. clxxxi--clxxxiv ) Müller has made a series of animadversions on my book, which I propose to notice shortly here. The passages in which, as he has shown, I have from want of sufficient care reproduced from his book a manifestly false reading may be relegated to a note.[1] They are of no critical

---

[1] I do not possess the third and fourth volumes of the second edition of Max Müller's Ṛgveda, and I was not aware of these animadversions until pp. 1 to 200 of this second edition of my book had been printed off. Some of the mistakes which Müller notes have been corrected. Others, and some new readings I note here. . . . . At p. 87, l. 5 ( p. 90. 1, 3 ) . . . I would retain उपशंस्य. I do not know why Müller calls it an impossible form. At p. 94 ( 98 ), commentary on verse 7, M. prefers the readings of his Grantha MS. अनाक्रान्तो and उद्योजयति. Both seem to me to be wrong. [ All the corrections have been made in this third edition. And further उपसंशस्य has been substituted for उपशंस्य. It is the word in the original, Āśv. Sūtra, and उपशस्य, not उपशंस्य would be the correct grammatical form from शंस् in the sense intended. अनाक्रान्ता has been substituted for अनुक्रान्तो, looking to Sāy.'s explanation on iii, 1, 2. ]

importance, and I confess that I feel flattered at the way in which my honoured antagonist gloats over each of them. My real controversy with Müller is as to the occasional necessity he has felt himself under of deserting all his manuscripts and printing in the text of Sāyaṇa an invention of his own. I took the first of the instances he gave ( his first edition, 6, xxxv ; second edition, 4, cxxxviii ) of a case in which a change "of a bolder character" than usual was "required for a restoration of Sāyaṇa's commentary," and I endeavoured to show, in a letter which appeared in *The Academy*, June, 23, 1888, that the violent alterations made by Müller in the text of the manuscripts here were absolutely indefensible. I have not convinced him ; but, as the only reply he has made to my arguments is that my translation of ईशितत्याः is impossible, I can leave that part of the controversy with the remark that, in my opinion, it is both possible and right.[1]

---

[1] 'Professor Peterson considered these conjectural emendations too bold, and tried to defend the reading of the MSS., unsuccessfully, it seems to me. He retains प्रारंभाः and ईशितव्याः *His own friends*, the Editors of the Bombay Edition, however, have adopted my conjecture to a great extent, unless they actually found the reading in some of their MSS. They read प्राच्यारंभा आग्नेय्याद्याः कोणदिश ईशान्यन्ताः— Müller, p. cxxxix. "I'.s translation of ईशितत्याः is imppossible." — Müller, p. clxxxiv. "Here B. [ the Bombay Edition ] has प्राच्यारंभा etc., my own very bold conjectural reading, except that it substitutes ईशान्यन्ता for ईशानान्ता वा. How does Professor Peterson, who criticised my conjectural emendations in the *Academy*, account for this ?' — Müller p. clxxv.

Every controversialist will sympathise with my annoyance at not having seen this question at the time it was addressed to me. There is no difficulty at all about the answer. The Bombay Editors took this perversion of the text from Müller, and the incident is an illustration of how much easier it is to introduce an error into a *textus receptus* than to get it out again With reference to the remark I have italicised in the above, which is one of several of the same kind made by Müller, I wish to explain that I had no more to do with the Bombay Edition than he himself had. One of the editors was a friend and valued colleague. The other was unknown to me. I was never consulted on the subject of their edition, and the suggestion

The reader is asked to turn to p. 247 ( 286 ) of this edition, where it will be found that I have improved, and, as I believe, strengthened, my explanation of what Müller declares to be "simply unintelligible." I am confident that it will be generally admitted, perhaps even by the author himself, that the conjectural "restoration" of Sāyaṇa's text will have to be abandoned. I am tempted to add here that, besides the fact that it is admittedly "a very bold conjecture," there are almost as many independent reasons against Müller's reading प्राच्यारम्भा आग्नेय्याद्याः कोणदिशः ईशानान्ता वा as there are words in it. Sāyaṇa would never have written प्राच्यारम्भाः for प्राच्यादयः. I am confident that no example of such a use of the word आरम्भः can be produced. He must have written, not कोणदिशः ईशानान्ताः, but ईशानान्ताः कोणदिशः, if he had had the halting opinion attributed to him. And he certainly would not have written ईशानान्ताः instead of the only correct form ऐशान्यन्ताः.

I learned to dislike conjectural emendations from Jowett, and I remain of the opinion my honoured Master imbued me with, that in the vast majority of cases they are bound to be wrong. I will give what I take leave to consider a second typical instance of this from Müller's text of Sāyaṇa. On 2, 12, 4 Sāyaṇa is commenting upon the clause श्वघ्नीव यो जिगीवां लक्षमाददत्. His note on the simile श्वघ्नीव is यथा व्याघो जिघृक्षन्तं मृगं परिगृह्णाति तद्वत्. जिघृक्षन्तं here is the reading of the manuscripts. Müller gave it so in his first edition, and I followed him. In the second edition Müller "corrects" to जिघृक्षस्तं. Why? Because he has not seen that we have not two words here, but one. The word is in the accusative, is an epithet of मृगं, and is required to bring out the commentator's meaning,

( Müller p. clxxxi ) that I may have had access to the manuscripts they used is unfounded. Is it necessary to explain that the reason why I did not use Max Müller's new edition of Sāyaṇa for my book, which appears to be made matter of complaint against me on the page just cited, is that my book was published in 1888, and the second volume of Müller's new edition ( the first which appeared ) in 1890 ?

'Just as the hunter makes a prey of the deer, while unconscious of danger, it was browsing,' &c.[1] Does the conjectural emendation here, I ask in all seriousness, restore or destroy Sāyaṇa's text? And what answer am I to make when it is pointed out to me, as it is here, that "Professor Peterson, according to his system, ought to have printed जिघृक्षन् तं"?

It would, of course, be easy to make this reply as long as the attack is. When, for example, in his first animadversion, Müller informs me that "there is no suffix तच् nor is पर्वत formed by it," it would be easy to protest that I have nowhere said that there is a suffix तच्. I have, by mistake, printed दिना तच् instead of दिनातच्, which is an accident that might happen to anybody. It is the same with the °ब्राह्मण° which is the subject of the third animadversion. It would not be difficult to draw up a list of similar mistakes from Müller's own pages.

But I feel, that I have said enough. My object in this defence has been to show that I have reasons, which Müller has not upset, for my dislike of the diplomatic criticism which makes Sāyaṇa say what it is morally certain he never did say. And that object has been I trust in some measure attained.

PETER PETERSON.

*Bombay, 31st October, 1897.*

---

[1] [ But जिघृक्षन्तं has no object here and cannot by itself mean browse. In the Bhau Daji MS. and in Ca of Müller's the word is जिघृक्षत. Could the correct word have been जिघृक्षितं ? ]

## Preface to the Third Edition

BEYOND a few most necessary corrections, the principal change made in this edition is the use of diacritical marks ( except in the original prefaces ). Dr. Peterson seemed to have unnecessarily had a prejudice against them. But surely, if such familiar European names as those of Max Müller and Bühler are not to go without them, such names as Sāyaṇa and Śayu and other ordinary words foreign to Europe stand in need of them much more.

The original notes have, however, been supplemented by a few new ones. These have been drawn from Pischel and Geldner's Vedische Studien ( 3 vols. )[1], Vedic Hymns ( Parts i and ii ) in the Sacred Books of the East, Muir's Sanskrit Texts ( 5 vols. ), Whitney's Grammar, Lanman's Noun-inflection in the Veda, and other works. The new notes have been enclosed in square brackets, as is sometimes done, under similar circumstances, in the case of annotated editions of the English Classics. I have also followed another practice very frequently observed in these editions, and added an index of words and passages explained in the notes. This index as well as the index of deities and a list of books in English likely to be useful to the student, these also being now added for the first time, will, I hope, be found to render the book more helpful.

The English translation I have not interfered with at all. It may not in places be as close to the original as one would wish. But a student who has mastered the notes does not stand in need of such closeness. The translation is sufficiently well done for its purpose, and by such a writer of very good English as Dr. Peterson was so well-known to be. I did not, therefore, like to spoil its effect by any changes of mine.

---

[1] The first two vols. of this work appeared before the publication of 2nd edition of this Selection and the third has appeared since.

The quotations made from Whitney's Grammar in the previous editions of this selection were from the first edition. Some of the paras, quoted were, however, in the second edition of that book so altered and expanded as to exceed the legitimate limits of quotation. In such caees the first form, which was serviceable enough, has been retained and the edition specified.

Lastly, I have to thank very much the Rev. Father A. Hegglin, S. J., Professor of Sanskrit, St. Xavier's College, Bombay, for very kindly looking over my renderings and abridgments of notes from the German.

S. R. BHANDARKAR.

*Bombay, 28th January, 1905.*

# TABLE OF CONTENTS


| | |
|---|---|
| Prefaces ... ... ... ... | i-x |
| Table of Contents ... ... ... | xi |
| A Brief List of Books in English for Students of this Selection ... ... ... | xiii-xv |
| Index of Deities ... ... ... | xvi |
| Saṁhitā Text of the selection ... ... | 1—50 |
| Pada Text, Sāyaṇa's Bhāṣya and Notes ... | 51-300 |
| Appendix to Notes ... .. ... | 301-304 |
| Translation ... ... ... | 305-333 |
| Index ... ... ... | 335-342 |

## A BRIEF LIST OF BOOKS IN ENGLISH FOR STUDENTS OF THIS SELECTION

Arnold, E. V. : The Ṛgveda ( published by David Nutt ).
Barth : The Religions of India.
Griffith : The Hymns of the Ṛgveda.
Hopkins : The Religions of India.
Kaegi : The Ṛgveda.
Lanman : Noun-inflection in the Veda.
MacDonell : Sanskrit Literature.
,, : Vedic Mythology.
Monier-Williams : Sanskrit-English Dictionary.
Muir : Original Sanskrit Texts, 5 Vols.
Whitney : Sanskrit Grammar.

[ Reproduced from the Third edition. ]

## A CLASSIFIED LIST OF PRINCIPAL BOOKS IN ENGLISH FOR STUDENTS OF THIS SELECTION

( *FOURTH EDITION* )

GENERAL :

Dutt's Civilization in Ancient India, Vedic Period.
Ragozin's Vedic India ( Story of the Nations Series ).
Macdonell and Keith's Vedic Index.

THE HOME OF THE ĀRYANS :

Max Müller's Home of the Aryans.
Whitney's Oriental and Linguistic Studies-First Series.
Isaac Taylor's Origin of the Aryans.
( Comparatives Science Series )
Tilak's Arctic Home in the Vedas.

LITERATURE :

Macdonell's History of Sanskrit Literature.
Weber's History of Indian Literature : Vedic Period.
Whitney's Introduction to the Notes on the selections from the Vedic Literature in his Sanskrit Reader.
Kaegi's Ṛg-Veda.
Handbook to Ṛgveda ( Peterson's Translation of Sāyaṇa's introduction to the Ṛgveda-Bombay Sanskrit Series. )

GRAMMAR :

Macdonell's Vedic Grammar for Students.
Lanman's Noun-inflection in the Veda.
Macdonell's Vedic Grammar.
Whitney's Grammar.

ACCENT :

Macdonell's Vedic Grammar for Students, Appendix III.
Macdonell's Vedic Grammar.
Whitney's Grammar.

METRE :

Macdonell's Vedic Grammar for Students, Appendix II.
Arnold's Vedic Metre.

COMPARATIVE PHILOLOGY :

Bopp's Comparative Grammar.
Max Müller's Biographies of Words.
Max Müller's Science of Language.
Whitney's Oriental and Linguistic Studies-First Series.
Jackson's Avestan Reader.
Lanman's Sanskrit Reader, Glossary.

RELIGION AND MYTHOLOGY :

Muir's Original Sanskrit Texts.
Macdonell's Vedic Mythology.
Bloomfield's Religion of the Veda.
Hopkin's Religions of India, Chs. i-xi.

# INDEX OF DEITIES


Agni—I. 19 ( and Maruts ), 143, V. 26 ( and Viśve Devāḥ ) VII. 49 ( and Āpaḥ, &c. )

Aśvins—VII. 68.

Āpaḥ—VII. 49 ( and Varuṇa, Viśve Devaḥ &c. )

Indra—II. 12, IV. 46 ( and Vāyu ), VI. 57 ( and Pūaṣn ), VII. 28 ( and Varuṇa ), 49 ( and Āpaḥ, &c. ), 83 ( and Varuṇa ), X. 119.

Uṣas—III. 61, VII. 75.

Ka—X. 121.

Parjanya—V. 83, VII. 102.

Puruṣa—X. 90.

Pūṣan—VI. 53, 54, 55, 56, 57 ( and Indra ).

Maruts—I. 19 ( and Agni ).

Mitra—III. 59.

Yama—X. 14 ( and Varuṇa ).

Varuṇa—I. 25, VII. 28 ( and Indra ), 49 ( and Āpaḥ, &c. ), 83 ( and Indra ), 86, 88, 89, X. 14 ( and Yama ).

Vāk—X. 125.

Vāta—X. 168.

Vāyū– IV. 46 ( and Indra ).

Vāstoṣpati—VII. 54.

Viśve Devāḥ—V. 26 ( and Agni ), VII. 49 ( and Āpaḥ, &c.) VIII. 30.

Viṣṇu—I. 154.

Savitṛ—IV. 54.

Sūrya—I. 115.

Hiraṇyagarbha—X. 121.

Max Müller's Hibbert Lectures on the Origin and Growth of Religion.

Cox's Mythology of the Aryan Nations.

Moulton's Early Zoroastrianism.

Lanman's Bṛhaddevatā.

Haug's Introduction to the Aitareya Brāhmaṇa.

Eggeling's Introduction to the Śatapatha Brāhmaṇa ( S. B. E. Series ).

Barnett's Antiquities of India-Chapter IV, ii. ( Śrauta Ritual ).

प्रति॒ त्यं चारु॑मध्व॒रं गो॑पी॒थाय॒ प्र हू॑यसे ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ १

न॒हि दे॒वो न मर्त्यो॑ म॒हस्तव॒ क्रतुं॑ प॒रः ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ २

ये म॒हो रज॑सो वि॒दुर्विश्वे॑ दे॒वासो॑ अ॒द्रुहः॑ ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ३

य उ॒ग्रा अ॒र्कमा॑नृ॒चुरना॑धृष्टास॒ ओज॑सा ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ४

ये शु॒भ्रा घो॒रव॑र्पसः सुक्ष॒त्रासो॑ रि॒शाद॑सः ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ५

ये नाक॒स्याधि॑ रोच॒ने दि॒वि दे॒वास॒ आस॑ते ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ६

य ई॒ङ्खय॑न्ति॒ पर्व॑तान् ति॒रः स॑मु॒द्रम॑र्ण॒वम् ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ७

आ ये त॒न्वन्ति॑ र॒श्मिभि॑स्ति॒रः स॑मु॒द्रमोज॑सा ।
म॒रुद्भि॑रग्न॒ आ ग॑हि ॥ ८

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ।
मरुद्भिरग्न आ गहि ॥ ९

---

म० १ No. 2 सू० २५

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् ।
मिनीमसि द्यविद्यवि ॥ १

मा नो वधाय हत्नवे जिहीळानस्य रीरधः ।
मा हृणानस्य मन्यवे ॥ २

वि मृळीकाय ते मनो रथीरश्वं न संदितम् ।
गीर्भिर्वरुण सीमहि ॥ ३

परा हि मे विमन्यवः पतन्ति वस्यइष्टये ।
वयो न वसतीरुप ॥ ४

कदा क्षत्रश्रियं नरमा वरुणं करामहे ।
मृळीकायोरुचक्षसम् ॥ ५

तदित्समानमाशाते वेनन्ता न प्र युच्छतः ।
धृतव्रताय दाशुषे ॥ ६

वेदा यो वीनां पदमन्तरिक्षेण पतताम् ।
वेद नावः समुद्रियः ॥ ७

वेद मासो धृतव्रतो द्वादश प्रजावतः ।
वेदा य उपजायते ॥ ८

वेद वातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः ।
वेदा ये अध्यासते ॥ ९

नि षसाद धृतव्रतो वरुणः पस्त्या३ स्वा ।
साम्राज्याय सुक्रतुः ॥ १०

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति ।
कृतानि या च कर्त्वा ॥ ११

स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् ।
प्र ण आयूंषि तारिषत् ॥ १२

बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम् ।
परि स्पशो नि षेदिरे ॥ १३

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम् ।
न देवमभिमातयः ॥ १४

उत यो मानुषेष्वा यशश्चक्रे असाम्या ।
अस्माकमुदरेष्वा ॥ १५

परा मे यन्ति धीतयो गावो न गव्यूतीरनु ।
इच्छन्तीरुरुचक्षसम् ॥ १६

सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् ।
होतेव क्षदसे प्रियम् ॥ १७

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि ।
एता जुषत मे गिरः ॥ १८

इमं मे वरुण श्रुधी हवमद्या च मृळय ।
त्वामवस्युरा चके ॥ १९

त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि ।
स यामनि प्रति श्रुधि ॥ २०

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत ।
अवाधमानि जीवसे ॥ २१

---

म० १ **No. 3** सू० ११५

चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च ॥ १

सूर्यो देवीमुषसं रोचमानां
मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि
वितन्वते प्रति भद्राय भद्रम् ॥ २

भद्रा अश्वा॑ ह॒रित॑: सूर्य॑स्य
चि॒त्रा एत॑ग्वा अनु॒माद्या॑सः ।
न॒म॒स्यन्तो॑ दि॒व आ पृ॒ष्ठम॑स्थुः
परि॒ द्यावा॑पृथि॒वी य॑न्ति स॒द्यः ॥ ३

तत्सूर्य॑स्य दे॒व॒त्वं तन्म॑हि॒त्वं
म॒ध्या कर्तो॒र्वित॑तं॒ सं ज॑भार ।
य॒दे॒दयु॑क्त ह॒रित॑: स॒धस्था॒-
द्रात्री॒ वास॑स्तनुते सि॒मस्मै॑ ॥ ४

तन्मि॒त्रस्य॒ वरु॑णस्याभि॒चक्षे॒
सूर्यो॑ रू॒पं कृ॑णुते॒ द्योरु॒पस्थे॑ ।
अ॒न॒न्तम॒न्यद्रुश॑दस्य॒ पाज॑:
कृ॒ष्णम॒न्यद्ध॒रित॒: सं भ॑रन्ति ॥ ५

अ॒द्या दे॑वा॒ उदि॑ता॒ सूर्य॑स्य॒
निरंह॑सः पिपृ॒ता निर॑व॒द्यात् ।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒-
मदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः ॥ ६

---

म० १ No. 4 सू० १४३

प्र तव्य॑सीं॒ नव्य॑सीं धी॒तिम॒ग्नये॑
वा॒चो म॒तिं सह॑सः सू॒नवे॑ भरे ।

अपां नपाद्यो वसुभिः सह प्रियो
होता पृथिव्यां न्यसीदद्वृत्वियः ॥ १

स जायमानः परमे व्योम-
न्याविरग्निरभवन्मातरिश्वने ।
अस्य क्रत्वा समिधानस्य मज्मना
प्र द्यावा शोचिः पृथिवी अरोचयत् ॥ २

अस्य त्वेषा अजरा अस्य भानवः
सुसंदृशः सुप्रतीकस्य सुद्युतः ।
भात्वक्षसो अत्यक्तुर्न सिन्धवो-
ऽग्ने रेजन्ते असंसन्तो अजराः ॥ ३

यमेरिरे भृगवो विश्ववेदसं
नाभा पृथिव्या भुवनस्य मज्मना ।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे
य एको वस्वो वरुणो न राजति ॥ ४

न यो वराय मरुतामिव स्वनः
सेनेव सृष्टा दिव्या यथाशनिः ।
अग्निर्जम्भैस्तिगितैरत्ति भर्वति
योधो न शत्रून्त्स वना न्यृञ्जते ॥ ५

कुविन्नो अग्निरुचथस्य वीरस-
द्वसुष्कुविद्वसुभिः काममावरत् ।

चोदः कुवित्तुतुज्यात्सातये धियः
शुचिप्रतीकं तमया धिया गृणे ॥ ६

घृतप्रतीकं व ऋतस्य धूर्षद-
मग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्य-
च्छुक्रवर्णामुदु नो यंसते धियम् ॥ ७

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने
शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदृपितेभिरिष्टे-
ऽनिमिषद्भिः परि पाहि नो जाः ॥ ८

---

म० १ No. 5 सू० १५४

विष्णोर्नु कं वीर्याणि प्र वोचं
यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं
विचक्रमाणस्त्रेधोरुगायः ॥ १

प्र तद्विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणे-
ष्वधिक्षियन्ति भुवनानि विश्वा ॥ २

प्र विष्णवे शूषमेतु मन्म
  गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थ-
  मेको विममे त्रिभिरित्पदेभिः ॥ ३

यस्य त्री पूर्णा मधुना पदा-
  न्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्या-
मेको दाधार भुवनानि विश्वा ॥ ४

तदस्य प्रियमभि पाथो अश्यां
  नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था
  विष्णोः पदे परमे मध्व उत्सः ॥ ५

ता वां वास्तून्युश्मसि गमध्यै
  यत्र गावो भूरिशृङ्गा अयासः ॥
अत्राह तदुरुगायस्य वृष्णः
  परमं पदमव भाति भूरि ॥ ६

---

म० २ No. 6 सू० १२

यो जात एव प्रथमो मनस्वा-
  न्देवो देवान्क्रतुना पर्यभूषत् ।

यस्य शुष्माद्रोदसी अभ्यसेतां
नृम्णस्य मह्ना स जनास इन्द्रः ॥ १

यः पृथिवीं व्यथमानामदृंह-
द्यः पर्वतान्प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो
यो द्यामस्तभ्नात्स जनास इन्द्रः ॥ २

यो हत्वाहिमरिणात्सप्त सिन्धू-
न्यो गा उदाजदपधा वलस्य ।
यो अश्मनोरन्तरग्निं जजान
संवृक्समत्सु स जनास इन्द्रः ॥ ३

येनेमा विश्वा च्यवना कृतानि
यो दासं वर्णमधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षमाद-
दर्यः पुष्टानि स जनास इन्द्रः ॥ ४

यं स्मा पृच्छन्ति कुह सेति घोर-
मुतेमाहुर्नैषो अस्तीत्येनम् ।
सो अर्यः पुष्टीर्विज इवा मिनाति
श्रदस्मै धत्त स जनास इन्द्रः ॥ ५

यो रध्रस्य चोदिता यः कृशस्य
यो ब्रह्मणो नाधमानस्य कीरेः ।

युक्तग्राव्णो योऽविता सुशिप्रः
सुतसोमस्य स जनास इन्द्रः ॥ ६

यस्याश्वासः प्रदिशि यस्य गावो
यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान
यो अपां नेता स जनास इन्द्रः ॥ ७

यं क्रन्दसी संयती विह्वयेते
परेऽवर उभया अमित्राः ।
समानं चिद्रथमातस्थिवांसा
नाना हवेते स जनास इन्द्रः ॥ ८

यस्मान्न ऋते विजयन्ते जनासो
यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव
यो अच्युतच्युत्स जनास इन्द्रः ॥ ९

यः शश्वतो मह्येनो दधाना-
नमन्यमानाञ्छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां
यो दस्योर्हन्ता स जनास इन्द्रः ॥ १०

यः शम्बरं पर्वतेषु क्षियन्तं
चत्वारिंश्यां शरद्यन्वविन्दत् ।

ओजायमानं यो अहिं जघान
दानुं शयानं स जनास इन्द्रः ॥ ११

यः सप्तरश्मिर्वृषभस्तुविष्मा-
नवासृजत्सर्तवे सप्त सिन्धून् ।
यो रौहिणमस्फुरद्वज्रबाहु-
र्द्यामारोहन्तं स जनास इन्द्रः ॥ १२

द्यावा चिदस्मै पृथिवी नमेते
शुष्माच्चिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहु-
र्यो वज्रहस्तः स जनास इन्द्रः ॥ १३

यः सुन्वन्तमवति यः पचन्तं
यः शंसन्तं यः शशमानमूती ।
यस्य ब्रह्म वर्धनं यस्य सोमो
यस्येदं राधः स जनास इन्द्रः ॥ १४

यः सुन्वते पचते दुध्र आ चि-
द्वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः
सुवीरासो विदथमा वदेम ॥ १५

---

म० ३ No. 7 सू० ५९

मित्रो जनान्यातयति ब्रुवाणो
मित्रो दाधार पृथिवीमुत द्याम् ।
मित्रः कृष्टीरनिमिषाभि चष्टे
मित्राय हव्यं घृतवज्जुहोत ॥ १

प्र स मित्र मर्तो अस्तु प्रयस्वा-
न्यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो
नैनमंहो अश्नोत्यन्तितो न दूरात् ॥ २

अनमीवास इळया मदन्तो
मितज्ञवो वरिमन्ना पृथिव्याः ।
आदित्यस्य व्रतमुपक्षियन्तो
वयं मित्रस्य सुमतौ स्याम ॥ ३

अयं मित्रो नमस्यः सुशेवो
राजा सुक्षत्रो अजनिष्ट वेधाः ।
तस्य वयं सुमतौ यज्ञियस्या-
पि भद्रे सौमनसे स्याम ॥ ४

महाँ आदित्यो नमसोपसद्यो
यातयज्जनो गृणते सुशेवः ।
तस्मा एतत्पन्यतमाय जुष्ट-
मग्नौ मित्राय हविरा जुहोत ॥ ५

मि॒त्रस्य॑ चर्षणी॒धृतोऽवो॑ दे॒वस्य॑ सान॒सि ।
द्यु॒म्नं चि॒त्रश्र॑वस्तमम् ॥ ६

अ॒भि यो म॑हि॒ना दिवं॑ मि॒त्रो ब॒भूव॑ स॒प्रथा॑: ।
अ॒भि श्रवो॑भिः पृ॒थि॒वीम् ॥ ७

मि॒त्राय॒ पञ्च॑ येमिरे॒ जना॑ अ॒भिष्टि॑शवसे ।
स दे॒वान्विश्वा॑न्बिभर्ति ॥ ८

मि॒त्रो दे॒वेष्वा॒यु॒षु जना॑य वृ॒क्तब॑र्हिषे ।
इष॑ इ॒ष्टव्र॑ता अकः ॥ ९

---

म० ३ No. 8 सू० ६१

उषो॒ वाजे॑न वाजिनि॒ प्रचे॑ता॒:
स्तोमं॑ जुषस्व गृण॒तो म॑घोनि ।
पु॒रा॒णी दे॑वि यु॒व॒तिः पुरं॑धि॒-
रनु॑ व्र॒तं च॑रसि विश्ववारे ॥ १

उषो॑ दे॒व्यम॑र्त्या॒ वि भा॑हि
च॒न्द्रर॑था सू॒नृता॑ ई॒रय॑न्ती ।
आ त्वा॑ वहन्तु सु॒यमा॑सो॒ अश्वा॒
हिर॑ण्यवर्णां पृथु॒पाज॑सो॒ ये ॥ २

उष॑: प्रती॒ची भुव॑ना॒नि विश्वो॒-
र्ध्वा ति॑ष्ठस्य॒मृत॑स्य के॒तुः ।

समानमर्थं चरणीयमाना
  चक्रमिव नव्यस्या ववृत्स्व ॥ ३

अव स्यूमेव चिन्वती मघो-
  न्युषा याति स्वसरस्य पत्नी ।
स्व१र्जनन्ती सुभगा सुदंसा
  आन्ताद्दिवः पप्रथ आ पृथिव्याः ॥ ४

अच्छा वो देवीमुषसं विभातीं
  प्र वो भरध्वं नमसा सुवृक्तिम् ।
ऊर्ध्वं मधुधा दिवि पाजो अश्रे-
  त्प्र रोचना रुरुचे रण्वसंदृक् ॥ ५

ऋतावरी दिवो अर्कैरबोध्या
  रेवती रोदसी चित्रमस्थात् ।
आयतीमग्न उषसं विभातीं
  वाममेषि द्रविणं भिक्षमाणः ६

ऋतस्य बुध्न उषसामिषण्य-
  न्वृषा मही रोदसी आ विवेश ।
मही मित्रस्य वरुणस्य माया
  चन्द्रेव भानुं वि दधे पुरुत्रा ॥ ७

म० ४ **No. 9** सू० ४६

अग्रं॑ पिबा॒ मधू॑नां सु॒तं वा॑यो॒ दिवि॑ष्टिषु ।
त्वं हि पू॑र्व॒पा असि॑ ॥ १

श॒तेना॑ नो अ॒भिष्टि॑भिर्नि॒युत्वाँ॒ इन्द्र॑सारथिः ।
वायो॑ सु॒तस्य॑ तृम्पतम् ॥ २

आ वां॑ स॒हस्रं॒ हर॑य॒ इन्द्र॑वायू अ॒भि प्रयः॑ ।
वह॑न्तु॒ सोम॑पीतये ॥ ३

रथं॒ हिर॑ण्यवन्धुर॒मिन्द्र॑वायू स्वध्व॒रम् ।
आ हि स्थाथो॑ दिवि॒स्पृश॑म् ॥ ४

रथे॑न पृथु॒पाज॑सा दा॒श्वांस॒मुप॑ गच्छतम् ।
इन्द्र॑वायू इ॒हा ग॑तम् ॥ ५

इन्द्र॑वायू अ॒यं सु॒तस्तं दे॒वेभिः॑ स॒जोष॑सा ।
पिब॑तं दा॒शुषो॑ गृ॒हे ॥ ६

इ॒ह प्र॒याण॑मस्तु वा॒मिन्द्र॑वायू वि॒मोच॑नम् ।
इ॒ह वां॒ सोम॑पीतये ॥ ७

---

म० ४ **No. 10** सू० ५४

अभू॑द्दे॒वः स॑वि॒ता वन्द्यो॒ नु न॑
इ॒दानी॑मह्न॑ उप॒वाच्यो॒ नृभिः॑ ।

वि यो रत्ना भजति मानवेभ्यः
श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥ १

देवेभ्यो हि प्रथमं यज्ञियेभ्यो-
ऽमृतत्वं सुवसि भागमुत्तमम् ।
आदिद्दामानं सवितर्व्यूर्णुषे-
ऽनूचीना जीविता मानुषेभ्यः ॥ २

अचित्ती यच्चकृमा दैव्ये जने
दीनैर्दक्षैः प्रभूती पूरुषत्वता ।
देवेषु च सवितर्मानुषेषु च
त्वं नो अत्र सुवतादनागसः ३

न प्रमिये सवितुर्दैव्यस्य त-
द्यथा विश्वं भुवनं धारयिष्यति ।
यत्पृथिव्या वरिमन्ना स्वङ्गुरि-
र्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥ ४

इन्द्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः ।
क्षयाँ एभ्यः सुवसि पस्त्यावतः ।
यथायथा पतयन्तो वियेमिर
एवैव तस्थुः सवितः सवाय ते ॥ ५

ये ते त्रिरहन्त्सवितः सवासो
दिवेदिवे सौभगमासुवन्ति ।

इन्द्रो द्यावापृथिवी सिन्धुरद्भि-
रादित्यैर्नो अदितिः शर्म यंसत् ॥ ६

---

म० ५ ## No. 11 सू० २६

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
आ देवान्वक्षि यक्षि च ॥ १

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।
देवाँ आ वीतये वह ॥ २

वीतिहोत्रं त्वा कवे द्युमन्तं समिधीमहि ।
अग्ने बृहन्तमध्वरे ॥ ३

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये ।
होतारं त्वा वृणीमहे ॥ ४

यजमानाय सुन्वत आग्ने सुवीर्यं वह ।
देवैरा सत्सि बर्हिषि ॥ ५

समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि ।
देवानां दूत उक्थ्यः ॥ ६

न्य१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यम् ।
दधाता देवमृत्विजम् ॥ ७

प्र य॒ज्ञ ए॑त्वानु॒षग॒द्या दे॒वव्य॑चस्तमः ।
स्तृ॒णी॒त ब॒र्हिरा॒सदे॑ ॥ ८

एदं म॒रुतो॑ अ॒श्विना॑ मि॒त्रः सी॑दन्तु॒ वरु॑णः ।
दे॒वासः॒ सर्व॑या वि॒शा ॥ ९

---

## म० ५    No. 12    सू० ८३

अच्छा॑ वद त॒वसं॑ गी॒र्भिरा॒भिः
स्तु॒हि प॒र्जन्यं॒ नम॒सा वि॑वास ।
कनि॑क्रदद्वृष॒भो जी॒रदा॑नू
रेतो॑ दधा॒त्योष॑धीषु॒ गर्भ॑म् ॥ १

वि वृ॒क्षान्ह॑न्त्यु॒त ह॑न्ति र॒क्षसो॒
विश्वं॑ बिभाय॒ भुव॑नं म॒हाव॑धात् ।
उ॒ताना॑गा ईषते॒ वृष्ण्या॑वतो॒
यत्प॒र्जन्यः॑ स्त॒नय॒न्हन्ति॑ दु॒ष्कृतः॑ ॥ २

र॒थीव॒ कश॒याश्वाँ॑ अभि॒क्षिप॑-
न्नाविर्दू॒तान्कृ॑णुते व॒र्ष्याँ॒३॑ अह॑ ।
दू॒रात्सिं॒हस्य॑ स्त॒नथा॒ उदी॑रते॒
यत्प॒र्जन्यः॑ कृणु॒ते व॒र्ष्यं॒१॑ नभः॑ ॥ ३

प्र वाता॒ वान्ति॑ प॒तय॑न्ति वि॒द्युत॒
उदोष॑धी॒र्जिह॑ते॒ पिन्व॑ते॒ स्वः॑ ।

इरा॒ विश्व॑स्मै॒ भुव॑नाय जायते॒
 यत्प॒र्जन्यः॑ पृ॒थि॒वीं रेत॒साव॑ति ॥ ४

यस्य॑ व्र॒ते पृ॑थि॒वी नंन॑मीति॒
 यस्य॑ व्र॒ते श॒फव॒ज्जर्भु॑रीति ।
यस्य॑ व्र॒त ओष॑धीर्वि॒श्वरू॑पाः
 स नः॑ पर्जन्य॒ महि॒ शर्म॑ यच्छ ॥ ५

दि॒वो नो॑ वृ॒ष्टिं म॑रुतो ररीध्वं॒
 प्र पि॑न्वत॒ वृष्णो॒ अश्व॑स्य॒ धाराः॑ ।
अ॒र्वाङे॒तेन॑ स्तनयि॒त्नुने॒-
 ह्य॒पो नि॑षि॒ञ्चन्नसु॑रः पि॒ता नः॑ ॥ ६

अ॒भि क्र॑न्द स्त॒नय॒ गर्भ॒मा धा॑
 उद॒न्वता॒ परि॑ दीया॒ रथे॑न ।
दृति॒ं सु क॑र्ष॒ विषि॑तं॒ न्य॑ञ्चं
 स॒मा भ॑वन्तू॒द्वतो॑ निपा॒दाः ॥ ७

म॒हान्तं॒ कोश॒मुद॑चा॒ नि षि॑ञ्च
 स्यन्द॑न्तां कु॒ल्या विषि॑ताः पु॒रस्ता॑त् ।
घृ॒तेन॒ द्यावा॑पृथि॒वी व्यु॑न्धि
 सु॒प्र॒पा॒णं भ॑वत्व॒घ्न्याभ्यः॑ ॥ ८

यत्प॑र्जन्य॒ कनि॑क्रदत्
 स्त॒नय॒न्हंसि॑ दु॒ष्कृतः॑ ।

प्रतीदं विश्वं मोदते
यत्किं चं पृथिव्यामधिं ॥ ९

अवंर्षीर्वर्षमुदु षू गृंभाया-
कर्धन्वान्यत्येंतवा उं ।
अजींजन ओषंधीर्भोजंनाय
कमुत प्रजाभ्योंऽविदो मनीषाम् ॥ १०

---

म० ६ No. 13 सू० ५३

वयमुं त्वा पथस्पते रथं न वाजंसातये ।
धिये पूंषन्नयुज्महि ॥ १

अभि नो नर्यं वसुं वीरं प्रयंतदक्षिणम् ।
वामं गृहपंतिं नय ॥ २

अदिंत्सन्तं चिदाघृणे पूषन्दानांय चोदय ।
पणेश्चिद्वि म्रंदा मनंः ॥ ३

वि पथो वाजंसातये चिनुहि वि मृधों जहि ।
साधंन्तामुग्र नो धियंः ॥ ४

परिं तृन्धि पणीनामारंया हृदंया कवे ।
अथेंमस्मभ्यं रन्धय ॥ ५

वि पूंषन्नारंया तुद पणेरिंच्छ हृदि प्रियम् ।
अथेंमस्मभ्यं रन्धय ॥ ६

आ रिंख किकिरा कृंणु पणीनां हृदंया कवे ।
अथेम॒स्मभ्यं॑ रन्धय ॥ ७

यां पूंषन्ब्रह्मचोदंनी-
मारां बिभंर्ष्याघृणे ।
तया॑ समस्य हृदंय-
मा रिंख किकिरा कृंणु ॥ ८

या ते॒ अष्ट्रा गोओ॑पशाघृंणे पशुसाधंनी ।
तस्यांस्ते सुम्नमींमहे ॥ ९

उ॒त नो॑ गो॒षणिं धियंमश्व॒सां वाज॒सामु॒त ।
नृवत्कृंणुहि वी॒तयें ॥ १०

---

म० ६ No. 14 सू० ५४

सं पूंषन्वि॒दुषा॑ नय॒ यो अञ्जंसानु॒शासंति ।
य ए॒वेदमि॒ति ब्रवंत् ॥ १

समु॑ पू॒ष्णा गंमेमहि॒ यो गृहाँ अं॒भि॒शासंति ।
इ॒म ए॒वेति॑ च॒ ब्रवंत् ॥ २

पूष्णश्च॒क्रं न रिंष्यति॒ न कोशोऽवं पद्यते ।
नो अंस्य व्यथते प॒विः ॥ ३

INSTITUTE OF ADVANCED
Acc. No. 5300
Date 12/10/65

यो अ॑स्मै ह॒विषावि॑ध॒न्न तं पू॒षापि॑ मृष्यते ।
प्र॒थ॒मो वि॑न्दते॒ वसु॑ ॥ ४

पू॒षा गा अन्वे॑तु नः पू॒षा र॑क्ष॒त्वर्व॑तः ।
पू॒षा वाजं॑ सनोतु नः ॥ ५

पू॒ष॒न्ननु॒ प्र गा इ॑हि॒ यज॑मानस्य सुन्व॒तः ।
अ॒स्माकं॑ स्तुव॒ताम॒त ॥ ६

माकि॑र्नेश॒न्माकीं॑ रिष॒न्माकीं॒ सं शा॑रि॒ केव॑टे ।
अथारि॑ष्टाभि॒रा ग॑हि ॥ ७

शृ॒ण्वन्तं॑ पू॒षणं॑ व॒यमिर्य॑मनष्टवेदसम् ।
ईशा॑न रा॒य ई॑महे ॥ ८

पू॒ष॒न्तव॑ व्र॒ते व॒यं न रि॑ष्येम॒ कदा॑ च॒न ।
स्तो॒तार॑स्त इ॒ह स्म॑सि ॥ ९

परि॑ पू॒षा प॒रस्ता॒द्धस्तं॑ दधातु॒ दक्षि॑णम् ।
पुन॑र्नो न॒ष्टमाज॑तु ॥ १०

---

म० ६ No. 15 सू० ५५

एहि॒ वां वि॑मुचो नपा॒दाघृ॑णे॒ सं स॑चावहै ।
र॒थीर्ऋ॒तस्य॑ नो भव ॥ १

रथीतमं कपर्दिनमीशानं राधसो महः ।
रायः सखायमीमहे ॥ २

रायो धारास्याघृणे वसो राशिरजाश्व ।
धीवतोधीवतः सखा ॥ ३

पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम् ।
स्वसुर्यो जार उच्यते ॥ ४

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः ।
भ्रातेन्द्रस्य सखा मम ॥ ५

आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् ।
देवं वहन्तु बिभ्रतः ॥ ६

---

म० ६ No. 16 सू० ५६

य एनमादिदेशति करम्भादिति पूषणम् ।
न तेन देव आदिशे ॥ १

उत घा स रथीतमः सख्या सत्पतिर्युजा ।
इन्द्रो वृत्राणि जिघ्नते ॥ २

उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् ।
न्यैरयद्रथीतमः ॥ ३

यद॒द्य त्वा॑ पुरुष्टुत ब्र॒वाम॑ दस्र मन्तुमः ।
तत्सु नो॒ मन्म॑ साधय ॥ ४

इ॒मं च॑ नो ग॒वेष॑णं सा॒तये॑ सीषधो ग॒णम् ।
आ॒रात्पू॑षन्नसि श्रु॒तः ॥ ५

आ ते॑ स्व॒स्तिमी॑मह
आ॒रेअ॑घा॒मुपा॑वसुम् ।
अ॒द्या च॑ स॒र्वता॑तये
श्वश्च॑ स॒र्वता॑तये ॥ ६

---

म० ६ No. 17 सू० ५७

इन्द्रा॒ नु पू॒षणा॑ व॒यं स॒ख्याय॑ स्व॒स्तये॑ ।
हु॒वेम॒ वाज॑सातये ॥ १

सोम॑म॒न्य उपा॑सद॒त्पात॑वे च॒म्वोः॑ सु॒तम् ।
क॒र॒म्भम॒न्य इ॑च्छति ॥ २

अ॒जा अ॒न्यस्य॒ वह्न॑यो॒ हरी॑ अ॒न्यस्य॒ संभृ॑ता ।
ताभ्या॑ वृ॒त्राणि॑ जिघ्नते ॥ ३

यदिन्द्रो॒ अन॑य॒द्रितो॑ म॒हीर॒पो वृष॑न्तमः ।
तत्र॑ पू॒षाभ॑व॒त्सचा॑ ॥ ४

तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव ।
इन्द्रस्य चा रभामहे ॥ ५

उत्पूषणं युवामहेऽभीशूँरिव सारथिः ।
मह्या इन्द्रं स्वस्तये ॥ ६

---

मं० ७ No. 18 सू० २८

ब्रह्मा ण इन्द्रोप याहि विद्वा-
नर्वाञ्चस्ते हरयः सन्तु युक्ताः ।
विश्वे चिद्धि त्वा विहवन्त मर्ता
अस्माकमिच्छृणुहि विश्वमिन्व ॥ १

हवं त इन्द्र महिमा व्यान-
ड्ब्रह्म यत्पासि शवसिन्नृषीणाम् ।
आ यद्वज्रं दधिषे हस्त उग्र
घोरः सन्क्रत्वा जनिष्ठा अषाळ्हः ॥ २

तव प्रणीतीन्द्र जोहुवाना-
न्त्सं यन्नॄन्न रोदसी निनेथ ।
महे क्षत्राय शवसे हि जज्ञे-
ऽतूतुजिं चित्तूतुजिरशिश्नत् ॥ ३

एभिर्न इन्द्राहभिर्दशस्य
दुर्मित्रासो हि क्षितयः पवन्ते ।

प्रति यच्चष्टे अनृतमनेना
अव द्विता वरुणो मायी नः सात् ॥ ४

वोचेमेदिन्द्रं मघवानमेनं
महो रायो राधसो यद्दन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो
यूयं पात स्वस्तिभिः सदा नः ॥ ५

---

म० ७ No. 19 सू० ४९

समुद्रज्येष्ठाः सलिलस्य मध्या-
त्पुनाना यन्त्यनिविशमानाः ।
इन्द्रो या वज्री वृषभो रराद
ता आपो देवीरिह मामवन्तु ॥ १

या आपो दिव्या उत वा स्रवन्ति
खनित्रिमा उत वा याः स्वयंजाः ।
समुद्रार्था याः शुचयः पावका-
स्ता आपो देवीरिह मामवन्तु ॥ २

यासां राजा वरुणो याति मध्ये
सत्यानृते अवपश्यञ्जनानाम् ।
मधुश्चुतः शुचयो याः पावका-
स्ता आपो देवीरिह मामवन्तु ॥ ३

यासु राजा वरुणो यासु सोमो
विश्वे देवा यासूर्जं मदन्ति ।
वैश्वानरो यास्वग्निः प्रविष्ट-
स्ता आपो देवीरिह मामवन्तु ॥ ४

---

मं० ७ No. 20 सू० ५४

वास्तोष्पते प्रति जानीह्यस्मा-
न्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व
शं नो भव द्विपदे शं चतुष्पदे ॥ १

वास्तोष्पते प्रतरणो न एधि
गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम
पितेव पुत्रान्प्रति नो जुषस्व ॥ २

वास्तोष्पते शग्मया संसदा ते
सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो
यूयं पात स्वस्तिभिः सदा नः ॥ ३

---

म० ७ No. 21 सू० ६८

आ शुभ्रा यातमश्विना स्वश्वा
गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ १

प्र वामन्धांसि मद्यान्यस्थु-
रं गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ २

प्र वां रथो मनोजवा इयर्ति
तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ३

अयं ह यद्वां देवया उ अद्रि-
रूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४

चित्रं ह यद्वां भोजनं न्वस्ति
न्यत्रये महिष्वन्तं युयोतम् ।
यो वामोमानं दधते प्रियः सन् ॥ ५

उत त्यद्वां जुरते अश्विना भू-
च्च्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वर्प इतऊति धत्थः ॥ ६

उत त्यं भुज्युमश्विना सखायो
  मध्ये जहुर्दुरेवासः समुद्रे ।
निरीं पर्षदरावा यो युवाकुः ॥ ७

वृकाय चिज्जसमानाय शक्त-
  मुत श्रुतं शयवे हूयमाना ।
यावघ्न्यामपिन्वतमपो न
  स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८

एष स्य कारुर्जरते सूक्तै-
  रग्रे बुधान उषसां सुमन्मा ।
इषा तं वर्धदघ्न्या पयोभि-
  र्यूयं पात स्वस्तिभिः सदा नः ॥ ९

---

मं० ७ No. 22 सू० ७५

व्युषा आवो दिविजा ऋतेना-
  विष्कृण्वाना महिमानमागात् ।
अप द्रुहस्तम आवरजुष्ट-
  मङ्गिरस्तमा पथ्या अजीगः ॥ १

महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि ।

चित्रं रयिं यशसं धेह्यस्मे
देवि मर्तेषु मानुषि श्रवस्युम् ॥ २

एते त्ये भानवो दर्शताया-
श्चित्रा उषसो अमृतास आगुः ।
जनयन्तो दैव्यानि व्रता-
न्यापृणन्तो अन्तरिक्षा व्यस्थुः ३

एषा स्या युजाना पराका-
त्पञ्च क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां
दिवो दुहिता भुवनस्य पत्नी ॥ ४

वाजिनीवती सूर्यस्य योषा
चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघो-
न्युषा उच्छति वह्निभिर्गृणाना ॥ ५

प्रति द्युतानामरुषासो अश्वा-
श्चित्रा अदृश्रन्नुषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन
दधाति रत्नं विधते जनाय ॥ ६

सत्या सत्येभिर्महती महद्भि-
र्देवी देवेभिर्यजता यजत्रैः ।

रुजद्दूळ्हानि दर्दद्वुस्रियांणां
प्रति गावं उषसं वावशन्त ॥ ७

नू नो गोमंद्वीरवंद्धेहि रत्न-
मुषो अश्वांवत्पुरुभोजों अस्मे ।
मा नों बर्हिः पुंरुषतां निदे कं-
यूयं पांत स्वस्तिभिः सदां नः ॥ ८

---

म० ७ No. 23 सू० ८३

युवां नंरा पश्यंमानास आप्यं
प्राचा गव्यन्तंः पृथुपर्शवो ययुः ।
दासां च वृत्रा हतमार्याणि च
सुदासंमिन्द्रावरुणावंसावतम् ॥ १

यत्रा नरंः समयंन्ते कृतध्वंजो
यस्मिन्नाजा भवंति किं चन प्रियम् ।
यत्रा भयंन्ते भुवंना स्वर्दृश-
स्तत्रां न इन्द्रावरुणाधिं वोचतम् ॥ २

सं भूम्या अन्तां ध्वसिरा अंदृक्ष-
तेन्द्रांवरुणा दिवि घोष आरुंहत् ।
अस्थुर्जनांनामुप मामरांतयो-
ऽर्वागवंसा हवनश्रुता गंतम् ॥ ३

इन्द्रावरुणा वधनाभिरप्रति
भेदं वन्वन्ता प्र सुदासमावतम् ।
ब्रह्माण्येषां शृणुतं हवीमनि
सत्या तृत्सूनामभवत्पुरोहितिः ॥ ४

इन्द्रावरुणावभ्या तपन्ति
माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथो-
ऽध स्मा नोऽवतं पार्ये दिवि ॥ ५

युवां हवन्त उभयास आजि-
ष्विन्द्रं च वस्वो वरुणं च सातये ।
यत्र राजभिर्दशभिर्निबाधितं
प्र सुदासमावतं तृत्सुभिः सह ॥ ६

दश राजानः समिता अयज्यवः
सुदासमिन्द्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुति-
र्देवा एषामभवन्देवहूतिषु ॥ ७

दाशराज्ञे परियत्ताय विश्वतः
सुदास इन्द्रावरुणावशिक्षतम् ।
श्वित्यञ्चो यत्र नमसा कपर्दिनो
धिया धीवन्तो असपन्त तृत्सवः ॥ ८

वृत्राण्यन्यः समिथेषु जिघ्नते
व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभि-
रस्मे इन्द्रावरुणा शर्म यच्छतम् ॥ ९

अस्मे इन्द्रो वरुणो मित्रो अर्यमा
द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो
देवस्य श्लोकं सवितुर्मनामहे ॥ १०

---

मं० ७ No. 24 सू० ८६

धीरा त्वस्य महिना जनूंषि
वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं
द्विता नक्षत्रं पप्रथच्च भूम ॥ १

उत स्वया तन्वा३सं वदे त-
त्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत
कदा मृळीकं सुमना अभि ख्यम् ॥ २

पृच्छे तदेनो वरुण दिदृक्षू-
पो एमि चिकितुषो विपृच्छम् ।

स॒मा॒नमिन्मे॑ क॒वय॑श्चिदाहु-
र॒यं ह॒ तुभ्यं॒ वरु॑णो हृणीते ॥ ३

किमाग॑ आस वरुण॒ ज्येष्ठं॒
यत्स्तो॒तारं॒ जिघां॑ससि॒ सखा॑यम् ।
प्र तन्मे॑ वोचो दूळभ स्वधा॒वो-
ऽव॑ त्वाने॒ना नम॑सा तु॒र इ॑याम् ॥ ४

अव॑ द्रु॒ग्धानि॒ पित्र्या॑ सृजा॒ नो-
ऽव॒ या व॒यं च॑कृ॒मा त॒नूभिः॑ ।
अव॑ राजन्पशु॒तृपं॒ न ता॒युं
सृ॒जा व॒त्सं न दाम्नो॒ वसि॑ष्ठम् ॥ ५

न स स्वो दक्षो॑ वरुण॒ ध्रुतिः॒ सा
सुरा॑ म॒न्युर्वि॒भीद॑को॒ अचि॑त्तिः ।
अस्ति॒ ज्याया॒न्कनी॑यस उपा॒रे
स्वप्न॑श्च॒नेदनृ॑तस्य प्रयो॒ता ॥ ६

अरं॑ दा॒सो न मी॒ळ्हुषे॑ करा-
ण्य॒हं दे॒वाय॒ भूर्ण॒येऽना॑गाः ।
अचे॑तयद॒चितो॑ दे॒वो अ॒र्यो
गृत्सं॑ रा॒ये क॒वित॑रो जुनाति ॥ ७

अ॒यं सु तुभ्यं॑ वरुण स्वधावो
हृ॒दि स्तोम॒ उप॑श्रितश्चिदस्तु ।

शं नः क्षेमे शमु योगे नो अस्तु
यूयं पात स्वस्तिभिः सदा नः ॥ ८

---

म० ७ No. 25 सू० ८८

प्र शुन्ध्युवं वरुणाय प्रेष्ठां
मतिं वसिष्ठ मीळ्हुषे भरस्व ।
य ईमर्वाञ्चं करते यजत्रं
सहस्रामघं वृषणं बृहन्तम् ॥ १

अधा न्वस्य संदृशं जगन्वा-
नग्नेरनीकं वरुणस्य मंसि ।
स्व१र्यदश्मन्नधिपा उ अन्धो-
ऽभि मा वपुर्दृशये निनीयात् ॥ २

आ यद्रुहाव वरुणश्च नावं
प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव
प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३

वसिष्ठं ह वरुणो नाव्याधा-
दृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां
यान्नु द्यावस्ततनन्यादुषासः ॥ ४

क्व१॒ त्यानि॑ नौ स॒ख्या ब॑भूवुः॒
सचा॑वहे॒ यद॑वृ॒कं पु॒रा चि॑त् ।
बृ॒हन्तं॒ मानं॑ वरुण स्वधावः
स॒हस्र॑द्वारं जगमा गृ॒हं ते॑ ॥ ५

य आ॒पिर्नित्यो॑ वरुण प्रि॒यः स-
न्त्वामागां॑सि कृ॒णव॒त्सखा॑ ते ।
मा त॒ एन॑स्वन्तो यक्षिन्भुजेम
य॒न्धि ष्मा॒ विप्रः॑ स्तुव॒ते वरू॑थम् ॥ ६

ध्रु॒वासु॑ त्वा॒सु क्षि॒तिषु॑ क्षि॒यन्तो॒
व्य१॒स्मत्पाशं॒ वरु॑णो मुमोचत् ।
अवो॑ वन्वा॒ना अदि॑तेरु॒पस्था॑-
द्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७

---

म० ७ No. 26 सू० ८९

मो षु व॑रुण मृ॒न्मयं॑ गृ॒हं रा॑जन्न॒हं ग॑मम् ।
मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ १

यदेमि॑ प्रस्फु॒रन्नि॑व॒ दृति॒र्न ध्मा॒तो अ॑द्रिवः ।
मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ २

क्रत्वः॑ समह दी॒नता॑ प्रती॒पं ज॑गमा शुचे ।
मृ॒ळा सु॑क्षत्र मृ॒ळय॑ ॥ ३

अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम् ।
मृळा सुक्षत्र मृळय ॥ ४

यत्किं चेदं वरुण दैव्ये जनेऽ-
भिद्रोहं मनुष्याश्चरामसि ।
अचित्ती यत्तव धर्मा युयोपिम
मा नस्तस्मादेनसो देव रीरिषः ॥ ५

---

म० ७ No. 27 सू० १०२

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे ।
स नो यवसमिच्छतु ॥ १

यो गर्भमोषधीनां गवां कृणोत्यर्वताम् ।
पर्जन्यः पुरुषीणाम् ॥ २

तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् ।
इळां नः संयतं करत् ॥ ३

---

म० ८ No. 28 सू० ३०

नहि वो अस्त्यर्भको देवासो न कुमारकः ।
विश्वे सतोमहान्त इत् ॥ १

इति स्तुतासो असथा रिशादसो
ये स्थ त्रयश्च त्रिंशच्च ।
मनोर्देवा यज्ञियासः ॥ २

ते नस्त्राध्वं तेऽवत
त उ नो अधि वोचत ।
मा नः पथः पित्र्यान्मानवादधि
दूरं नैष्ट परावतः ॥ ३

ये देवास इह स्थन
विश्वे वैश्वानरा उत ।
अस्मभ्यं शर्म सप्रथो
गवेऽश्वाय यच्छत ॥ ४

---

म० १० No. 29 सू० १४

परेयिवांसं प्रवतो महीरनु
बहुभ्यः पन्थामनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां
यमं राजानं हविषा दुवस्य ॥ १

यमो नो गातुं प्रथमो विवेद
नैषा गव्यूतिरपभर्तवा उ ।
यत्रा नः पूर्वे पितरः परेयु-
रेना जज्ञानाः पथ्या३ अनु स्वाः ॥ २

मातली कव्यैर्यमो अङ्गिरोभि-
र्बृहस्पतिर्ऋक्वभिर्वावृधानः ।

यांश्च॑ दे॒वा वा॑वृ॒धुर्ये॑ च॑ दे॒वा-
न्त्स्वाहा॒न्ये स्व॒धया॒न्ये म॑दन्ति ॥ ३

इ॒मं॑ य॑म प्रस्त॒रमा हि सी-
दाङ्गि॑रोभिः पि॒तृभिः॑ सं॑विदा॒नः ।
आ त्वा॒ मन्त्राः॑ कविश॒स्ता व॑ह-
न्त्वे॒ना रा॑जन्ह॒विषा॑ मादयस्व ॥ ४

अङ्गि॑रोभि॒रा ग॑हि य॒ज्ञिये॑भि॒-
र्यम॑ वैरू॒पैरि॒ह मा॑दयस्व ।
विव॑स्वन्तं हुवे॒ यः पि॒ता ते॒-
ऽस्मिन्य॒ज्ञे ब॒र्हिष्या नि॒षद्य॑ ॥ ५

अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा
अथ॑र्वाणो॒ भृग॑वः सो॒म्यासः॑ ।
तेषां॑ व॒यं सु॑म॒तौ य॒ज्ञिया॑ना-
मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥ ६

प्रेहि॒ प्रेहि॑ प॒थिभि॑ पू॒र्व्येभि॒-
र्यत्रा॑ नः॒ पूर्वे॑ पि॒तरः॑ परे॒युः ।
उ॒भा राजा॑ना स्व॒धया॒ मद॑न्ता
य॒मं प॑श्यासि॒ वरु॑णं च दे॒वम् ॥ ७

सं ग॑च्छस्व पि॒तृभिः॒ सं य॒मे-
नेष्टापू॒र्तेन॑ प॒रमे॒ व्यो॑मन् ।

हित्वायावद्यं पुनरस्तमेहि
सं गच्छस्व तन्वा सुवर्चाः ॥ ८

अपेत वीत वि च सर्पतातो-
ऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं
यमो ददात्यवसानमस्मै ॥ ९

अति द्रव सारमेयौ श्वानौ
चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्राँ उपेहि
यमेन ये सधमादं मदन्ति ॥ १०

यौ ते श्वानौ यम रक्षितारौ
चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राज-
न्त्स्वस्ति चास्मा अनमीवं च धेहि ॥ ११

उरूणसावसुतृपा उदुम्बलौ
यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय
पुनर्दातामसुमद्येह भद्रम् ॥ १२

यमाय सोमं सुनुत
यमाय जुहुता हविः ।

यमं ह यज्ञो गच्छ-
त्यग्निदूतो अरंकृतः ॥ १३

यमाय घृतवद्धवि-
र्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यम-
द्दीर्घमायुः प्र जीवसे ॥ १४

यमाय मधुमत्तमं
राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः
पूर्वेभ्यः पथिकृद्भ्यः ॥ १५

त्रिकद्रुकेभिः पतति
षळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छन्दांसि
सर्वा ता यम आहिता ॥ १६

---

मं० १० No. 30 सू० ९०

सहस्रशीर्षा पुरुषः
सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृ-
त्वात्यतिष्ठद्दशाङ्गुलम् ॥ १

पुरु॑ष ए॒वेदं सर्वं॒
यद्भू॒तं यच्च॒ भव्य॑म् ।
उ॒ताम॑ृत॒त्वस्येशा॑नो॒
यदन्ने॑नाति॒रोह॑ति ॥ २

ए॒तावा॑नस्य म॒हिमा-
तो॒ ज्याया॑ंश्च॒ पूरु॑षः ।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑
त्रि॒पाद॑स्या॒मृतं॑ दि॒वि ॥ ३

त्रि॒पादू॒र्ध्व उदै॒त्पुरु॑षः॒
पादो॑ऽस्ये॒हाभ॑व॒त्पुन॑ः ।
तत॒ो विष्व॒ङ्व्य॑क्राम-
त्साशनानश॒ने अ॒भि ॥ ४

तस्मा॑द्वि॒राळ॑जायत
वि॒राजो॒ अधि॒ पूरु॑षः ।
स जा॒तो अत्य॑रिच्यत
प॒श्चाद्भूमि॒मथो॑ पु॒रः ॥ ५

यत्पुरु॑षेण ह॒विषा॑
दे॒वा य॒ज्ञमत॑न्वत ।
व॒सन्तो॑ अस्यासी॒दाज्यं॑
ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः ॥ ६

तं यज्ञं बर्हिषि प्रौक्ष-<br>
  न्पुरुषं जातमग्रतः ।<br>
तेन देवा अयजन्त<br>
  साध्या ऋषयश्च ये ॥ ७

तस्माद्यज्ञात्सर्वहुतः<br>
  संभृतं पृषदाज्यम् ।<br>
पशून्ताँश्चक्रे वायव्या-<br>
  नारण्यान्ग्राम्याश्च ये ॥ ८

तस्माद्यज्ञात्सर्वहुत<br>
  ऋचः सामानि जज्ञिरे ।<br>
छन्दांसि जज्ञिरे तस्मा-<br>
  द्यजुस्तस्मादजायत ॥ ९

तस्मादश्वा अजायन्त<br>
  ये के चोभयादतः ।<br>
गावो ह जज्ञिरे तस्मा-<br>
  त्तस्माज्जाता अजावयः ॥ १०

यत्पुरुषं व्यदधुः<br>
  कतिधा व्यकल्पयन् ।<br>
मुखं किमस्य कौ बाहू<br>
  का ऊरू पादा उच्येते ॥ ११

ब्राह्मणोऽस्य मुखमासी-
 द्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः
 पद्भ्यां शूद्रो अजायत ॥ १२

चन्द्रमा मनसो जात-
 श्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च
 प्राणाद्वायुरजायत ॥ १३

नाभ्या आसीदन्तरिक्षं
 शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रा-
 त्तथा लोकाँ अकल्पयन् ॥ १४

सप्तास्यासन्परिधय-
 स्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना
 अबध्नन्पुरुषं पशुम् ॥ १५

यज्ञेन यज्ञमयजन्त देवा-
 स्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
 यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६

इति वा इति मे मनो गामश्वं सनुयामिति ।
कुवित्सोमस्यापामिति ॥ १

प्र वाता इव दोधत उन्मा पीता अयंसत ।
कुवित्सोमस्यापामिति ॥ २

उन्मा पीता अयंसत रथमश्वा इवाशवः ।
कुवित्सोमस्यापामिति ॥ ३

उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम् ।
कुवित्सोमस्यापामिति ॥ ४

अहं तष्टेव वन्धुरं पर्यचामि हृदा मतिम् ।
कुवित्सोमस्यापामिति ॥ ५

नहि मे अक्षिपच्चनाच्छान्त्सुः पञ्च कृष्टयः ।
कुवित्सोमस्यापामिति ॥ ६

नहि मे रोदसी उभे अन्यं पक्षं चन प्रति ।
कुवित्सोमस्यापामिति ॥ ७

अभि द्यां महिना भुवमभीमां पृथिवीं महीम् ।
कुवित्सोमस्यापामिति ॥ ८

हन्ताहं पृथिवीमिमां नि दधानीह वेह वा ।
कुवित्सोमस्यापामिति ॥ ९

ओषमित्पृथिवीमहं जङ्घनानीह वेह वा ।
कुवित्सोमस्यापामिति ॥ १०

दिवि मे अन्यः पक्षो३ धो अन्यमचीकृषम् ।
कुवित्सोमस्यापामिति ॥ ११

अहमस्मि महामहोऽभिनभ्यमुदीषितः ।
कुवित्सोमस्यापामिति ॥ १२

गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः ।
कुवित्सोमस्यापामिति ॥ १३

---

म० १०  No. 32  सू० १२१

हिरण्यगर्भः समवर्तताग्रे
भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥ १

य आत्मदा बलदा यस्य विश्व
उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम ॥ २

यः प्राणतो निमिषतो महि-
त्वैक इद्राजा जगतो बभूव ।

य ईशे अस्य द्विपदश्चतुष्पदः
कस्मै देवाय हविषा विधेम ॥ ३

यस्येमे हिमवन्तो महित्वा
यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू
कस्मै देवाय हविषा विधेम ॥ ४

येन द्यौरुग्रा पृथिवी च दृळ्हा
येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः
कस्मै देवाय हविषा विधेम ॥ ५

यं क्रन्दसी अवसा तस्तभाने
अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति
कस्मै देवाय हविषा विधेम ॥ ६

आपो ह यद्बृहतीर्विश्वमाय-
न्गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः
कस्मै देवाय हविषा विधेम ॥ ७

यश्चिदापो महिना पर्यपश्य-
द्दक्षं दधाना जनयन्तीर्यज्ञम् ।

यो देवेष्वधि देव एक आसी-
त्कस्मै देवाय हविषा विधेम ॥ ८

मा नो हिंसीज्जनिता यः पृथिव्या
यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान
कस्मै देवाय हविषा विधेम ॥ ९

प्रजापते न त्वदेतान्यन्यो
विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणाम् ॥ १०

---

म० १० No. 33 सू० १२५

अहं रुद्रेभिर्वसुभिश्चरा-
म्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभ-
र्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ १

अहं सोममाहनसं बिभ-
र्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते
सुप्राव्ये यजमानाय सुन्वते ॥ २

अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम् ॥ ३

मया सो अन्नमत्ति यो विपश्यति
यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति
श्रुधि श्रुत श्रद्धिवं ते वदामि ॥ ४

अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तंतमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥ ५

अहं रुद्राय धनुरा तनोमि
ब्रह्मद्विषे शरवे हन्तवा उं ।
अहं जनाय समदं कृणो-
म्यहं द्यावापृथिवी आ विवेश ॥ ६

अहं सुवे पितरमस्य मूर्ध-
न्मम योनिरप्स्व१न्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु वि-
श्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥ ७

अहमेव वात इव प्र वा-
म्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथि-
व्यैतावती महिना सं बभूव ॥ ८

---

म० १० **No. 34** सू० १६८

वातस्य नु महिमानं रथस्य
रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग्यात्यरुणानि कृण्व-
न्नुतो एति पृथिव्या रेणुमस्यन् ॥ १

सं प्रेरते अनु वातस्य विष्ठा
ऐनं गच्छन्ति समनं न योषाः ।
ताभिः सयुक्सरथं देव ईय-
तेऽस्य विश्वस्य भुवनस्य राजा ॥ २

अन्तरिक्षे पथिभिरीयमानो
न नि विशते कतमच्चनाहः ।
अपां सखा प्रथमजा ऋतावा
क्व स्विज्जातः कुत आ बभूव ॥ ३

आत्मा देवानां भुवनस्य गर्भो
यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं
तस्मै वाताय हविषा विधेम ॥ ४

---

# No. 1

*Maṇḍala* 1 *Sūkta* 19

*Sāyaṇa* :

प्रति त्यमिति नवर्चं द्वितीयं सूक्तम् । ऋषिच्छन्दसी पूर्ववत् । देवता त्वनुक्रम्यते प्रति त्यमाग्निमारुतमिति । कारीरीष्टौ प्रति त्यमित्येषा धाय्या । तथा च सूत्रितम् । वर्षकामेष्टिः कारीरी तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये इति ( Āśvalāyana Śrauta Sūtra ii, 13, 1 and 2 ) । तामेतां सूक्तगतां प्रथमामृचमाह ॥

*Note* :

The hymn is the second in the fifth anuvāka of the first maṇḍala. ( For the two-fold division of the Ṛgveda, see Weber's History of Indian Literature, p. 31. ) The ṛṣi and metre of the hymn are 'the same as before,' that is, the same as those of hymns Nos. 13 to 18 of this maṇḍala. The ṛṣi is Medhātithi Kāṇva : and the metre is Gāyatrī. There remains the question as to the god or gods in whose honour the hymn is sung. As to that Sāyaṇa quotes the Anukramaṇikā of Kātyāyana, where the ṛṣi, metre and god of every hymn of the Ṛgveda are given in order, the hymns being cited, as here, by their first words.

Sāyaṇa's last general note on the hymn has reference to the ritual. This Ṛk, with one other ईळे अग्निं स्ववसं नमोभिः ( Ṛgveda, v., 60, 1 ) is used at the Kārīrī sacrifice, a prayer for rain.

[ The hymn is translated with notes in " Vedic Hymns," Part i. ( Sacred Books of the East ). ]

Verse 1

*Padapāṭha* :

प्रतिं त्यम् चारुंम् अध्वरम् गोऽपीथायं प्र हूयसे ।
मरुत्ऽभिंः अग्ने आ गहि ॥ १

*Sāyaṇa* :

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः । हे अग्ने यो यज्ञः चारुः अङ्गवैकल्यरहितः त्यं तथाविधं चारुमध्वरं प्रतिलभ्य गोपीथाय सोमपानाय प्र हूयसे प्रकर्षेण त्वं हूयसे । तस्मादस्मिन्नध्वरे त्वं मरुद्भिः देवविशेषैः सह आ गहि आगच्छ । सेयमृग्यास्केनैवं व्याख्याता तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छेति ( Nirukta x, 36 ) । प्रति । निपात आद्युदात्तः[1] । त्यम् । त्यदादीनामः ( Pāṇini vii, 2, 102 ) । प्रातिपदिकस्वरः । चारुम् । दृसनिजनिचरीत्यादिना ञुण् ( Uṇādisūtra i, 3 ) अत उपधाया इति वृद्धिः । ञित्त्वादाद्युदात्तः[2] । गोपीथाय । निशीथगोपीथावगथा इति ( Uṇādisūtra ii, 9 )

---

[1] Phiṭ-Sūtra pāda iv. [2] Pāṇ. vi, 1, 197.

थक्प्रत्ययान्तो निपातितः । निपातस्वरः[1] ।

*Notes* :

1. प्रति. A preposition governing अध्वरं. Sāyaṇa's construction is, at the least, harsh and unnecessary. The गोपीथ and the अध्वर of the verse are one and the same thing. Yāska, whom Sāyaṇa quotes, construes as we do.

2. त्यं. See Whitney's Sanskrit Grammar, para. 499 a.[2]

3. गोपीथाय. Max Müller translates, 'for a draught of milk,' with the following note :—

'गोपीथ is explained by Yāska and Sāyaṇa as drinking of Soma. I have kept to the literal signification of the word, a draught of milk. In the last verse of our hymn the libation offered to Agni and the Maruts is said to consist of Soma ; but Soma was commonly mixed with milk. The other meaning assigned to गोपीथ, protection, would give the sense : 'Thou art called for the sake of protection.'[3] But पीथ has clearly the sense of drinking in सोमपीथ, ṚV. i, 51, 7 ; and may therefore be taken in the same sense in गोपीथ.' Vedic Hymns, Part i, p. 54.

Ujjvaladatta, in his commentary on the Uṇādisūtra, which is quoted by Sāyaṇa for the accent of the word, explains गोपीथ by तीर्थ. Max Müller's reference is to Roth, who ( edition of Nirukta, Illustrations, p. 144, and article in the St. Petersburg Dictionary ) distinguishes between two words गोपीथ, one meaning protection, and the other, draught of milk. For the first word Roth quotes ṚV, v., 65, 6 ; यो वां गोपीथे न भयस्य वेद, x, 35, 14 ; x, 77, 7, &c. Here he translates ( Dictionary ) 'draught of milk,' and compares सोमपीथ.

4. प्र. Treated as a separate word in the Pada text. In the Ṛgveda the prefix need not stand immediately before the verb, as in later Sanskrit. It may be separated from the verb by another word or words. See Whitney's Sanskrit Grammar, para. 1081 and following paras.

5. हूयसे. The verb is, as a rule, not accented unless it stands at the beginning either of a verse-division ( pāda ) or of a grammatical clause. See Whitney, para. 592 and following paras.[4] ( The svarita accent on the first syllable of हूयसे in the Saṁhitā text is not an accent proper of the word, but a mere reflex of the udātta accent on the preceding[5] syllable in

[1] Phiṭ. Sū. iv, 80. [2] Macdonell's V. G. S. para 110, 2 ( p. 107. ) [3] Used in this sense in the Bhāgavata Purāṇa. [4] M's V. G. S. App. III. paras 19 and 8 B. b. [5] Pāṇ. viii, 4, 66.

the sentence. Compare the word as it stands in the Pada text, where the preceding syllable is not allowed to affect it. )

6. मरुद्भिः. The old and original meaning of the third case, which must have become obscure already in Yāska's time, as he thinks it necessary to add the preposition सह. Notice the way in which this word is written in the Pada text. The component parts of compound words, &c., are, in reciting that text, separated by a pause of the length of a short vowel. The pause is graphically represented by the sign commonly called the avagraha. Compare Max Müller's remarks in Vedic Hymns, Part, i. preface p. lviii.

7. अग्ने. The vocative is not accented unless it stands at the beginning either of a sentence or of a pāda. Whitney, para. 314[1]

[ 8. आ गहि. The root is गम् shortened into ग. ]

Verse 2

*Padapāṭha* :

नहि देवः न मर्त्यः महः तव क्रतुम् परः । मरुत्ऽभिः अग्ने आ गहि ॥ २

*Sāyaṇa* :

हे अग्ने महो महतस्तव संबन्धिनं क्रतुं कर्मविशेषमुल्लङ्घ्य परो नहि उत्कृष्टो देवो न भवति खलु । तथा मर्त्यो मनुष्यश्च परो न भवति । ये मनुष्यास्त्वदीय क्रतुमनुतिष्ठन्ति ये च देवास्त्वदीये क्रताविज्यन्ते त एवोत्कृष्टा इत्यर्थः । मरुद्भिरित्यादि पूर्ववत् । नहि । एवमादीनामन्त इत्यन्तोदात्तः । देवः । पचाद्यजन्तश्चित्त्वादन्तोदात्तः । महः । महतस्तलोपश्छान्दसः । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वम् । तव । युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् । क्रतुम् । कृञः क्रतुः ( Uṇādisūtra, i, 78 ) । प्रत्ययाद्युदात्तत्वम् । गहि । गम्लृ सृप्लृ गतौ । लोटः सेर्हिः । बहुलं छन्दसीति शपो लुक् । अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः । तस्यासिद्धवदत्राभादित्यसिद्धत्वादतो हेरिति लुङ् न भवति । निघातः ॥

*Notes* :

1. मर्त्यो. The metre shows that we must read a word of three syllables, mar-ti-o.[2] Compare the Latin mor-tu-us. [ Av. maretan ( √ mar ). mortal, man. ]

2. मह : Whitney, para. 400[3] [ Av. maz-great. ]

3. क्रतु. This word is the Greek kratos, like that, means strength, as well of the body as of the mind [ see Sāyaṇa on सक्रतुः, No. 2, v. 12 ], or of both, the two not being distinguished. The English word strong is used in the same way. Kratu

---

[1] M's. V. G. S. App. III. paras 11, 18. [2] Piṅgalācārya's Chh., iii. 2. and Halāyuddha's Com. [3] M's V. G. S. Para. 81.

never has in the Ṛgveda the sense of sacrifice, which was afterwards attributed to it. Hence शतक्रतु, for example, a common epithet of Indra, both in the Ṛgveda and the later literature, meant originally 'He whose strength is as the strength of a hundred.' [ For the original mg. of क्रतु there is the defn. in the Sat. Br., 4, 1, 4, 1. : स यदेव मनसाकामयत इदं मे स्यादिदं कुर्वीयेति स एव क्रतुः ( Geldner, Vedische Studien, i, 267 ). Av. Khratu ( √ kar )-wisdom ].

4. परः A preposition governing क्रतुम्. The pronoun परः has the accent on the first syllable. Sāyaṇa's series of errors here springs out of the wrong meaning he attaches to क्रतु. Taking that as sacrifice, he next has to supply so important a word to its context as उल्लङ्घ्य must be, or in other words, to ask us to believe that क्रतुं can stand for क्रतुमुल्लङ्घ्य which is impossible. This moreover, leaves परः without an accusative, a difficulty which is only got over by confounding परः, the preposition, with परः, the pronoun. [ See Sāy., on परो दिवा पर एना पृथिव्याः No. 33, v. 8. ]

Verse 3

*Padapāṭha* :

ये महः रजसः विदुः विश्वे देवासः अद्रुहः । मरुत्ऽभिः अग्ने आ गहि ॥ ३

*Sāyaṇa* :

हे अग्ने ये मरुतो महो रजसो महत उदकस्य वर्षणप्रकारं विदुः तैर्मरुद्भिरित्यन्वयः । कीदृशा मरुतः । विश्वे सर्वे सप्तविधगणोपेताः । सप्तगणा वै मरुत इति श्रुतेः ( T. S. ii, 2, 11. 1 ) । देवासः द्योतमानाः । अद्रुहः द्रोहरहिताः । वर्षणेन सर्वभूतोपकारित्वात् । तथा चोपरिष्टादाम्नायते । उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिण इति ( RV. v. 55, 5 ) । शाखान्तरेऽपि मन्त्रान्तरस्य ब्राह्मणमेवमाम्नायते । मरुतां पृषतयः स्थेत्याह मरुतो वै वृष्ट्या ईशत इति । रजःशब्दो यास्केन बहुधा व्याख्यातः । रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते इति ( Nirukta iv 19 ) । रजसः नब्विषयस्यानिसन्तस्येत्याद्युदात्तः । विदुः । विद ज्ञाने । विदो लटो वेति ( Pāṇ. iii, 4. 83 ) झेरुसादेशः । प्रत्ययस्वरः । यद्वृत्तयोगान्निघाताभावः । विश्वे । विशेः क्वन्नन्तस्य नित्त्वादाद्युदात्तत्वम् । देवासः । आज्जसेरसुक् । देवशब्दः पचाद्यजन्तः । चित्त्वादन्तोदात्तः । अद्रुहः सपदादित्वाद्भावे क्विपि बहुव्रीहौ नञ्सुभ्यामित्यन्तोदात्तत्वम् । कर्तरि वा क्विप् । तत्पुरुषे हि अव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात् । न च कृदुत्तरपदप्रकृतिस्वरत्वं यतो नञ् न गतिर्न च कारकं इति ( Pāṇ. vi. 2, 139 ) ।

*Notes* :

1. ये महो रजसो विदुः. 'They who know of the great sky, they who live in the great sky.' With regard, to the word रजः it is clear that Sāyaṇa here, as elsewhere, selects out of the variety of meanings presented by Yāska, the one which seems to him to suit the context best. His present explanation is unsatisfactory, if for no other reason, on accout of the necessity of supplying some such word as वर्षणप्रकारं. The meaning preferred is that which Sāyaṇa has already himself appropriately selected in his commentary for रजः occurring in the same context : Ṛgveda i. 6, 10. इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥. Sāyaṇa's note there is : इन्द्रं देवं प्रति सातिं धनदानमधीमहे आधिक्येन याचामहे । कस्माल्लोकादिति तदुच्यते । इतः अस्मादभिदृश्यमानात्पार्थिवात्पृथिवीलोकाद्वा दिवो वा द्युलोकाद्वा महो महतः प्रौढाद्रजसो वा पक्ष्यादीनां रञ्जकादन्तरिक्षल्लोकाद्वा । अयमिन्द्रो यतः कुतश्चिदानीयास्मभ्यं प्रयच्छत्वित्यर्थः ।

'The sky or welkin ( rajas ) is the proper abode of the Maruts, and 'they who know of' means simply 'they who dwell' in the great sky. The Vedic poets distinguish commonly between the three worlds, the earth, pṛthivī ( f ) or pārthiva ( n ) ; the sky, rajas ; and the heaven, dyu.'— From Max Muller's note on the passage, Vedic Hymns, part i., p. 55.

2. देवासः The older form of the termination.[1] [ Whitney, para. 329 a. ] Both forms are freely used together. Compare in the next verse उग्राः and अनाधृष्टासः. 'The appellation विश्वे देवाः, all gods together, or, more properly, host-gods, is often applied to the Maruts ; cf. i, 23, 8 ; 10. Benfey connects this line with the preceding verse, considering विश्वे देवाः, it seems, inappropriate as an epithet of the Maruts. '- Max Müller. Benfey's translation is in his Journal 'Orient and Occident,' Band I, p. 27. He supplies from the previous verse 'are not above thy might.' But the construction here must be the same as in the verses of a similar kind which follow.

4. अद्रुहः. 'Beneficent, kindly, who do *us* no harm.' Or, perhaps, the same as अनाधृष्टासः in the next verse, 'hurt of none.'

Verse 4

*Padapāṭha* :

ये उग्राः अर्कम् आनृचुः अनाधृष्टासः ओजसा । मरुत्ऽभिः अग्ने आ गहि ॥ ४

---

[1] M's H. S. L. p. 44 ; M's V. G. S. p. 78, note 7 ; and Lanman's Noun-inflection in the Veda, p. 344.

*Sāyaṇa* :

ये मरुत उग्रास्तीव्राः सन्तः अर्कं उदकं आनृचुः अर्चितवन्तः वर्षणेन संपादितवन्त इत्यर्थः तैर्मरुद्भिरित्यन्वयः। कीदृशा मरुतः। ओजसा बलेन अनाधृष्टासः अतिरस्कृताः सर्वेभ्योपि प्रबला इत्यर्थः। अर्कशब्दस्योदकवाचित्वं वाजसनेयिन आमनन्ति आपो वा अर्क इति ( S. Br. x, 6, 5, 2 )। तन्निर्वचनं च त एवामनन्ति सोर्चन्नचरत्तस्यार्चत आपोजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वमिति। ( S. Br. x, 6, 5, 1 )। स जगत्सृष्ट्वा हिरण्यगर्भ उदकं स्रष्टुमुद्युक्तोर्चन् सत्यसंकल्पमहिमप्रख्यापनेन स्वात्मानं पूजयन्नचरत। तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नम्। तदानीमर्चतो मत्तः कमभूदित्यवोचत्। तेनोदकस्यार्कनाम निष्पन्नमित्यर्थः। आनृचुः। अर्चतेरपस्पृधेथामित्यादिना निपातः ( Pāṇ. vi, 1, 36 )। प्रत्ययस्वरः। यद्वृत्तयोगान्न निघातः। अनाधृष्टासः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। ओजसा। उब्जेर्बले बलोपश्चेत्यसुन् ( Uṇ. Sū. iv. 191 ) नित्त्वादाद्युदात्तः॥

*Notes* :

1. अर्कमानृचुः. 'Sing their song.' The construction is that of the cognate accusative. Both words are of quite common occurrence in the Ṛgvéda in the meaning here assigned to them. Compare for example, गायन्ति त्वा गायत्रिणोर्चन्त्यर्कमर्किणः RV. i, 10, 1. The song of the Maruts is the whistling of the storm. Max Müller has the following note :—

'Sāyaṇa explains arka by water. Hence Wilson; 'Who are fierce and send down rain.' But arka has only received this meaning of water in the artificial system of interpretation first started by the authors of the Brāhmaṇas, who had lost all knowledge of the natural sense of the ancient hymns. The passages in which arka is explained as water in the Brāhmaṇas are quoted by Sāyaṇa, but they require no refutation. On the singing of the Maruts, see note to i, 38, 15.[2] .... The perfect in the Veda, like the perfect in Homer, has frequently

---

[1] Ulwar° Mss. omit उदकं. [2] ... ... passages like i, 19, 4; 52, 15, show that the conception of the Maruts as singers was most familiar to the Vedic Ṛṣis ( i. 64, 10, Kuhn, Zeitschrift, vol. i, p. 521, note ); and arka is the very name applied to their songs ( i, 19, 4 ). In the Edda, too, 'storm and thunder are represented as a lay, as the wondrous music of the wild hunt. The dwarfs and Elbs sing the so-called Alb-leich which carries off everything, trees and mountains." See Justi in Orient und Occident, vol. ii. p. 62. ... There is no doubt, therefore, that arkin here means musician, and that the arka of the Maruts is the music of the winds.

to be rendered in English by the present.' [ For the use of the Perf. in the Veda see Whitney, para, 823. ]

[ मरुतः स्वर्काः vii, 35, 9 :- स्वर्काः = शोभनस्तुतयः ( Sāyaṇa ). तुभ्येदते मरुतः ··· अर्चन्त्यर्कम् v, 30, 6. एते स्तोतारः हे इन्द्र तुभ्यमेवार्चनीयं स्तोत्रमर्चन्ति स्तुवन्ति । कुर्वन्तीत्यर्थः ( Sāy. ). Sāy. similarly on v, 31, 5 and on i, 62, 1. अर्चामार्कं नरे विश्रुताय. Sāyaṇa : अर्कं मन्त्ररूपं[1] स्तोत्रम् अर्चाम पूजयाम । उच्चारयामेत्यर्थः । ]

Verse 5

*Padapāṭha* :

## ये शुभ्राः घोरऽवर्पसः सुऽक्षत्रासः रिशादसः । मरुत्ऽभिः अग्ने आ गहि ॥ ५

*Sāyaṇa* :

ये मरुतः शुभ्रत्वादिगुणोपेतास्तैर्मरुद्भिरित्यन्वयः । शुभ्राः शोभमानाः घोरवर्पसः उग्ररूपधराः । सुक्षत्रासः शोभनधनोपेताः । रिशादसः हिंसकानां भक्षकाः । मघमित्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु क्षत्रं भग इति पठितम् । शुभ्राः । स्फायितञ्चीत्यादिना शुभेरौणादिको रक्प्रत्ययः । प्रत्ययस्वरः । घोरवर्पसः । घोरं वर्पो येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । सुक्षत्रासः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् । आद्युदात्तं द्व्यच्छन्दसीत्येव ( Pāṇ. vi, 2, 119 ) तु न भवति क्षत्रशब्दस्यान्तोदात्तत्वात् । रिशन्ति हिंसन्तीति रिशाः तानदन्तीति रिशादसः । सर्वधातुभ्योऽसुन्प्रत्ययः नित्स्वरेण उत्तरपदमाद्युदात्तम् ( Pāṇ. vi, 1, 197 ) । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥

*Notes* :

1. सुक्षत्रासः. 'Having a noble dominion, mighty rulers.' Dominion is the ordinary meaning of क्षत्र in the Ṛgveda ; and it is in that sense that the word and its derivatives are applied in the later language to the order of Kṣatriyas. [ See Sāy. on क्षत्रश्रियम्, No. 2, v. 5 and सुक्षत्रः, No. 7, v. 4. ]. The accent of सुक्षत्रासः calls for remark. The word is a bahuvrīhi compound, and the general rule for such compounds is that they take the accent proper of their first component. So for example घोरवर्पसः in this verse. There are, however, many exceptions to this rule ; and bahuvrīhi compounds with सु and दुः generally take the accent of their last component. This is the case in our word, क्षत्र taking the udātta on the last syllable. In the case of a good many compounds with सु and दुः, where the accent is not, as it is here, already on the last syllable of the final member, it is in the compound shifted to the last syllable. Thus,

---

1 S. quotes Nir. V, 4.

for example, अङ्गुरि ( अङ्गुलि ) has the accent on the second syllable, but स्वङ्गुरि iv, 54, 4 has it on the last. See Whitney para. 1304 c and d.

2. रिशादसः Sāyaṇa's explanation is one, and the most likely one, of several etymologies of the word suggested by Yāska, whose note shows that so far back as his time, the origin and meaning of the word were unknown. I translate Roth's article on the word in the St. Petersburg Dictionary. ' रिशादस्. An adjective of unknown meaning. It is not treated as a compound word in the Pada text. The commentators explain it by रेशयदारिन् tearing in pieces the destroyer, or, according to another reading, रेशयदाशिन् ( from दश् to bite ). In Nirukta vi, 14, the word is divided into रिश + अदस् ( from अद् ), रिशा + दस्, रिशद् + अस् and so forth. Compare Sāyaṇa on the passages, and Mahīdhara on VS. iii, 44. An epithet especially of the Maruts and other gods, ṚV. i, 26, 4 ; 39, 4 ; 64, 5 ; 77, 4 ; 186, 8 ; v, 60, 7 ; 61, 16 ; 64, 1 ; 66, 1 ; 67, 2 ; 71, 1 ; vii, 59, 9 ; 66, 7 ; viii, 8, 17 ; 27, 4 and 10 ; 30, 2 ; 72, 5 ; रिशादसो न मर्या अभिद्यवः x, 77, 3 ; श्येनासो न स्वयशसो रिशादसः 5 ; ( सोमः ) सुमृळीको अनवद्यो रिशादाः ix, 69, 10. VS. iii, 44; xxxiii, 72.'

[ रिश् is always used to mean pluck off, tear into small bits, something like what cattle do with their grass fodder. रिशादसः in the present passage seems to be contrasted with सुक्षत्रासः as घोरवर्पसः with शुभ्राः. So रिशादसः must mean those who eat only small bits, the offerings being small in comparison with what the sacrificer asks for, of the gods in return. It is possible that this sense must have been early forgotton.— Ludwig in ' Ueber die neuesten Arbeiten auf dem Gebiete der Ṛgveda-forschung, ' p. 7. ]

Verse 6

*Padapāṭha* :

ये नाकस्य अधि रोचने दिवि देवासः आसते । मरुत्ऽभिः अग्ने आ गहि ॥ ६

*Sāyaṇa* :

ये मरुतो नाकस्याधि दुःखरहितस्य सूर्यस्योपरि दिवि द्युलोके रोचने दीप्यमाने ये देवासः स्वयमपि दीप्यमाना आसते । तैर्मरुद्भिरित्यन्वयः । नाकस्य । कं सुखं तद्यस्मिन्नास्ति असावक इति बहुव्रीहिं कृत्वा पश्चान्नञ् । न अको नाक इति नञ्-तत्पुरुषः । नलोपो नञ ( Pāṇ. vi, 3, 73 ) इति लोपो न भवति नभ्राण्नपा-दित्यादिना प्रकृतिभावात् ( Pāṇ. vi, 3, 75 ) । तत्पुरुषे तुल्यार्थेत्यादिना अव्यय-

पूर्वपदप्रकृतिस्वरत्वेन उदात्तत्वम् ( Pāṇ. vi, 2, 2 ) । प्रथमतस्तत्पुरुषं कृत्वा पश्चाद्बहुव्रीहौ उत्तरपदान्तोदात्तत्वं स्यात्[1] । अधिशब्द उपर्यर्थे । उपसर्गप्रतिरूपको निपातः । रोचने । रुच दीप्तौ अनुदात्तेतश्च हलादेरिति ( Pāṇ. iii, 2, 149 ) युच् । चित इत्यन्तोदात्तत्वम् ( Pāṇ. vi, 1, 163 ) । दिवि । ऊडिदमित्यादिना विभक्तेरुदात्तत्वम् ( Pāṇ. vi, 1, 171 ) । देवासः आज्जसेरसुगित्यसुक् ( Pāṇ. vii, 1, 50 ) । आसते । आस उपवेशने । अनुदात्तेत्त्वादात्मनेपदम् । झस्य अदादेशः । अदिप्रभृतिभ्यः शप ( Pāṇ. ii, 4, 72 ) इति शपो लुक् । अनुदात्तेत्वाल्लसार्वधातुकानुदात्तत्वम् ( Paṇ. vi, 1, 186 ) । यद्वृत्तयोगान्न निघातः[2] ( Pāṇ. viii, 1, 66 ) ॥

*Note* :

नाकस्याधि रोचने. 'On the shining arch of heaven'. The sky ( नाक ) is conceived of as a 'firmament,' a solid vault on which ( अधि with the loc. ) the Maruts seat themselves. Sāyaṇa's attempt to make नाक mean the sun here hardly deserves notice. He may have been led to it by the fact that the phrase सूर्यस्य रोचने occurs elsewhere, RV. iii, 22, 3. A more common collocation is रोचने दिवः, as, for example, in ṚV. i, 105, 5, अमी ये देवाः स्थन त्रिष्वा रोचने दिवः, where Sāyaṇa's note is हे देवाः त्रिषु पृथिव्यादिषु स्थानेषु येमी यूयं स्थन वर्तमाना भवथ । यानि स्थानानि दिवो द्योतमानस्य सूर्यस्य रोचने दीप्तिविषये वर्तन्ते । सूर्यप्रकाश्येषु स्थानेष्वित्यर्थः ।

Max Müller has the following note :—

'Nāka must be translated by firmament, as there is no other word in English besides heaven, and this is wanted to render dyu. Like the Jewish firmament, the Indian nāka, too, is adorned with stars; cf. i, 68, 5, पिपेश नाकं स्तृभिः. Dyu, heaven, is supposed to be above the rajas, sky or welkin. Kuhn's Zeitschrift, vol. xii, p. 28.

Sāyaṇa : ' In the radiant heaven above the sun. ' See note 1 to i, 6, 9, p. 49.'[3]

Verse 7

*Padapāṭha* :

ये ई॒ङ्खय॑न्ति॒ पर्व॑तान् ति॒रः स॑मु॒द्रम् अ॒र्ण॒वम् । म॒रुत्ऽभिः॑ अ॒ग्ने॒ आ ग॒हि॒ ॥ ७

[1] See Pāṇ. vi, 2, 172; Vārt. and Pat. MBh. on Pāṇ. vi, 2, 1–2; M's V. G. S. App. III. para 10, c and d2. [2] M's. V. G. S. App. III. para 19 B.

[3] In the note referred to, a number of passages are brought together to show that the two words रोचनं दिवः belong together, and that they signify the light of heaven, or the bright place of heaven.

*Sāyaṇa* :

ये मरुतः पर्वतान्मेधानीङ्खयन्ति चालयन्ति । तथा अर्णवम् उदकयुक्तं समुद्रं तिरः कुर्वन्तीति शेषः । निश्चलस्य जलस्य तरङ्गाद्युत्पत्तये चालनं तिरस्कारः । तैर्मरुद्भिरित्यन्वयः । ईङ्खयन्ति । उख उखीत्यादावीखिगत्यर्थः । हेतुमति चेति णिच् । इदितो नुम् धातोरिति नुम् । णिजन्तधातोश्चित इत्यन्तोदात्तत्वम् ( Pāṇ. vi, 1, 163 ) । शपः पित्वादनुदात्तत्वम् ( Pāṇ. iii, 1, 4 ) । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । पर्वतान् । पूर्वं पर्व मर्व पूरणे । औणादिकोतन । प्रत्ययस्वरः ॥

*Notes* :

1. तिरः. A preposition governing समुद्रं. So also in the next verse.

2. It must be an open question what the poet means by the monntains which are tossed by the Maruts across the surging sea. Looking to the context I think that he has in view the influence of the storm gods on the waters when they stretch across the sea ( verse 8 ), and that by mountains here he means waves mountain high. Compare समुद्रैः पर्वतैः in ii, 16, 3, where Sāyaṇa's gloss, समुद्रैः पर्वतैश्च is to be rejected. न क्षोणीभ्यां परिभ्वे त इन्द्रियं न समुद्रैः पर्वतैरिन्द्र ते रथः 'Thy chariot, Indra, is not overstepped by earth and heaven; *nor by the monntains of the sea.*' ( But compare Max Müller, Vedic Hymns, Part i., p. 62. ) The difficulty, it should be noted, is, as frequently the case, not as to the meaning of the word used, but as to the poet's metaphor. Max Müller, who, with Sāyaṇa, assigns the meaning clouds to पर्वतान् here, has the following note :—

'That पर्वत ( mountain ) is used in the sense of cloud, without any further explanation, is clear from many passages :

i, 57, 6, त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
'Thou, Indra, hast cut this great broad cloud to pieces with thy lightning.' · · ·

We actually find two similes mixed up together, such as v. 32, 2, ऊधः पर्वतस्य, the udder of the cloud. All we can do is to translate parvata by mountain, but always to remember that mountain means cloud. In the Edda, too, the rocks said to have been fashioned out of Ymir's bones, are supposed to be intended for clouds. In old Norse, klakkr means both cloud and rock; nay, the English word cloud itself has been identified with the Anglo-Saxon *clūd*, rock. See Justi, Orient und Occident, vol. ii, p. 62.'

There is nothing distinctive about the passage of clouds across the sea, as contrasted with their passage across the dry land. It must be noted, however, that Roth takes समुद्र here and in some other passages to refer not to the sea, but to the 'waters that are above the sky.'[1] Compare Max Müller, Vedic Hymns, Part i pp. 57-61.

Verse 8

*Padapāṭha* :

आ ये तन्वन्ति रश्मिऽभिः तिरः समुद्रम् ओजसा ।
मरुत्ऽभिः अग्ने आ गहि ॥ ८

*Sāyaṇa* :

ये मरुतो रश्मिभिः सूर्यकिरणैः सह आ तन्वन्ति आप्नुवन्ति आकाशमिति शेषः। किंच ओजसा स्वकीयबलेन समुद्रं तिरस्कुर्वन्ति । तैर्मरुद्भिरित्यन्वयः । तन्वन्ति । तनु विस्तारे । लटो झोन्तः । तनादिकृञ्भ्य उः (Pāṇ. iii, 1, 79) । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य[2] इति तिङ एवाद्युदात्तत्वम् । समुद्रम् । उन्दी क्लेदने । स्फायितञ्चीति रक् (Uṇ. Sū. ii, 178 )। समासे कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

Verse 9

*Padapāṭha* :

अभि त्वा पूर्वऽपीतये सृजामि सोम्यम् मधु । मरुत्ऽभिः ।
अग्ने आ गहि ॥ ९

*Sāyaṇa* :

हे अग्ने पूर्वपीतये पूर्वकाले प्रवृत्ताय पानाय त्वां प्रति सोम्यं मधु सोमसंबन्धिनं मधुररसम् अभि सृजामि सर्वतः संपादयामि । अतस्त्वं मरुद्भिः सहात्रागच्छ । अभि । एवमादीनामन्त[3] इत्यन्तोदात्तत्वम् । त्वामौ द्वितीयाया इति त्वादेशः सर्वानुदात्तः[4] । पूर्वपीतये । पूर्वा चासौ पीतिश्च । पुंवत्कर्मधारयेत्यादिना पुंवद्भावः ( Pāṇ. vi, 3, 42 ) । सृजामि । सृज विसर्गे । मिपः पित्त्वादनुदात्तत्वम् । विकरणस्वरः । सोम्यम् । सोममर्हति यः ( Pāṇ. iv. 4, 137 ) । प्रत्ययस्वरेणान्तोदात्तः । मधु । फलिपाटिनमीत्यादिना ( Uṇ. Sū. i, 19 ) उप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वम् (Pāṇ. vi, 1, 197) । अन्यद्गतम् । अत्र यास्कः । अभिसृजामि

---

[1] The Passages cited are i, 19, 7; i, 159, 4; v, 55, 5; v. 79, 8; vi, 58, 3; viii, 10. 1; viii, 54, 2; viii, 86, 5; x 114, 4. [2] Kāt. Vārt. 9. on Pāṇ. vi, 1, 158. [3] Phiṭ-Sūtra 80, 81 *v. l.* एवादीनामन्तः. [4] M's V. G. S. App. III. 8, A, a; M's V. G. S. para 109, A, a ( p. 105 ).

त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः[1] सहागच्छेति ( Nirukta x, 37 ).

*Note* :

सोम्यम्. The metre shows that we must pronounce so-miam. Compare note 1 on verse 2 supra.

पूर्वपीतये. For accent See M's V. G. S. p. 454.

---

## No. 2

*Maṇḍala* I *Sūkta* 25

*Sāyaṇa* :

यच्चिदित्येकविंशत्यृचं द्वितीयं सूक्तम्। तथा चानुक्रान्तम् । यच्चिन्सैकेति । ऋषिश्चान्यस्मादिति परिभाषया शुनःशेप एव ऋषिः। आदौ गायत्रमिति परिभाषितत्वाद्गायत्री छन्दः। वारुणं त्विति पूर्वोक्तत्वात्तुह्यादिपरिभाषया (Anukr xii, 3 ) वरुणो देवता । विनीयोग उक्तः शौनःशेपाख्याने । विशेषविनियोगस्तु । आभिप्लवषडह इदं सूक्तं होत्रकशस्त्रे स्तोमनिमित्तमावापार्थम्। अभिप्लवपृष्ठ्याहानीति खण्डे तथैव सूत्रितम्। यच्चिद्धि ते विश इति वारुण्यमेतस्य तृचमावपेत मैत्रावरुण ( Āśval. vii, 5, 9 & 10 ) इति ॥

*Note* :

[ Translated in Max Müller's " Ancient Sanskrit Literature," pp. 535-7. ]

Verse 1

*Padapāṭha* :

यत् चित् हि ते विशः यथा प्र देव वरुण व्रतम् ।
मिनीमसि द्यविऽद्यवि ॥ १

*Sāyaṇa* :

हे वरुण[2] यथा लोके विशः प्रजाः कदाचित्प्रमादं कुर्वन्ति तथा वयमपि ते तव संबन्धि यच्चिद्धि यदेव किंचिद्व्रतं कर्म द्यविद्यवि प्रतिदिनं प्र मिनीमसि प्रमादेन हिंसितवन्तः। तदपि व्रतं प्रमादपरिहारेण साङ्गं कुर्विति शेषः। यथा। लित्स्वरेणाद्युदात्तत्वे प्राप्ते ( Pāṅ. vi, 1, 193 ) यथेति पादान्त (Phiṭ. Sū, iv, 17)

---

[1] **Maruts.** See Macdonell's Vedic Mythology § 29, last para ; and Taylor's 'The Origin of the Aryans' p. 319.

[2] **Varuna.** For the derivations of the word, and characteristics and functions f the god, see Muir's Sansksrit Texts, Vol. V, Sec. V, and Macdonell's Vedic Mythology § 12, and Hopkin's Rel. Ind. pp. 64-72. For *uru-w-na* found in the Boghaz-köi ( Asia Minor ) inscription, see M and K's Vedic Index Vol. I, p. viii, and Moulton's Early Zoroastrianism p. 6. On the correspondence of *Varuṇa* with the Greek *Ouraños* see Muir's S. T., Vol. V, p. 76, and Bloomfield's Rel. Ved., p. 136.

इति सर्वानुदात्तत्वम् । मिनीमसि । मीञ् हिंसायाम् । इदन्तो मसि । क्र्यादिभ्यः श्ना । मीनातेर्निगम ( Pāṇ. vii, 3, 81 ) इति ह्रस्वत्वम् । ई हल्यघोरितीकारः । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्तिङ एव स्वरः शिष्यते । यद्वृत्तयोगान्निघाताभावः ॥

*Notes* :

1. Construe this verse with the one following. Sāyaṇa's construction is wrong.

2. प्र. For the position of this word see note 4 on No. 1, verse 1.

[ 3. 'व्रतम् ( from वृणोति ). ( 1 ) Originally what is enclosed, protected, set apart; ( 2 ) what is fenced off or forbidden, what is determined, what is settled, and hence, like धर्मन् law, ordinance; ( 3 ) sacrifice, being supposed to be enjoyed by the gods; ( 4 ) sway, power, or work ( as in v, 83, 5; vi, 54, 9. )'— Max Müller's Note abridged ( Vedic Hymns, Part i., pp. 236–240. ) ]

4. मिनीमसि. An older form of the termination of the first person plural. Both forms are used freely together in the Ṛgveda, but मसि occurs five times as often as मः. See Whitney, para 548.[1] The termination 'masi', recovered in the Ṛgveda, throws a flood of light on the real character of the inflections in the Indo-Germanic languages. Terminations like mas and the Latin mus wear little trace of their original signification. But masi is obviously the pronoun of the first person *plus* the pronoun of the third person, I ( or rather me, an old nominative ) + he=we.

5. द्यविद्यवि. The word is repeated, and forms a compound of which the prior member has its own independent accent, and the other is without accent. Whitney, para. 1260.[2]

Verse 2

*Padapāṭha* :

मा नः वधाय हत्नवे जिहीळानस्य रीरधः मा हृणानस्य मन्यवे ॥ २

*Sāyaṇa* :

हे वरुण जिहीळानस्यानादरं कृतवतो हत्नवे हन्तुः पापिहननशीलस्य तव

[1] M's V. G. S. para 131 p. 125 note 2. [2] Phiṭ Sū. 86, 87 and Subodhinī on the same; Pān. viii, 1, 11; vi, 1, 223; M's V. G. S. App. III. para 10 a.

संबन्धिने त्वत्कर्तृकाय वधाय नः अस्मान्मा रीरधः संसिद्धान्विषयभूतान्मा कुरु। हृणानस्य हृणीयमानस्य क्रुद्धस्य तव मन्यवे क्रोधाय मा अस्मान्रीरधः। वधाय। हनश्च वध ( Pāṇ. iii, 3, 76 ) इत्यवन्तो वधशब्दः। उञ्छादिषु पाठादन्तोदात्तः ( Pāṇ. vi, 1, 160 )। हत्नवे। हन हिंसागत्योः। कृहनिभ्यां क्नुगिति क्नुप्रत्ययः ( Uṇ. Sū. iii, 30 )। धातोर्नकारस्य तकारः। जिहीळानस्य। हेडृ अनादरे। अस्माल्लिटः कानच्। द्विर्भावहलादिशेषह्रस्वचुत्वजश्त्वानि। एकारस्य ईकारादेशश्छान्दसः। चित इत्यन्तोदात्तत्वम्। रीरधः। राध संसिद्धौ। चङि णिलोप उपधाह्रस्वत्वम्। द्विर्वचनहलादिशेषह्रस्वत्वसन्वद्भावेत्वाभ्यासदीर्घाः। न माङ्योग इत्यडभावः। हृणानस्य। हृणीङ् लज्जायाम्। अस्माच्छानचि पृषोदरादित्वादभिमतरूपसिद्धिः॥

*Notes* :

1. Sāyaṇa takes जिहीळानस्य with हत्नवे ( " destructive of the scoffer " ) and refers हृणानस्य to Varuṇa himself. Both constructions are harsh, if indeed the second be not impossible. The two words refer to the enemies, human and superhuman, against whom the favour of Varuṇa will continue to protect the righteous or the penitent man.

2. जिहीळानस्य. In the Ṛgveda a lingual ḷ ( ळ ) takes the place of ड when occurring between two vowels. Whitney, para. 54.

Varse 3

*Padapāṭha* :

वि मृळीकाय ते मनः रथीः अश्वम् न संऽदितम्।
गीःऽभिः वरुण सीमहि॥ ३

*Sāyaṇa* :

हे वरुण मृळीकाय[1] अस्मत्सुखाय ते तव मनो गीर्भिः स्तुतिभिः वि सीमहि विशेषेण बध्नीमः प्रसादयाम इत्यर्थः। तत्र दृष्टान्तः। रथीः रथस्वामी संदितं सम्यक्खण्डितं दूरगमनेन श्रान्तमश्वं न अश्वमिव। तथा स्वामी श्रान्तमश्वं घासप्रदानादिना प्रसादयति तद्वत्। रथीः। मत्वर्थीय ईकारः। संदितम्। दो अवखण्डने। निष्ठेति क्तः। द्यतिस्यतिमास्थामित्तिकिति ( Pāṇ. vii, 4, 40 ) इतीकारान्तादेशः। गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम्। गीर्भिः। सावेकाच इति भिस उदात्तत्वम्। सीमहि। षिवु तन्तुसंताने। व्यत्ययेनात्मनेपदम्। बहुलं छन्दसीति विकरणस्य लुक्। वलि लोपः ( Pāṇ. vi, 1, 66 )। यद्वा षिञ् बन्धन इत्यस्माद्विकरणस्य लुक्। दीर्घश्छान्दसः॥

*Notes* :

1. Sāyaṇa's interpretation of this verse must be rejected. विसीमहि cannot mean 'to bind fast'; and अश्वं संदितं, in such a

[1] See Arnold's Vedic Metre p. 143.

connection, can mean nothing but 'a horse that is bound.' But the real meaning of the verse is quite uncertain. The context ( compare verses 5 and 18 ) seems to favour the view that the worshipper here expresses the hope that his songs will go up into Varuṇa's presence, so that by their means he may 'loose the mind of Varuṇa to mercy,' as a man, about to uudertake a journey, unties his horse. Then and then only will Varuṇa come to have mercy upon him.

2. अश्वं न. In the Ṛgveda the negative particle न has often to be translated by as. We have an idiom in the making here. To say that A is *not* B may in certain connections have no other force, than to suggest that the two are so like each other that it requires to be said of them that the one is not the other ( compare the St. Petersburg Dictionary, *sub voce.* ).

Verse 4

*Padapāṭha* :

**परां हि मे विऽमंन्यवः पतंन्ति वस्यंःऽइष्टये । वयंः न वसतीः उपं ॥ ४**

*Sāyaṇa* :

हे वरुण मे मम शुनःशेपस्य विमन्यवः क्रोधरहिता बुद्धयो वस्यइष्टये वसीयसोऽतिशयेन वसुमतो जीवनस्य प्राप्तये परा पतन्ति पराङ्मुखाः पुनरावृत्तिरहिताः प्रसरन्ति । हिशब्दोऽस्मिन्नर्थे सर्वजनप्रसिद्धिमाह । परापतने दृष्टान्तः । वयो न । पक्षिणो यथा वसतीर्निवासस्थानान्युप सामीप्येन प्राप्नुवन्ति तद्वत् । पतन्ति । पादादित्वान्निघाताभावः[1] । वस्यइष्टये । वसुमच्छब्दाद्विन्मतोर्लुगिति मतुपो लुकि टिलोपः । ईयसुनो यकारलोपश्छान्दसः । वसतीः । शतुरनुम इति ङीप उदात्तत्वम्[2] ।

*Notes* :

1. The thought is apparently continued, the विमन्यवः of this verse corresponding to the गीर्भिः of the last. But विमन्यवः itself is a difficulty, occurring as it does only here in the Ṛgveda. Roth translates, 'desires, longings.'

2. वस्यइष्टये. This word occurs in only two other hymns, i, 176, 1 and viii, 86, 2 and 3. On i, 176, 1 Sāyaṇa's note is वसीयसो धनस्य प्राप्तये. On viii, 86, 2 he repeats that explanation, but adds, as an alternative, वसिष्ठधनस्येष्टये प्राप्तये. In all four places the Pada text writes वस्यः, not वस्य.

---

[1] M's V. G. App. III. para 8. B b. [2] Pāṇ, vi, i, 173.

[ वस्यस् compar. of वसु ( cf. वसिष्ठ ), better than, richer, luckier ; *n.* highest good fortune.—Grassmann in Dictionary. ]

Verse 5

*Padapāṭha* :

कदा क्षत्रऽश्रियम् नरम् आ वरुणम् करामहे । मृळीकाय उरुऽचक्षसम् ॥ ५

*Sāyaṇa* :

मृळीकाय अस्मत्सुखाय वरुण कदा कस्मिन्काले आ करामहे अस्मिन्कर्मण्यागतं करवाम । कीदृशम् । क्षत्रश्रियं बलसेविनं नरं नेतारम् उरुचक्षसं बहूनां द्रष्टारम् । क्षत्रश्रियम् । क्षत्राणि श्रयतीति क्षत्रश्रीः । क्विब्वचीत्यादिना ( Pāṇ. iii. 2, 17, 82 ) क्विप् दीर्घश्च । कृदुत्तरपदप्रकृतिस्वरत्वम् । नरम् । ऋदोरबित्यबन्त ( Pāṇ. iii. 3, 57 ) आद्युदात्तः । करामहे करोतेर्व्यत्ययेन शप् । उरुचक्षसम् । चक्षेर्बहुलं शिच्च इत्यसुन् ( Un. Sū. iv, 232 ) । शिद्वद्भावात्ख्याञादेशाभावः ॥

[ *Notes* :

1. [1]क्षत्रश्रियम्. ' Adorned with strength, ' Max Müller ; ' who is victory to the warriors. '

2. नरम्. The usual sense of man, hero, will do. The fanciful, etymological and unusual senses that Sāyaṇa is so fond of giving of this word and of words like देव ( No. 1., v. 6, & c. ) and वृषन् need not be accepted. ]

Verse 6

*Padapāṭha* :

तत् इत् समानम् आशाते इति वेनन्ता न प्र युच्छतः । धृतऽव्रताय दाशुषे ॥ ६

*Sāyaṇa* :

धृतव्रताय अनुष्ठितकर्मणे दाशुषे हविर्दत्तवते यजमानाय वेनन्तौ कामयमानौ । मित्रावरुणाविति शेषः । तावुभौ समानं साधारणं तदिदस्माभिर्दत्तं तदेव हविराशाते अश्नुवाते । न प्रयुच्छतः कदाचिदपि प्रमादं न कुरुतः । आशाते । अश्नोतेर्लिटि द्विर्भावहलादिशेषौ । अत आदेः ( Pāṇ. vii, 4, 70 ) इत्यात्वम् । अनित्यमागमशासनमिति वचनादश्नोतेश्च ( Pāṇ. vii, 4, 72 ) इति नुडभावः । वेनन्ता । वेनतिः कान्तिकर्मा । सुपां सुलुगित्याकारः । प्र युच्छतः । युच्छ प्रमादे । दाशुषे । ' दाशृ दाने ' इत्यस्माद्दाश्वान्साह्वानिति क्वसुप्रत्ययो निपातितः । वसोः संप्रसारणमिति संप्रसारणम् । शासिवसिघसीनां चेति षत्वम् ॥

---

[1] Skt. क्षत्र = Avestan xšadra.

*Notes* :

1. Construe न प्र युच्छत: with धृतव्रताय दाशुषे. 'They never fail the faithful giver' ( Max Müller ). This is the only passage in the Ṛgveda in which the word धृतव्रत is applied, not to the god, but to the worshipper, and the verse has on that ground, as well as on account of the abrupt introduction in it of another god, been regarded with suspicion as a probable interpolation. The word धृतव्रत, however, does not occur in the Ṛgveda so many as twenty times altogether, and there is therefore nothing to stumble at, if once and once only it is used in a particular connection, provided the connection suit the word. That it does so suit is obvious. It means 'upholder of the law,' and in that sense can be fitly applied either to the god who sustains the law, himself also observing it, or to the man who obeys it. We may illustrate the double application from i, 3, 7, where we have विश्वे देवास आ गत दाश्वांसो दाशुषः सुतम्.

Nor does the abrupt introduction of Mitra, himself unnamed, constitute a difficulty. The butter is poured into the fire, and " the Two " ( the great Twin Brethren ) rush forward to accept and enjoy the offering. Who the Two were every worshipper knew.

2. In the Pada text आशाते[1] is followed by इति to call attention to the dual form.

3. वेनन्ता. The usual form of the termination in the Ṛgveda. See Whitney, para. 328.[2]

4. दाशुषे. A perfect participle without reduplication. See Whitney, para. 790b.[3]

Verse 7

*Padapāṭha* :

वेद॑ यः वी॒नाम् प॒दम् अ॒न्तरि॑क्षेण पत॑ताम् । वेद॑ ना॒वः स॒मु॒द्रियः॑ ॥ ७

*Sāyaṇa* :

अन्तरिक्षेण पततामाकाशमार्गेण गच्छतां वीनां पक्षिणां पदं यो वरुणो वेद तथा समुद्रियः समुद्रेऽवस्थितो वरुणो नावो जले गच्छन्त्याः पदं वेद जानाति । सोऽस्मान्बन्धनान्मोचयत्विति शेषः । वेद । विद ज्ञाने । विदो लटो वेति ( Pāṇ.

1 *āśate* : Arnold's Vedic Metre, p. 290 ( C. I. 25 ).

2 M's V. G. S. para 97 A 1 Note 13 : ( p. 78 ).

3 M's V. G. S. paras 140 ( 5 ) and 89.

iii. 4, 83 ) तिपो णल् । लित्स्वरेणाद्युदात्तत्वम् ( Pāṇ. iv, 1, 193 ) । द्व्यचोतस्तिङ ( Pāṇ. vi, 3, 135 ) इति संहितायां दीर्घः । वीनाम् । नामन्यतरस्यामिति ( Pāṇ. vi, 1, 177[1] ) नाम उदात्तत्वम् । पतताम् । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः । नावः । सावेकाच इति षष्ठ्या उदात्तत्वम् । ( Pāṇ. vi, 1, 168 ) समुद्रियः । भवार्थे समुद्राभ्राद्धः ( Pāṇ. iv, 4, 118 ) इति घप्रत्ययः ॥

*Notes :*

1. वेदा. Note that the Pada text writes वेद, which is the reading also of the Saṁhitā text in three out of the six places in which the word occurs in this and the two following verses. In the other three places the Saṁhitā text has the long vowel, the Pada text always writing वेद. Compare Whitney, para 248 : 'In the Veda the final vowel of a word— generally a, much less often i and u— is in a large number of cases prolonged. Usually the prolongation takes place where it is favoured by the metre, but sometimes even where the metre opposes the change.'

2. वीनां. The metre shows that we must pronounce vī-na-am.

3. वेद नावः समुद्रियः. Sāyaṇa takes नावः to be a genitive, supplying पदं ; and समुद्रियः he takes as a nom. sing. masc. agreeing with यः. It is clear that समुद्रियः in this clause corresponds to अन्तरिक्षेण पततां in the previous clause ; and if we take it as an epithet of Varuṇa, we must translate ( with, for example, Max Müller, A. S. L., p. 536 ) :- 'Who, on the waters,' &c. But Roth, followed by Delbrück and Grassmann, takes नावः समुद्रियः to be an accusative plural feminine. For समुद्रियः so taken, Roth cites also x. 65, 13 ( 68, 3 in PWB is a misprint ) : आपः समुद्रियः ( nom. pl. ). Sāyaṇa, समुद्रियः समुद्रमन्तरिक्षं तत्र भवा आपश्च । समुद्राभ्राद्ध इति भवार्थे घप्रत्ययः ( Pāṇ. iv, 4, 118 ). [ For समुद्रियः as a gen. form see Whitney, paras. 348, 3 ; 355 b ; and 356 b. ]

## Verse 8

*Padapāṭha :*

वेद॑ मा॒सः धृ॒तऽव्र॑तः द्वाद॑श प्र॒जाऽव॑तः । वेद॑ यः उ॒प॒ऽजा॒यते॑ ॥ ८

*Sāyaṇa :*

धृतव्रतः स्वीकृतकर्मविशेषो यथोक्तमहिमोपेतो वरुणः प्रजावतस्तदा तदोत्पद्यमानप्रजायुक्तान्द्वादश मासश्चैत्रादीन्फाल्गुनान्तान्वेद जानाति । यस्त्रयोदशोऽधिकमास उपजायते संवत्सरसमीपे स्वयमेवोत्पद्यते तमपि वेद । वाक्यशेषः पूर्ववत् ।

[1] With Kāt. Vārt. and Pat. Mbh.

मासः । षड्‌भ्नित्यादिना ( Pāṇ. vi, 1, 63 ) मासशब्दस्य मासित्यादेशः । ऊडिदमित्यादिना ( Pāṇ. vi, 1, 176 ) शस उदात्तत्वम् । द्वादश । द्वौ च दश चेति द्वन्द्वः । द्व्यष्टनः संख्यायामित्यात्वम् ( Pāṇ. vi, 3, 47 ) संख्येति ( Pāṇ. vi, 2, 35 ) सूत्रेण पूर्वपदप्रकृतिस्वरत्वम् । [1]M2 adds प्रजावतः । जनी प्रादुर्भावे प्रपूर्वाज्जनसनखनक्रमगमो विट्प्रत्ययः (Pāṇ. iii, 2, 61) । विड्वनोरित्यात्वम् ( Pāṇ. vi, 4, 41 ) । कृदुत्तरपदप्रकृतिस्वरत्वम् । प्रजा एषां सन्तीति तदस्यास्त्यस्मिन्निति मतुप् ( Pāṇ. v, 2, 94 ) । मादुपधाया इति मतुपो वत्वम् ( Pāṇ. viii, 2, 9 ) । उपजायते । जनेः कर्मकर्तरि लट् । कर्मवद्भावादात्मनेपदम् ( Pāṇ. iii. 1, 87 ) । यक् । जनादीनामुपदेश एवात्वं वक्तव्यमिति ( Pāṇ. vi. 1, 195 ) वचनादचः कर्तृयकीत्याद्युदात्तत्वम् ( Pāṇ. iii, 1, 87 ) । तिङि चोदात्तवतीत्युपसर्गस्य निघातः ( Pāṇ. viii, 1, 71 ) । न च तिङ्ङतिङः ( Pāṇ. viii, 1, 28 ) इति निघातः यद्वृत्तान्नित्यमिति प्रतिषेधात् ( Pāṇ. viii, 1, 66 ) ॥

*Notes* :

1. द्वादश. The metre shows that we must pronounce du ā-da-śa ( Latin du-o-de-cim ).

2. प्रजावतः. ' With their offspring. ' But what offspring is meant ? Sāyaṇa says, all that is born therein. Delbrück takes the word to refer to all the months that are to follow the current month. Grassmann finds the explanation of प्रजावतः in the words that follow, वेदा य उपजायते. The child of the twelve months is the thirteenth month that from time to time is born to them. May the children of the months not be the days ?

3. वेदा य उपजायते. ' And knows the month that is born to them, born alongside of them. ' This is the intercalary month added from time to time to bring the lunar year into accordance with the solar year.

Verse 9

*Padapāṭha* :

वेद॑ वात॑स्य व॒र्तनि॑म् उ॒रोः ऋ॒ष्वस्य॑ बृ॒हतः॑ । वेद॑ ये अ॒धि ऽआस॑ते ॥ ९

*Sāyaṇa* :

उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य बृहतो गुणैरधिकस्य वातस्य वायोर्वर्तनिं मार्गं वेद वरुणो जानाति । ये देवा अध्यासते उपरि तिष्ठन्ति तानपि वेद जानाति । वातस्य । असिहसीत्यादिना ( Uṇ. Sū. iii, 1, 86 ) तन्प्रत्ययान्तो वातशब्दो नित्त्वादाद्युदात्तः । वर्तनिम् । वर्ततेनेनेति । वर्तनिः स्तोत्र इति स्तोत्रवाचकस्य वर्त-

निशब्दस्यान्तोदात्तत्वसिद्ध्यर्थमुञ्छादिषु पाठादस्य प्रत्ययस्वरेण मध्योदात्तत्वे प्राप्ते व्यत्ययेनान्तोदात्तत्वम् ( Pāṇ. vi, 1, 160 ) । बृहतः । [1]बृहन्महतोरुपसंख्यान-मिति ङस उदात्तत्वम् । अध्यासते । लसार्वधातुकानुदात्तत्वे सति धातुस्वरः ॥

*Notes :*

ऋष्वस्य. From ऋष् as ऊर्ध्व from वृध्. ऋष् is der. from ऋ and signifies to move quickly, to rise ( Gr. ). व forms adj. and nouns signifying the agent. ( Lindner's Altindische Nominal-bildung. ) [ ऋष्व=lofty ].

Verse 10

*Padapāṭha :*

नि स॒सा॒द॒ धृ॒तऽव्र॑तः॒ वरु॑णः प॒स्त्या॑सु आ । सा॒म्ऽरा॑ज्याय सु॒ऽक्रतुः॑ ॥ १०

*Sāyaṇa :*

धृतव्रतः पूर्वोक्तो वरुणः पस्त्यासु दैवीषु प्रजासु आ नि षसाद आगत्य निषण्ण-वान् । किमर्थम् । प्रजानां साम्राज्यसिद्ध्यर्थम् । सुक्रतुः शोभनकर्मा । नि षसाद । सदिरप्रतेरिति ( Pāṇ. viii, 3, 66 ) षत्वम् । साम्राज्याय । सम्राजो भावः साम्राज्यम् । गुणवचनब्राह्मणादिभ्य ( Pāṇ. v. 1. 124 ) इति ष्यञ् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम् । सुक्रतुः[2] । क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वम् (Pāṇ. vi, 2, 118 )[3] ॥

*Notes :*

1. ससाद. The स् is changed into ष् after नि, although नि and ससाद are treated as two distinct words. See Whitney, paras 185a and 1086.

2. पस्त्यासु.[4] पस्त्यं is given in the Naighaṇṭuka as one of the twenty-two synonyms of गृह and that is obviously the meaning of the feminine plural here. In 8, 39, 8 Agni is called त्रिपस्त्य, which Sāyaṇa explains by त्रिस्थान. Pronounce past-i-ā-su-ā and sām rāj-i-ā-ya.

[ Pischel, however, takes पस्त्यासु here, in the sense of ' the waters, ' the waters being of course those in the sky ( Vedische Studien, ii. pp. 211-222 ), citing iv, 1, 11 ( स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ) and Vāj. Saṁ X. 7 ( पस्त्यासु चक्रे वरुणः सधस्थमपां शिशुर्मातृतमास्वन्तः ). The सः in the former is Agni, and that Agni was born in the waters ia a Vedic idea

[1] ' नद्यजाद्युदात्तत्वे बृहन्महतोरुपसंख्यानम् ' ( Kāt. Vārt. on शतुरनुमो नद्यजादी, Pāṇ. vi, 1, 173 ) ; M's V. G. S. App. III para 11 C 3 ( p. 459 ).

[2] Skt. sukratu=Avestan hukhratu. [3] Under this Sūtra Bhaṭṭoji quotes as an illustration साम्राज्याय सुक्रतुं ( S. K. ).

[4] See M. and K's Ved. Ind., Vol. I, p. 512.

known to every one. मातृतम is, he adds, an epithet that in the Ṛgveda is applied only to the waters. The only other senses he assigns to the fem. पस्त्या are 'flood' and 'river.' Sāy. on iv, 1, 11 and ix, 65, 23 : पस्त्या=नदी. ]

Verse 11

*Padapāṭha :*

**अतः॑ विश्वा॑नि अद्भु॑ता चिकि॒त्वान् अ॒भि प॒श्य॒ति । कृ॒तानि॑ या च॒ कर्त्वा॑ ॥ ११**

*Sāyaṇa :*

अतोऽस्माद्वरुणाद्विश्वान्यद्भुता सर्वाण्याश्चर्याणि चिकित्वान्प्रज्ञावानभि पश्यति सर्वतोऽवलोकयति । या कृतानि यान्याश्चर्याणि पूर्वं वरुणेन संपादितानि । चकारादन्यानि यान्याश्चर्याणि कर्त्वा इतः परं कर्तव्यानि । तानि सर्वाण्यभिपश्यतीति पूर्वत्रान्वयः । अद्भुता । शेश्छन्दसि बहुलमिति शेर्लोपः । प्रत्ययलक्षणेन नपुंसकस्य झलचः ( Pāṇ. vii, 1, 72 ) इति नुम् । नलोपः । चिकित्वान् । कित ज्ञाने । लिटः क्वसुः । अभ्यासहलादिशेषचुत्वानि । वस्वेकाजाद्धसामिति नियमादिडभावः । रुत्वानुनासिकावुक्तौ संहितायाम् । पश्यति । पाघ्रेत्यादिना दृशेः पश्यादेशः । कर्त्वा । कृत्यार्थे तवैकेन्केन्यत्वनः ( Pāṇ. iii, 4, 14 ) इति करोतेस्त्वन् । नित्त्वादाद्युदात्तत्वम् । पूर्ववच्छेर्लोपः ॥

*Notes :*

1. अतः. 'From thence,' referring to पस्त्यासु in the previous verse.

2. अद्भुता. An ordinary form of the termination in the Ṛgveda. See Whitney, para. 329c.[1]

3. विश्वान्यद्भुता ( pronounce viśvāni adbhutā ). 'All wondrous things, all his wondrous work'. Delbrück would read अद्भुतः, and make the word an epithet of Varuṇa, as it is of Soma in ix, 20, 5. Failing that, Delbrück suggests 'secret, concealed from other' as the meaning of अद्भुता here; Grassmann, 'invisible' either as opposed to दृश्य iv, 2, 12, or as still lying concealed in the womb of the future ( our passage and i, 170, 1 ); Max Müller, 'all wondrous things' as above. There does not seem to be any real difficulty, much less any ground either for altering अद्भुता, or for attaching to the word a peculiar meaning. Varuṇa sits down on his heavenly throne. Wondrous is the sight spread out before him, including as it does all the past and all the future ( कृतानि या च कर्त्वा ).

---

[1] M's V. G. S. para 97 A 1–a and notes 14, 15 ( p. 78 ).

4. चिकित्वाँ. The Saṁhitā text shows a peculiar Vedic saṁdhi. The student knows that final आस् before any vowel or sonant consonant loses its स्, the hiatus with a following vowel being allowed to remain. In the Ṛgveda final आन् before a following vowel is written आँ. In the great number of such cases आन् stands for an original आन्स्. The nasalized vowel+स् is treated before a following vowel as the simple vowel+स् always is. The correctness of this explanation is vouched for by the accusative चिकित्वांसं, where the स् of which this peculiar Vedic saṁdhi is the sole survival in the nominative case, has come down to the classical language.

5. कर्त्वा ( pronounce kar-tu-ā ). For the termination see note above on अह्रुता. कर्त्वा is the accusative plural neuter of the verbal [ adjective in त्व having the sense of the potential passive participle ].

Verse 12

*Padapaṭha :*

सः <u>न</u>ः <u>वि</u>श्वाहा <u>सु</u>ऽक्रतुः <u>आदि</u>त्यः <u>सु</u>ऽपथा <u>क</u>र<u>त्</u> । प्र <u>न</u>ः आयूंषि <u>ता</u>रि<u>षत्</u> ॥ १२

*Sāyaṇa :*

सुक्रतुः शोभनप्रज्ञः स आदित्यो[1] वरुणो विश्वाहा[2] सर्वेष्वहःसु नोऽस्मान् सुपथा शोभनमार्गेण सहितान्करत्करोतु । किंच नोऽस्माकमायूंषि प्र तारिषत्प्रवर्धयतु । सुपथा । स्वती पूजायामिति समासे ( Pāṇ. ii, 2, 18 ) न पूजनादिति ( Pāṇ. v, 4, 69 ) समासान्तप्रतिषेधः । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते परादिश्छन्दसि बहुलमित्युत्तरपदाद्युदात्तत्वम् ( Pāṇ. vi. 2, 199 and Pat. MBh. ) । यद्वा तृतीयाया आलादेशः ( Pāṇ. vii. 1, 39 ) । अव्ययपूर्वपदप्रकृतिस्वरत्वं लित्स्वरेण बाध्यते । क्त्वादयश्चेत्येतन्न भवति । अबहुव्रीहित्वात् । बहुव्रीहौ हि तद्विधीयते । ( Pāṇ. vi, 2, 106 and 118 ) । आद्युदात्तं द्व्यच्छन्दसीत्येतदपि ( Pāṇ. vi, 2, 119 ) न भवति । पथिन्शब्दस्यान्तोदात्तत्वात् । करत् । करोतेर्लेटि व्यत्ययेन शप् । शपो लुकि लेटोऽडाटावित्यडागमः । इतश्च लोप इतीकारलोपः । यद्वा छान्दसे लुङि कृमृदृरुहिभ्यः ( Pāṇ. iii, 1, 59 ) इति च्लेरङ् । ऋदृशोऽङि गुणः ( Pāṇ. vii. 4, 16 ) इति गुणः । बहुलं छन्दस्यमाङ्योगेऽपीत्यडभावः । ( Pāṇ. vi, 4, 75 ) । प्राणः । उपसर्गाद्बहुलमिति ( Pāṇ. viii, 4, 28 ) नसो णत्वम् । तारिषत् । तारयतेर्लेट्यडागमः । बहुलं लेटीति सिप् । आदेशप्रत्यययोरिति षत्वम् ॥

---

[1] For Āditya—See Muir's S. T. Vol. V, Sec. 4, and Bloomfield's Religion of the Veda pp. 129-31.   [2] See Arnold's Vedic Metre p. 290.

*Notes* :

[ 1. सुपथा. Sāy. on vi, 64, 1 explains सुपथा as an adj. meaning सुमार्गाणि ].

2. णः The nasal in नः is changed to ण् after प्र although the two are distinct words. See Whitney, para, 194 [ M's V. G. S. para 65 c, p. 43 ].

3. तारिषत् [ and करत् ]. Vedic Subjunctives [ Whitney, paras 906 b and 836 b ].

[ On the use and formation of the Subj. see Whitney, paras. 575, 533 a, 557-9, 560 a and e, 562-3, 587 and also 614, &c. 808, &c., 835 &c. ][1]

Verse 13

*Padapāṭha* :

बिभ्रत् द्रापिम् हिरण्ययम् वरुणः वस्त निःऽनिजम् । परि स्पशः नि सेदिरे ॥ १३

*Sāyaṇa* :

हिरण्ययं सुवर्णमयं द्रापिं कवचं बिभ्रद्धारयन्वरुणो निर्णिजं पुष्टं स्वशरीरं वस्त आच्छादयति । स्पशो हिरण्यस्पर्शिनो रश्मयः परि नि षेदिरे सर्वतो निषण्णाः । बिभ्रत् । बिभर्तेः शतरि नाभ्यस्ताच्छतुरिति नुमभावः (Pāṇ. vii, 1, 78) । अभ्यस्तानामादिरित्याद्युदात्तत्वम् (Pāṇ. vi, 1, 189) । द्रापिम् । द्रा कुत्सायां गतौ । द्रापयतीषून्कुत्सितां गतिं प्रापयतीति द्रापिः कवचम् । अर्तिह्रीत्यादिना पुगागमः ( Pāṇ. vii, 3, 36 ) । औणादिक इप्रत्यये णिलोपः । हिरण्ययम् । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसीति ( Pāṇ. vi, 4, 175 ) हिरण्यशब्दाद्विकारार्थे विहितस्य मयटो मशब्दलोपो निपातितः । वस्त । वस् आच्छादने । लङ्यदादित्वाच्छपो लुक् । पूर्ववदडभावः । निर्णिजम् । णिजिर् शौचपोषणयोः । स्पशः । स्पश् बाधनस्पर्शनयोः । क्विप् चेति क्विप् । नि षेदिरे । षद्लृ विशरणगत्यवसादनेषु अस्माद्धात्वर्थात्कर्मणि लिटयेत्वाभ्यासलोपौ । सदिरप्रतेरिति षत्वम् ॥

*Notes* :

1. द्रापि. The word occurs in only four other passages of the Ṛgveda, i, 116, 10 ; iv, 53, 2 ; ix, 86, 14 ; 100, 9. Sāyaṇa uniformly renders it by कवच. Fick has compared the Lithuanian drapana ' cloak, mantle, ' and that meaning has been generally accepted for the Sanskrit word.

2. वस्त. A third sing. impf. ' In the older language[2] the augment is often lost, and the augmentless forms have the same value as if they were complete ; or rather more often they

[1] M's V. G S. para 215 C ( pp. 352-60 ). [2] Gr., Lat., Goth.

are used as subjunctives.' Whitney ( 1st Edn. ), para 587. It is probable that the augment, like the termination, was originally a distinct word, whose presence in the sentence was not essential to the conveying of the sense of time past.

Also Whitney ( 1st Edn. ), para. 563 :— 'Besides the proper subjunctive, with mode-sign in its triple form— with primary, with strengthened primary, and with secondary endings, there is in the older language, another, without mode-sign and with secondary endings, or in all respects coinciding wirh the forms of an augment-tense ( imperfect or aorist ) save for the absence of the augment. Subjunctives of this character are frequent in the Ṛgveda, decidedly less common in later Vedic and very little used in the Brāhmaṇas, except after मा prohibitive— after which they stand also in the later language.'

From the double use of these augmentless past forms in the Veda it is impossible to decide from the form alone whether a particular word is to be translated as a past indicative or as a subjunctive. This is the case, for example, with दर्शं in verse 18 of this hymn, which, as far as the form goes, may mean either 'I saw just now' or 'may I see.'

3. निर्णिजम्. This word occurs not infrequently ( twelve times ). Sāyaṇa generally explains it by रूप. A comparison of the passages seems to show that it means an ornament or an adorned robe, and that meaning suits our passage better than Sāyaṇa's explanation. For वस्त means 'he has put on', not 'he is covering.'

4. परि स्पशो नि षेदिरे. 'His spies sit down around.' Sāyaṇa's mistake is amazing when we consider how common in the Ṛgveda is the conception of Varuṇa's spies or messengers.[1] Compare, for example, vii, 87, 3, परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके. Sāyaṇa, स्पशान्ति स्पृशन्तीति स्पशः चराः [ Av. √ spas-watch, observe ].

Verse 14

*Padapāṭha* :

न यम् दिप्संन्ति दिप्सवंः न द्रुह्वांणः जनांनाम् । न देवम् अभिऽमांतयः ॥ १४

1 Compare Avestan Ahur Mazda and his Amshaspands or Amesha Spentas. See Darmesteter's Ormazed et Ahriman; Bloomfield's Rel. Ved. p. 133; Moulton's Early Zoroastrianism p. 98.

*Sāyaṇa* :

दिप्सवो हिंसितुमिच्छन्तो वैरिणो यं वरुणं न दिप्सन्ति भीताः सन्तो हिंसितुमिच्छां परित्यजन्ति । जनानां प्राणिनां द्रुह्वाणो द्रोग्धारोपि यं वरुणं प्रति न द्रुह्यन्ति । अभिमातयः पाप्मानः । पाप्मा वा अभिमातिरिति (T. S. ii, 1, 3, 5) श्रुत्यन्तरात् । देवं तं वरुणं न स्पृशन्ति । दिप्सन्ति । दम्भु दम्भे । अस्मात्सनि सनीवन्तर्धेत्यादिना इडभावः ( Pāṇ. vii, 2, 49 ) । हलन्ताच्च ( Pāṇ. i, 2, 10 ) इत्यत्र हल्ग्रहणस्य जातिवाचित्वात्सनः कित्त्वाद्दम्भ इच्चेति दकारात्परस्याकारस्येकारः ( Pāṇ vii, 4, 56 ) । अनिदितामिति नलोपः भष्भावाभावश्छान्दसः ( Pāṇ. viii. 2, 37 ) । अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः ( Pāṇ. vii, 4, 58 ) । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण सनो नित्त्वान्नित्स्वरेणाद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । दिप्सवः । सन्नन्ताद्दम्भेः सनाशंसभिक्षः उः ( Pāṇ. iii. 2, 168 ) इति उप्रत्ययः । प्रत्ययस्वरः । द्रुह्वाणः । द्रुह जिघांसायाम् । अन्येभ्योऽपि दृश्यन्त इति क्वनिप् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् ॥

*Notes* :

1. द्रुह्वाणो जनानाम् ' Those who injure us men. ' A contrast is intended between the tribes of men and the god ( देवं ) who need fear no foe. Sāyaṇa's construction is therefore to be upheld against, for example, Grassmann, who in his translation takes जनानां with अभिमातयः ( differently in his dictionary ), or Ludwig, who takes the genitive partitively, ' here among men. ' Compare Max Müller, ' the tormentors of men. '

[ 2. अभिमातयः From मन्. Cf. मन्यु. Sāy. on अभिमातिर्जनानां ( x 69, 5 ) :- जनानां शत्रूणामभिमातिराभिभवनशीलमानयुक्तोभिभविता. On viii, 3, 2. अभिमन्यत इत्यभिमातिः शत्रुः ]

Verse 15

*Padapāṭha* :

**उ॒त यः मानु॑षेषु आ यशः॑ च॒क्रे असा॑मि आ । अ॒स्माक॑म् उ॒दरे॑षु आ ॥ १५**

*Sāyaṇa* :

उत अपि च यो वरुणो मानुषेषु यशोऽन्नम् आ चक्रे सर्वतः कृतवान् । स वरुणः कुर्वन्नप्या सर्वतः असामि[1] संपूर्णं चक्रे न तु न्यूनं कृतवान् । विशेषतोऽस्माकमुदरेषु आ सर्वतश्चक्रे । मानुषेषु । मनोर्जातावञ्यतौ षुक् च ( Pāṇ. iv, 1, 161 ) इत्यञ् । ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वम । चक्रे । प्रत्ययस्वरः । असामि अव्यये नञ्कुनिपातानामिति वक्तव्यम् ( Kāt. Vārt. 3. on Pāṇ. vi, 2, 2. ) इत्यव्यय

[1] Sāmi = Lat. semi.

पूर्वपदप्रकृतिस्वरत्वम् । यशः । अशेर्युट् चेत्यसुन् ( Uṇ. Sū. iv 190 ) । उदरेषु । उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च ( Uṇ. Sū. 19 ) इत्यल् । लित्स्वरः । गतिकारकोपपदादित्युत्तरपदप्रकृतिस्वरत्वम् ( Pāṇ. vi, 2, 139 ) ॥

*Notes* :

1. मानुषेष्वा ( pronounce mā-nu-ṣe-ṣu ā ). 'In men.' Compare पस्त्यास्वा in verse 10. So also in this verse again उदरेष्वा ( pronounce uda-re-ṣu ā ), 'In our bellies.' The आ after असामि ( pronounce a-sāmi ā ) on the other hand is a particle of emphasis.

2. यशः The meaning food is doubtful, and it suits only half of the verse ( उदरेषु आ ). Max Müller's 'glory and not half glory, who gives it even to our own bodies' obscures the obvious meaning of अस्माकमुदरेष्वा, a clause which clearly refers to food. Grassmann, who understands the word as meaning 'good, blessing,' compares x, 22. 2, इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः । मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥ Sāyaṇa : य इन्द्रो मित्रो न सूर्य इव स्निग्ध इव वा जनेषु स्तोतृजनेषु यशः अन्नं कीर्तिं वा आ चक्रे करोति.

Ludwig most unreasonably takes offence at उदरेषु and actually alters it to दुर्येषु, which he translates 'in our own houses.'

## Verse 16

*Padapāṭha* :

परा॑ मे॒ य॒न्ति॒ धी॒तय॑ः गाव॑ः न गव्यू॑तीः अनु॑ । इ॒च्छन्तीः॑ उ॒रुऽचक्ष॑सम् ॥ १६

*Sāyaṇa* :

उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणमिच्छन्तीर्मे धीतयः शुनःशेपस्य बुद्धयः परा यन्ति पराङ्मुखा निवृत्तिरहिता गच्छन्ति । तत्र दृष्टान्तः । गावो न । यथा गावो गव्यूतीरनु गोष्ठान्यनुलक्ष्य गच्छन्ति तद्वत । गव्यूतीः । गावोऽत्र यूयन्त इत्यधिकरणे क्तिन् । गोर्यूतौ छन्दसि ( Kāt. Vārt. 2 on Pāṇ. vi, 1, 79 ) इत्यवादेशः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ( Pāṇ. vi, 2, 42 ) । यद्वा युतिर्यवनं गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इच्छन्तीः । इषु इच्छायाम् । लटः शतृ । तुदादिभ्यः शः । इषुगमियमां छ इति छत्वम् ( Pāṇ. vii, 3, 77 ) । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते ॥

*Notes* :

1. गव्यूतीः . गव्यूति = ( गो + ऊति, यू being interposed between अ and ऊ for euphony ) pasture-land ( Gr. ); cattle-path, path

in general, योजन, the cattle themselves that go by the path. गोष्ठ and गव्यूति contrasted in परो गोष्ठे परो गव्यूतौ वा ( Ap. Sr. 3, 4, 8. ) ( Geldner, Ved. St., ii, 287–292 ). Sāy., = गोमार्ग ( ix, 85, 8. ), गोसंचारभूमि ( viii, 5, 6. ), मार्ग ( No. 29, ) v. 2, Ul. Ms.

2. इच्छन्तीः. Whitney, para. 363. g.[1]

3. उरुचक्षसम्. [ Cf. Sāy. on verse 5 above.

Verse 17

*Padapāṭha* :

सम् नु वोचावहै पुनः यतः मे मधु आऽभृतम् । होताऽइव क्षदसे प्रियम् ॥ १७

*Sāyaṇa* :

यतो यस्मात्कारणात् मे मज्जीवनार्थं मधुरं हविराभृतम् । अञ्जःसवाख्ये कर्माणि संपादितम् । अतः कारणाद्धोतेव होतकर्तेव त्वमपि प्रियं हविः क्षदसे अश्नासि । पुनर्हविःस्वीकारदूर्ध्वम् तृप्तस्त्वं जीवन्नहं च नु अवश्यं संवोचावहै संभूय प्रियवार्तां करवावहै वोचावहै । लोडर्थे छान्दसे लुङि ब्रुवो वचिः । अस्यतिवक्तीति च्लेरङादेशः वच उमित्युमागमे गुणः । व्यत्ययेन टेरत्वम् । यद्वा लोट एव लुङादेशः । स्थानिवद्भावादैत्वम् आभृतम् हृग्रहोर्भः ( छन्दसि Kāt Vāt. ) । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् ( Pāṇ vi, 2, 49 ) ॥

*Notes* :

1. सं नु वोचावहै. 'Come now, and let us talk together.' For वोचावहै see Whitney, paras. 847 and 854. 'The roots पत, नश्, वच्, form the tense-stems पप्त, नेश, वोच, of which the first is palpably and the other two are probably the result of reduplication, but the language has lost the sense of their being such, and makes other reduplicated aorists from the same root. ... The stem वोच् has in Vedic use well-nigh assumed the value of a root; its forms are very various and of frequent use, in Ṛgveda especially far outnumbering in occurrences all other forms from वच्. Besides those already given we find वोचा ( 1st sing. impv. ) and वोचाति ; वोचावहै ; वोचेः, वोचेय, वोचेमहि ; वोचतात ( 2nd sing. ), वोचतु, वोचतं, वोचत.'[2]

2. होतेव क्षदसे प्रियम् 'Like a priest thou art eating the choice morsel.' Max Müller translates 'thou eatest what thou likest like a friend', but notes that hotṛ[3] 'does not mean

---

[1] M's V. G. S. para 89 B ( p. 82 note 3 ) ; L's N. I. V. p. 393.

[2] M's V. G S. p. 415. Compare Lat. *Vocare, vox, voci.*

[3] Avestan Zaotar.

friend, but the priest who is chosen to invite the gods. Perhaps it means poet and priest in a more general sense than in the later hymns.' Is there a reference to some old custom according to which the priest took the first toll of the offering ( 1 Samuel ii, 13 and 14 )?

Verse 18

*Padapāṭha* :

दर्शम् नु विश्वऽदर्शतम् दर्शम् रथम् अधि क्षमि । एताः जुषत मे गिरः ॥ १८

*Sāyaṇa* :

विश्वदर्शतं सर्वैर्दर्शनीयमस्मदनुग्रहार्थमत्राविर्भूतं वरुणं दर्शं नु अहं दृष्टवान्खलु । क्षमि क्षमायां भूमौ रथं वरुणसंबन्धिनमधि दर्शम् आधिक्येन दृष्टवानस्मि । एता उच्यमाना मे गिरो मदीयाः स्तुतीर्जुषत वरुणः सेवितवान् । दर्शम् । दृशेःइरितो वा ( Pāṇ. iii, 1, 57 ) इति च्लेरङादेशः । ऋदृशोऽङि गुणः ( Pāṇ. vii, 4, 16 ) इति गुणः । विश्वदर्शतम् । दृशेर्भृमृदृशीत्यादिना ( Uṇ. Sū. iii. 109 ) अतच्प्रत्ययान्तो दर्शतशब्दः । मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् ( Kāt. Vārt. 2. on Pāṇ. vi. 2, 106 )। यद्वा विश्वं दर्शनीयमस्येति बहुव्रीहिः । बहुव्रीहौ विश्वं संज्ञायाम् ( Pāṇ. vi. 4, 2, 106 ) इति पूर्वपदान्तोदात्तत्वम् । क्षमि । आतो धातोः ( Pāṇ. vi. 4, 140 ) इत्यत्रात इति योगविभागादाकारलोपः ॥

*Notes* :

1. दर्श. See note 2 on verse 13 above. As far as the form goes, दर्श may mean either 'I saw' or 'may I see.' The former is Sāyaṇa's way of taking it, and it seems preferable. So also Max Müller. The poet's cry has gone up to Varuṇa, has 'loosed him to mercy' as one undoes the fetters of a horse, and the god now appears coming to forgive and bless his worshipper.

In translating we should use the present. In the Veda the aorist often refers to the moment of the past just gone by: 'I have caught sight of— I see.'

2. अधि क्षमि.[1] 'On the earth.'

Verse 19

*Padapāṭha* :

इमम् मे वरुण श्रुधि हवम् अद्य च मृळय । त्वाम् अवस्युः आ चके ॥ १९

[1] M's V. G. S. para 78, 3; p. 458, c 1.

*Sayana* :

वरुणप्रघासेष्विमं मे वरुणेति वारुणस्य हविषोऽनुवाक्या । पंचम्यां पौर्णमास्यामिति खण्डे सूत्रितं । इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वंदमानः ( आ. २. १७ ) इति ॥

हे वरुण मे मदीयमिमं हवमाह्वानं श्रुधि शृणु । किंच अद्य अस्मिन्दिने मृळय अस्मान्सुखय । अवस्युः रक्षणेच्छुरहं त्वां वरुणमाभिमुख्येन चके शब्दयामि स्तौमीत्यर्थः । श्रुधि श्रु श्रवणे । लोटो हिः । श्रुशृणुपृकृवृभ्यश्छन्दसीति हेर्धिरादेशः[1] (Pāṇ. vi, 4, 102) । बहुलं छन्दसीति विकरणस्य लुक् । अन्येषामपि दृश्यत इति संहितायां दीर्घः । अवस्युः । अवसशब्दात सुप आत्मनः क्यच् । क्याच्छन्दसीत्युप्रत्ययः ( Pāṇ. iii, 2, 170 ) । आ चके । कै गै शब्दे । अस्मात्लिट्यादेचः ( Pāṇ. vi, 1, 45 ) इत्यात्वम् । द्विर्भावचुत्वे । आतो लोप इटि च ( Pāṇ. vi, 4, 64 ) इत्याकारलोपः । तिङ्ङतिङ इति निघातः ॥

*Notes* :

1. श्रुधि. For the lengthening of the final vowel in the Saṁhitā text see note 1 on verse 7, and compare अद्य in this verse. In the next verse, it will be noticed, श्रुधि occurs with the short vowel in the Saṁhitā text.

2. आ चके. 'I long for.' On i, 117, 23, सदा कवी सुमतिमा चके वां, Sāyaṇa explains आ चके by आभिमुख्येन प्रार्थये.

Varse 20

*Padapāṭha* :

**त्वम् विश्वस्य मेधिर दिवः च ग्मः च राजसि । सः यामनि प्रति श्रुधि ॥ २०**

*Sāyaṇa* :

हे मेधिर मेधाविन्वरुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि एवमात्मकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि दीप्यसे । स तादृशस्त्वं यामनि क्षेमप्रापणेऽस्मदीये प्रतिश्रुधि प्रतिश्रवणमाज्ञापनं कुरु रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः । दिवः । ऊडिदमित्यादिना षष्ठ्या उदात्तत्वम् । ग्मः । ग्मेत्येतद् भूनामसु पठितम् । आतो धातो ( Pāṇ. vi, 4, 140) रित्यत्रात इति योगविभागादातो लोपः ( Pāṇ. vi. 4, 64 ) इति प्रतिषेधेऽपि व्यत्ययेनाकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । यामनि । या प्रापणे । आतो मनिन्क्वनिब्वनिपश्चेति । मनिन् । नित्वादाद्युदात्तत्वम् । श्रुधि । उक्तम् ॥

---

[1] M's V. G. S. para 134, C 48 ( p. 146 ).

*Notes :*

1. राजसि. 'Rulest over' This is Sāyaṇa's own way of taking the word in i, 36, 12; त्वं वाजस्य श्रुत्यस्य राजसि, where he explains it by ईश्वरो भवसि.

2. सः ( = स त्वं ) See Whitney, para. 498.

3. यामनि. 'On thy way.' The vision of verse 18 is continued. Compare Sāyaṇa's note on i, 181, 7 : यामन्नयाम-ञ्छृणुतं हवं मे ( where यामन् and अयामन् are Vedic locatives ). The note is यामन् गमने अयामन् अगमने च हवमाह्वानं शृणुतम्.

Verse 21

*Padapāṭha :*

उत् उत्ऽतमम् मुमुग्धि नः वि पाशम् मध्यमम् चृत ।
अव अधमानि जीवसे ॥ २१

*Sāyaṇa :*

नोऽस्माकमुत्तमं शिरोगतं पाशमुन्मुमुग्धि उत्कृष्य मोचय । मध्यमन्नुदरगतं पाशं वि चृत वियुज्य नाशय । जीवसे जीवितुमधमानि मदीयान्पादगतान्पाशानव चृत अवकृष्य नाशय । उत्तमम् । उत्छादिषु पाठादन्तोदात्तत्वम् । मुमुग्धि । मुच्लृ मोक्षणे बहुलं छन्दसीति विकरणस्य श्लुः । द्विर्भावः । हलादिशेषः । हुझल्भ्यो हेर्धिः ( Pāṇ. vi, 4, 101 ) इति हेर्धिरादेशः । तिङ्ङतिङ इति निघातः । चृत । चृती हिंसाग्रन्थनयोः । लोटो हिः । तुदादिभ्यः । शः । हेरिति हेर्लुक् । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः ( Pāṇ. iii, 4, 9 ) । प्रत्ययस्वरः ॥

*Note :*

जीवसे. A Vedic infinitive. 'In the older language, a very considerable number of derivative abstract nouns— only in a few sporadic instances having anything to do with the tense-systems— are used in an infinitive or quasi-infinitive sense ; most often in the dative case, but sometimes also in the accusative, in the genitive and ablative, and ( very rarely ) in the locative. In the classical Sanskrit there remains a single infinitive, of accusative case-form, having nothing to do with the tense-systems. ··· The infinitive in 'ase' is made in Ṛgveda from about twenty-five roots.'[1] (Whitney, paras. 538 and 973.)

The Vedic infinitive in 'ase' is the exact parallel of the Latin infinitive in are, the *r* in which is a mere euphonic change for *s* between two vowels of the same character as that, for example, in genus, gen, generis.

---

[1] M's V. G. S. para 167, 1 b 1 (p. 192) ; App. III 14 a (p. 463).

## No. 3

*Maṇḍala* I *Sūkta* 115

*Sāyaṇa* :

चित्रमिति वहृचं दशमं सूक्तं कुत्सस्यार्षं त्रैष्टुभं सूर्यदेवताकम्[1] । तथा चानुक्रान्तम् । चित्रं षट् सौर्यमिति । आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि । तत्रेदं सूक्तं शंसनीयम् । सूत्रितं च । चित्रं देवानां नमो मित्रस्येति (Āśval. vi, 5) । आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाशहविषां क्रमेणानुवाक्याः । ततो द्वे वपापुरोडाशयोर्याज्ये । तथा च सूत्रितम् । चित्रं देवानामुदगादनीकमिति पञ्च शं नो भव चक्षसा शं नो अह्ना इति ( Āśval. iii, 8 ) । अतिमूर्तिनाम्न्येकाहे शुनासीर्ये पर्वणि च सूर्यस्य हविषश्चित्रं देवानामित्येषा याज्या । सूत्रितं च तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्या ( Āśval. ix, 8 ) इति ॥

### Verse 1

*Padapāṭha* :

चित्रम् देवानाम् उत् अगात् अनीकम् चक्षुः मित्रस्य वरुणस्य अग्नेः । आ अप्राः द्यावापृथिवी इति अन्तरिक्षम् सूर्यः आत्मा जगतः तस्थुषः च ॥ १

*Sāyaṇa* :

देवानाम् । दीव्यन्तीति देवा रश्मयः । तेषां देवजनानामेव वा । अनीकं तेजःसमूहरूपं चित्रमाश्चर्यकरं सूर्यस्य मण्डलमुदगात् । उदयाचलं प्राप्तमासीत । कीदृशम् । मित्रस्य वरुणस्याग्नेश्च । उपलक्षणमेतत् । तदुपलक्षितानां जगतां चक्षुःप्रकाशकं चक्षुरिन्द्रियस्थानीयं वा । उदयं प्राप्य च द्यावापृथिवी दिवं पृथिवीमन्तरिक्षं च आ अप्राः स्वकीयेन तेजसा आ समन्तादपूरयत् । ईदृग्भूतमण्डलान्तर्वर्ती सूर्योऽन्तर्यामितया सर्वस्य प्रेरकः परमात्मा जगतो जङ्गमस्य तस्थुषः स्थावरस्य चात्मा स्वरूपभूतः । स हि सर्वस्य स्थावरजङ्गमात्मकस्य कार्यवर्गस्य कारणम् । कारणाच्च कार्यं नातिरिच्यते । तथा च पारमर्षं सूत्रम् । तदनन्यत्वमारम्भणशब्दादिभ्यः ( Brahma Sūtra II, i, 14 ) इति । यद्वा स्थावरजङ्गमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा । उदिते हि सूर्ये मृतप्रायं सर्वं जगत्पुनश्चेतनयुक्तं सदुपलभ्यते । तथा च श्रूयते । योसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेतीति ( T. Ār. i, 14, 1. ) । आप्राः । प्रा पूरणे । लङि पुरुषव्यत्ययः । अदादित्वाच्छपो लुक् ।

---

[1] **Sūrya.** Avestan hvare, Gr. Helios, Lat. Sol. See M's V. M. § 14 Bloomfield's Rel. Ved., p. 153.

जगतः । गमेर्द्वे चेति[1] क्विप् द्विर्वचनं च । गमः क्वावित्यनुनासिकलोपः । तस्थुषः । तिष्ठतेर्लिटः क्वसुः । द्विर्वचने शर्पूर्वाः खयः । षष्ठ्यंकवचने वसोः संप्रसारणमिति संप्रसारणम् । आतो लोप इटि चेत्याकारलोपः । शासिवसीति षत्वम् ॥

*Notes :*

[ 1. अनीकम् Mouth ( अन् to breathe ), face. See Sāy. on i, 113, 19 : v, 2, 1 ; x, 7, 3. ]

2. अप्रा : 3rd singular aor. of प्रा. See Whitney, paras. 881 and 119.[2]

3. द्यावापृथिवी, See Whitney, para 1255. 'In the oldest language ( Ṛgveda ) copulative compounds such as appear later are quite rare, the class being chiefly represented by dual combinations of the names of divinities and other personages, and of personified natural objects. In these combinations, each name has regularly and usually the dual form, and its own accent ; but in the very rare instances ( only three occurrences out of more than 300 ) in which other cases than the nom-acc-voc. are formed, the final member only is inflected, &c.' द्यावा in the compound is a dual form.[3]

Verse 2

*Padapāṭha :*

सूर्यः देवीम् उषसम् रोचमानाम् मर्यः न योषाम् अभि एति पश्चात् । यत्र नरः देवऽयन्तः युगानि विऽतन्वते प्रति भद्राय भद्रम् ॥ २

*Sāyaṇa :*

सूर्यो देवीं दानादिगुणयुक्तां रोचमानां दीप्यमानामुषसं पश्चादभ्येति उषसः प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति । तत्र दृष्टान्तः । मर्यो[4] न योषाम् । यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं सततमनुगच्छति तद्वत् । यत्र । यस्यामुषसि जातायां देवयन्तो देवं द्योतमानं सूर्यं यष्टुमिच्छन्तो नरो यज्ञस्य नेतारो यजमानाः युगानि । युगशब्दः कालवाची । तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यन्ते यथा दर्शपूर्णमासाविति । अग्निहोत्रादीनि कर्माणि वितन्वते विस्तारयन्ति । यद्वा देवयन्तो देवयागार्थं धनमात्मन इच्छन्तो यजमानपुरुषा युगानि हलावयवभूतानि कर्षणाय वितन्वते प्रसारयन्ति । तामुषसमनुगच्छतीत्यर्थः । एवंविधं भद्रं कल्याणं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय स्तुम इति शेषः । यद्वा देवयन्तो देवकामा यजमाना युगानि युग्मानि भूत्वा पत्नीभिः सहिताः सन्तो भद्रं कल्याणमग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं प्रति प्रत्येकं यस्यामुषसि प्रवृत्तायां

[1] द्युतिगामिजुहोतीनां द्वे च Kāt. Vārt. 3 under Pān. iii, 2, 178.

[2] M's V. G. S. para 144, 5. [3] M's V. G. S. para. 186 A 1.

[4] =Eng. *Male.* [5] See Arnold's Vedic Metre p. 293.

वितन्वते विस्तारयन्ति । मर्यः । मृङ् प्राणत्यागे । छन्दसि निष्टर्क्येत्यादौ यत्प्रत्ययान्तो निपात्यते । यतोनाव इत्याद्युदात्तत्वम् ( Pāṇ. vi, 1, 213 )। युगानि । युजेः कर्मणि घञ् । युगशब्दः कालविशेषे रथाद्युपकरणे चेत्युञ्छादिषु पाठाद्गुणाभावोऽन्तोदात्तत्वं च ( Pāṇ, vi, i, 160 ) । वितन्वते । तनु विस्तारे । तनादिकृञ्भ्य उः । सहेति ( Pāṇ. ii, 1, 4 ) योगविभागात्तिङोपसर्गस्य समासे सति[1] समासस्येत्यन्तोदात्तत्वम् ( Pāṇ. vi, 1, 223 )॥

*Notes* :

The student may be asked to note that Sāyaṇa makes no pretence on his own behalf of being in a position to determine authoritatively the meaning and reference of the second line of this difficult verse. None of the interpretations which he suggests for consideration are at all satisfactory. In the first line the 'Sun follows after the shining dawn as a man follows after the maiden he loves.' It is a natural supposition that the next clause, introduced as it is by यत्र, indicates the goal of their common wandering. They go, he pursuing and she pursued, 'there where pious men add life to life, each new one happier than the one before,' that is, to highest heaven, where the righteous enjoy eternal happiness. So Roth in the Siebenzig Lieder, p. 55. He refers to ṚV, x, 119, 5 ; ix, 113, 10. Roth previously took युगानि here to mean yokes, comparing ṚV. x, 101, 3 and 4 युनक्त सीरा वि युगा तनुध्वम् and सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्. Sāyaṇa verse 3, हे सखायो यूयं सीरा सीराणि युनक्त युङ्ग्ध्वमनड्डुद्भिः सह ... तदर्थं युगा युगानि वि तनुध्वं विस्तारयध्वम् ; verse 4, कवयो मेधाविन ऋत्विजः सीरा सीराणि कर्षणसाधनानि युञ्जन्ति योजयन्ति युगा युगान्यपि पृथक् परस्परं वि तन्वते भिन्नप्रदेशानि कुर्वन्ति. See the correction under युग in the Supplement of St. Petersburg Dictionary. Benfey, Orient and Occident, iii, p. 151, refers यत्र to the house of the sacrificer in which this hymn is being sung. The sun hastens there ( to shine on that house ) 'where godfearing heroes continue their generations, one glorious after the other.' Grassmann takes युगानि वि तन्वते to mean unyoke, outspan. In his dictionary ( 1873 ) he asks if we are to supply सूर्याय to भद्राय. In his translation ( 1877 ) he accepts Roth's explanation of that phrase. Ludwig translates 'where pious men stretch out their generations happily ( भद्राय ) under the eye of the auspicious sun.' I have followed Roth,

[1] S. K.: 'स च छन्दस्येव '

though I do not quite understand how, he takes प्रति and I am disposed to give great weight to ṚV. x, 101, 3 and 4 as going far to fix the meaning of the phrase युगानि वितन्वते.

Verse 3

*Padapāṭha* :

भद्राः अश्वाः हरितः सूर्यस्य चित्राः एतऽग्वाः अनुऽमाद्यासः । नमस्यन्तः दिवः आ पृष्ठम् अस्थुः परि द्यावापृथिवी इति यन्ति सद्यः ॥ ३

*Sāyaṇa* :

भद्राः कल्याणाः । अश्वा एतग्वा इत्येतदुभयमश्वनाम तत्रैकं क्रियापरं योजनीयम् । अश्वास्तुरगा व्यापनशीला वा । हरितो हर्तारश्चित्रा विचित्रावयवा अनुमाद्यासोऽनुक्रमेण सर्वैः स्तुत्या मादनीयाः । एवंभूताः सूर्यस्यैतग्वा अश्वाः । यद्वा एतं गन्तव्यं मार्गं गन्तारोऽश्वाः । एतं शबलवर्णं नीलवर्णं वा प्राप्नुवन्तोऽश्वाः । नमस्यन्तोऽस्माभिर्नमस्यमानाः सन्तो दिवोऽन्तरिक्षस्य पृष्ठमुपरि प्रदेशं पूर्वभागलक्षणम् आ अस्थुः । आतिष्ठन्ति प्राप्नुवन्ति । यद्वा हरितो रसहरणशीला रश्मयो भद्रादिलक्षणविशिष्टा दिवः पृष्ठं नभःस्थलमातिष्ठन्ति । आस्थाय च द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेवैकेनाह्ना परि यन्ति परितो गच्छन्ति व्याप्नुवन्तीत्यर्थः । अश्वाः । अशू व्याप्तौ । अशिप्रुषीत्यादिना क्वन् । एतग्वाः इण् गतौ । असिहसीत्यादिना कर्मणि तन्प्रत्ययः । गमेर्डोणादिको भावे ड्वप्रत्ययः । एतमेतव्यं प्रति ग्वो गमनं येषां ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अनुमाद्यासः । मदि स्तुतौ । अस्माण्ण्यन्तादचो यत् । यतोऽनाव इत्याद्युदात्तत्वम् । नमस्यन्तः । नमोवरिव इति पूजार्थे क्यच् । व्यत्ययेन कर्मणि शतृप्रत्ययः । अस्थुः । तिष्ठतेश्छान्दसो वर्तमाने लुङ् । गातिस्थेति सिचो लुक् । आत इति झेर्जुस् ॥

*Notes* :

1. एतग्वाः. The word occurs only thrice in the Ṛgveda altogether, in all three cases as an epithet of the horses of the gods. On vii, 70, 2, Sāyaṇa simply paraphrases एतग्वा by अश्वौ. On viii, 70, 7, एतग्वा चित् he has एतवर्णाविवाश्वौ. As Sāyaṇa notes here, the word is given in the Nighaṇṭu as one of the twenty-six synonyms of अश्व and that is really all we know about it.

2. नमस्यन्तः Sāyaṇa's interpretation is impossible. Compare i, 127, 7, where नमस्यन्तः is an epithet of the Bhṛgus. Sāyaṇa नमस्कारोपलक्षितमुपस्थानं कुर्वन्तः ।

## Verse 4

*Padapāṭha :*

तत् सूर्यस्य देवऽत्वम् तत् महिऽत्वम् मध्या कर्तोः विऽततम् सम् जभार । यदा इत् अयुक्त हरितः सधऽस्थात् आत् रात्री वासः तनुते सिमस्मै ॥ ४

*Sāyaṇa :*

सूर्यस्य सर्वप्रेरकस्यादित्यस्य तद्देवत्वमीश्वरत्वं स्वातन्त्र्यमिति यावत् । महित्वं महत्त्वं माहात्म्यं च तदेव । तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यत्कर्तोः । कर्मनामैतत् । प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणो मध्या मध्ये अपरिसमाप्त एव तस्मिन्कर्मणि विततं विस्तीर्णं स्वकीयं रश्मिजालमस्तं गच्छन्सूर्यः सं जभार । अस्माल्लोकात्स्वात्मन्युपसंहरति । कर्मकरश्च प्रवृत्तमपरिसमाप्तमेव विसृजत्यस्तं यन्तं सूर्यं दृष्ट्वा । ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति । न कस्यापि । सूर्य एवेदृशं स्वातन्त्र्यं महिमानं चावगाहते । अपि च । इदित्यवधारणे । यदेत् यस्मिन्नेव काले हरितो रसहरणशीलान्स्वरश्मीन् हरिद्वर्णानश्वान्वा सधस्थात्सहस्थानादस्मात्पार्थिवाल्लोकादादयायुक्त । अन्यत्र संयुक्तान्करोति । यद्वा युजिः केवलोऽपि विपूर्वो द्रष्टव्यः । यदैवासौ स्वरश्मीनश्वान्वा सधस्थात् सह तिष्ठन्त्यस्मिन्निति सधस्थो रथः तस्माद्युक्त अमुञ्चत् । आदनन्तरमेव रात्री निशा वास आच्छादयितृ तमः सिमस्मै । सिमशब्दः सर्वशब्दपर्यायः सप्तम्यर्थे चतुर्थी । सर्वस्मिँल्लोके तनुते विस्तारयति । यद्वा वासो वासरमहः । तत्सर्वस्माल्लोकादपनीय रात्री तमस्तनुते । अत्र निरुक्तम् । तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदासावयुक्त हरणानादित्यरश्मीन्हरितोऽश्वानिति वा । अथ रात्री वासस्तनुते सिमस्मै वासरमहरवयुवती सर्वस्मात् (Nirukta iv, 11) इति । महित्वम् । मह पूजायाम् । औणादिक इन्प्रत्ययः । तस्य भावस्त्वतलौ (Pāṇ. v, 1, 119) । मध्या । मध्यशब्दात्सप्तम्येकवचनस्य सुपां सुलुगिति डादेशः । कर्तोः करोतेरौणादिकस्तुन्प्रत्ययः । विततम् । विपूर्वात्तनोतेः कर्मणि निष्ठा । उदित्त्वेन क्त्वाप्रत्यये इटो विकल्पनाद्यस्य विभाषेतीट्प्रतिषेधः । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् । जभार । हृग्रहोर्भः इति भत्वम् । अयुक्त युजेर्लुङि झलो झलीति सिचो लोपः । सधस्थात् घञर्थे कविधानमित्यधिकरणे कप्रत्ययः । सधमादस्थयोश्छन्दसीति सधादेशः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् । रात्री रात्रेश्चाजसाविति ङीप् ॥

*Notes :*

1. मध्या कर्तोः 'In the very making, while the act is proceeding.' 'मध्या probably an adverbial instr. fem. frcm मध्य ; as preposition : *in the midst of* ( gen. )- कर्तोः ii, 38, 4 ; i, 115,

4 ; गन्तोः i, 89, 9 ( in mid-course ); as adverb : between ( ?) x, 61., 6 ( मध्या यत्कर्त्वमभवदभीके ). '— Grassmann. For the form of the termination compare Whitney, para, 363 d : · · · ' in the Veda the instrumental ending आ very often ( in nearly half the occurrences ) blends with the final of the stem to आ. ' कर्तोः[1] is the genitive of the verbal noun in तु, which yields the infinitive of the classical language, कर्तुम्.[2]

2. Sāyaṇa's dilemma here is obvious. His desperate suggestion that अयुक्त may here be equal to अमुश्चत् can be compared only with his explanation of विसीमहि in i, 25, 3, as meaning विशेषेण बध्नीमः. In the quotation from the Nirukta we have an old attempt to explain a difficult verse, which must be treated with more deference.

The *crux* is in the word विततं. What is that outstretched thing to roll which together is the glory of the sun ? The explanation seems to me to be furnished by the poet himself in the word तनुते of the same verse. Verse 4 is not, I think, as has been suggested, a description of the evening, with which we have nothing to do in the hymn. The three verses ( 3, 4, and 5 ) are a connected description of the sunrise. In verse 3 we are told that so soon as the horses ( rays ) of the sun begin their task, they in a moment reach to the end of earth and heaven. Verses 4 and 5 are to be taken together. I would translate ' This is the godhead, this is the greatness of the sun; while it was yet forming, he has rolled away the web of darkness : when he yoked his horses from their stall, night is still spreading darkness over all : then in the sight of Mitra and of Varuṇa, the sun spread his glory through the vault of Heaven. '

But the verse is usually taken very differently. In particular all the authorities accept Sāyaṇa's explanation of अयुक्त. I give the translation in the Siebenzig Lieder. ' This is the divine strength, the might of Sūrya : labour, though only half-done, comes to a stop, so soon as he loosens his horses from his car ; and night covers all with her veil. ' Roth compares ii, 38, 4 पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः. He explains that verse as referring to the way in which work of all kind is laid aside so soon as the sun reaches the west. Grassmann follows Roth. Ludwig doubts whether विततं can mean labour, and prefers to refer that word to महित्वं. ' This is

---

[1] **M's V. G. S. p 77, L's N. I. V. p. 350.** [2] **M's. V. G. S. p. 257.**

Sūrya's godhead, this his greatness : but that widespread greatness he has, after bringing it into our midst, again rolled together. ' Ludwig therefore refers मध्या कर्तोः to Sūrya. But this is not, as Ludwig contends it is, Sāyaṇa's way of taking the clause. Sāyaṇa clearly refers मध्या कर्तोः to the works of men ; and his word कर्मकरश्च ...... हृष्ट्वा are part of the explanation of the passage, not, as Ludwig urges, a mere illustration.

[ For the mg. of सधस्थ in Pāda 3, Geldner quotes अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः ( vii, 60, 3 ) ; and the pāda, he says, must clearly refer to the morning, and सधस्थ must mean not रथ here, but अश्वस्थान.

As regards pāda 2, there is the parallel passage already cited, ii, 38, 4, which he would translate:— ' The female weaver ( *i. e.*, the Night ) has rolled up again the spread out ( woof ) ; in the midst of her work, the wise one ( सवितृ ) has set aside her work. ' The spread-out thing is the web of darkness. समव्यत् corresponds to संजभार and the subject of संजभार also is रात्री.

सिम is explained to mean सर्व by Yāska and sometimes by Sāyaṇa also. But other Indian authorities explain it to mean श्रेष्ठ and Sāyaṇa often accepts that. For the correct sense of सिम Geldner compares this and the following passages:— i, 95, 7 ; i, 102, 6 ; i, 145, 2 ; viii, 4, 1 ; x, 28, 11 ( सिम उक्षणोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः । where सिम and स्वयम् are parallel ). He thinks that सिम means one's self, is declined like a pron. and is, like आत्मन्, used in the masc. and in the sing. only. He would, therefore, translate this verse as follows:— ' That is the godhead, that the might of Sūrya : in the midst of her work she rolled up the spread out web, so soon as he yoked the bays from the stall. And the Night works the veil for herself. ' That is Rātrī spins by night a web of darkness over the world, and in the morning she covers herself with it and disappears. ( Ved. St. ii, 188-9. ) ]

Verse 5

*Padapāṭha* :

तत् मित्रस्य वरुणस्य अभिऽचक्षे सूर्यः रूपम् कृणुते द्योः उपऽस्थे । अनन्तम् अन्यत् रुशत् अस्य पाजः कृष्णम् अन्यत् हरितः सम् भरन्ति ॥ ५

*Sāyaṇa* :

तत्तदानीमुदयसमये मित्रस्य वरुणस्य एतदुभयोपलक्षितस्य सर्वस्य जगतो अभिचक्षे आभिमुख्येन प्रकाशनाय द्योर्नभस उपस्थे उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते करोति । अपि च । अस्य सूर्यस्य हरितो रसहरणशीला रश्मयो हरिद्वर्णा अश्वा वा अनन्तमवसानरहितं कृत्स्नस्य जगतो व्यापकं रुशद्दीप्यमानं श्वेतवर्णं पाजः । बलनामैतत् । बलयुक्तम् अतिबलस्यापि नैशस्य तमसो निवारणे समर्थम् अन्यत्तमसो विलक्षणं तेजः स भरन्ति अहनि स्वकीयागमनेन निष्पादयन्ति । तथा कृष्णं कृष्णवर्णमन्यत्तमः स्वकीयापगमनेन रात्रौ अस्य रश्मयोऽप्येवं कुर्वन्ति । किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः । अभिचक्षे । संपदादिलक्षणो भावे क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । द्योः । ङसिङसोश्चेति ( Pāṇ. vi, 1, 110 ) पूर्वरूपता । उपस्थे । घञर्थे कविधानमिति कप्रत्ययः । मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । पाजः । पाति रक्षतीति पाजो बलम् । पातेर्बले जुट् चेत्यसुन् जुडागमश्च (Uṇ. iv, 202) । छान्दसो मत्वर्थीयस्य विनो लोपः ॥

*Notes* :

1. मित्रस्य वरुणस्याभिचक्षे. 'For Mitra and Varuṇa to see, for the seeing of— on the part of— Mitra and Varuṇa.' अभिचक्षे is the dative of a verbal noun. See Whitney, para. 970 a[1]

2. The second line seems to refer to the endless succession of day and night. Compare the translation in the Siebenzig Lieder.

> ' In ewiger Folge führen seine Rosse
> bald lichte Tageshelle, bald das Dunkel.

In endless succession his horses bring, now the clear daylight, now the darkness.'

Verse 6

*Padapāṭha :*

**अद्य देवाः उतऽइता सूर्यस्य निः अंहसः पिपृत निः अवद्यात् । तत् नः मित्रः वरुणः ममहन्ताम् अदितिः सिन्धुः पृथिवी उत द्यौः ॥ ६**

*Sāyaṇa* :

हे देवा द्योतमानाः सूर्यरश्मयः अद्य अस्मिन्काले सूर्यस्यादित्यस्योदिता उदितौ उदये सति इतस्ततः प्रसरन्तो यूयमस्मानंहसः पापान्निष्पिपृत निष्कृष्य पालयत ।

[1] M's V. G. S. para 167, 1a.

यदिदमस्माभिरुक्तं नोस्मदीयं तन्मित्रादयः षट् देवता ममहन्तां पूजयन्तु अनुमन्यन्ताम् । रक्षन्त्विति यावत् । मित्रः प्रमीतेस्त्रायकोहरभिमानी देवः । वरुणोऽनिष्टानां निवारयिता रात्र्यभिमानी । अदिति[1]रखण्डनीया अदीना वा देवमाता । सिन्धुः[2] स्यन्दनशीलोदकाभिमानिनी देवता । पृथिवी भूलोकस्याधिष्ठात्री । द्यौः[3] द्युलोकस्य । उतशब्दः समुच्चये । निपातस्य चेति संहितायां दीर्घत्वम् ( Pāṇ. vi, 3, 136 ) । उदिता । उत्पूर्वाद्देतेर्भावे क्तिन् । सुपां सुलुगिति[4] डादेशः । तादौ च्चेति गतेः प्रकृतिस्वरत्वम् ( Pāṇ. vi, 2, 50 ) । पिपृतां पृ पालनपूरणयोः । पृ इत्येके । लोटि जुहोत्यादित्वाच्छपः श्लुः । द्विर्वचनोरदत्वहलादिशेषाः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वम् । सार्वधातुकमपिदिति तङ्शब्दस्य ङित्त्वे सति ऋचि तुनुघेत्यादिना संहितायां दीर्घः ( Pāṇ. vi 3, 133 ) ॥

*Notes :*

1. उदिता. A vedic locative. See Whitney, para 336 f.[5]

2. निरंहसः पिपृता निरवद्यात्. 'Free us from danger, free us from shame.' For this use of the verbal prefix, see Whitney, para, 1081 a. An older form of अंहः is seen in the Greek *ayχos*, the Latin angustiæ, the German eng. It means straits. पिपृत ( lengthened to पिपृता in the Saṁhitā text ) 'make us to cross over, ferry us across,' to use the English form of the root. Perhaps the earliest recorded expression of a thought which has never died out of the religious consciousness of India.

## No. 4

*Maṇḍala* I *Sūkta* 143

*Sāyaṇa :*

प्र तव्यसीमित्यष्टर्चं चतुर्थं सूक्तं दैर्घतमसम् । तथा चानुक्रान्तम् । प्रतव्यसीमष्टावाग्नेयं तु तत्त्रिष्टुबन्तामिति । तु तदित्युक्तत्वादिदमादिसूक्ताष्टकस्याग्निर्देवता । अन्त्या त्रिष्टुप् । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो

1 For Aditi and Diti see Muir's S. T. Vol. V. sec. III ; Macdonell's V. M. pp. 120-23. For the etymology of the name Aditi see ibid. p. 121 and for a different view, Bloomfield's Rel. Ved. p. 131.

2 See M. and K's Vedic Ind. Vol. II. *sub voce.* ( p. 450 ).

3 Skt. Dyaus = Gr. Zeus = Teut. Tin = Celt. Duw.

4 सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः : Pāṇ. vii, 1, 39 ).

5 M's. V. G. S. para 98 B. p. 81 note 2; L,s N. I. V. p. 385.

विनियोगः । अग्निष्टोमे आग्निमारुते शस्त्र इदं सूक्तं जातवेदस्यनिविद्धानीयम् । अथ यथेमनिति खण्डे सूत्रितम् । प्र तव्यसीं नव्यसीमापो हि ष्ठेति तिस्र इति ( Aśval. v., 20 ) । दशरात्रस्य प्रथमेऽप्यहनि जातवेदस्यनिविद्धानम् आश्वमेधिके मध्यमेऽहनि च निविद्धानम् । तथा चाचार्यातिदेश ऐकाहिकान्युपसंशस्य तेषु निविदो दध्यादेवमेवाग्निमारुत इति ( Aśval. x., 10 ) ।

[ *Note*:— Translated in 'Vedic Hymns,' Part ii. ( Sacred Books of the East. ) ][1]

Verse 1

*Padapāṭha :*

**प्र तव्यंसीम् नव्यंसीम् धीतिम् अग्नये॑ वाचः मतिम् सहंसः सूनवे॑ भरे । अपाम् नपा॑त् यः वसुंऽभिः सह प्रियः होता॑ पृथिव्याम् नि असी॑दत् ऋत्वियः॑ ॥ १**

*Sāyaṇa :*

अहमग्नये[2] तव्यसीं तवीयसीम् अतिशयेन वर्धयित्रीम् । तवतिर्वृद्ध्यर्थः सौत्रो धातुः । अस्मात्तृजन्तात्तुश्छन्दसीतीयसुन् । तुरिष्ठेमेयःस्विति तृलोपः ( Pāṇ. vi, 4, 154) । छान्दस ईकारलोपः । नव्यसीं नवतरामपूर्वां धीतिं यागलक्षणामुक्तगुणकं कर्म प्र भरे प्रकर्षेण करोमि । तथोक्तलक्षणां वाचो मतिं स्तुतिरूपं कर्म भर । कीदृशायाग्नये । सहसो बलस्य सूनवे पुत्राय । किंच । योऽग्निरपां नपात् तासां नप्ता । अद्भ्यः ओषधयः ओषधीभ्योऽग्निरित्यग्नेर्नप्तृत्वम् । अथवा अपां न पातयिता वैद्युताग्निरूपेण प्रवर्षकत्वादिति भावः । तथा प्रियो यजमानस्य प्रीणयिता प्रियतमो वा तस्य होता होमनिष्पादकः । सोऽग्निर्ऋत्वियः प्राप्तकालः प्राप्तप्रदानसमयः सन्पृथिव्यां वेदिलक्षणायां वसुभिर्निवासयोग्यैर्गवादिधनैः सहितो न्यसीदत् नितरां सीदति ॥

*Notes :*

[ 1. नव्यसीम् Mark the distinction made between hymns that are new and that are not so ].[3]

2. अपां नपात्. 'Son of the waters', probably referring to Agni's birth as lightning in the clouds. The word नप्तृ ( Lat. nepos, nepotis, Eng. nephew ) is not used in the veda for a

---

[1] Also by Kaegi, in Siebenzig Lieder des Ṛgveda.

[2] Agni. Skt. Agni = Latin Ignis. Luthuanian Ugnis. Old Slavic Ogni. For characteristics and functions of the god, see Muir's S.T. sec. XIII a. Macdonell's V. M. § 35, pp. 88-100.

[3] Macdonell's H. S. L. p. 45.

grandson only, as it is in later Sanskrit. Sāyaṇa's genealogy of Agni is out of place. नपात्=पुत्र Sāy. on vi, 55, 1 ( No. 15 ). ][1]

3. वसुभिः सह. 'With the Vasus; accompanied by the Vasus', construing with न्यसीदत्, and taking the next word प्रियः to be a general epithet of Agni. In the Siebenzig Lieder., p. 100, the three words वसुभिः सह प्रियः are taken together in the sense of 'the darling of the Vasus.' 'Dwelling as a beloved companion with the gods, or gladly dwelling with the gods.'—Roth's note. By the Vasus here and in verse 6 are meant the gods in general.

Verse 2

*Padapāṭha :*

सः जायमानः परमे विऽओमनि आविः अग्निः अभवत् मातरिश्वने । अस्य क्रत्वा संऽइधानस्य मज्मना प्र द्यावा शोचिः पृथिवी इति अरोचयत् ॥ २

*Sāyaṇa :*

स पूर्वोक्तोऽग्निर्जायमानः अरणीभ्यामुत्पद्यमानः काष्ठेषु वा प्रादुर्भूतः सन् तदानीमेव परमे उत्कृष्टे व्योमनि विविधरक्षणवति वेदिदेशे मातरिश्वने अन्तरिक्षसंचारिणे वायवे प्रथममाविरभवत्प्रत्यक्षोऽभूत् । त्वमग्ने प्रथमो मातरिश्वन आविर्भवेत्यादिश्रुत्यन्तरप्रसिद्धेः ( RV. i, 31, 3. ) । वायुसंयोगात्प्रज्वलित इत्यर्थः । अथवा मातरि फलस्य निर्मातरि यज्ञे श्वसिति चेष्टते इति मातरिश्वा यजमानः तदर्थम् । किंच समिधानस्य इन्धनैः सम्यग्वर्धमानस्याग्नेर्मज्मना । बलनामैतत् । बलवता क्रत्वा क्रतुना कर्मणा ज्वालनादिव्यापारेण शोचिः द्यावा पृथिवी द्यां च पृथिवीं च प्रारोचयत्प्रकर्षेणादीपयत् । मध्ये शोचिःशब्दश्छान्दसः । मज्मना क्रत्वा समिधानस्येति वा योज्यम् । प्रबलेन समिन्धनादिव्यापारेण समिध्यमानस्येत्यर्थः ॥

*Notes :*

[ 1. परमे व्योमनि. Sāyaṇa's explanation is absurd. ][2]

2. 'The explanation of Mātariśvan as Vāyu' ( which is given by Yāska ) 'cannot be justified by the Vedic texts, and rests only upon the etymology of the root श्वस्. The numerous passages, where the word is mentioned in the Ṛgveda, exhibit it in two senses. Sometimes it denotes Agni himself, as in

[1] For Apām napāt see M's Vedic Mythology pp. 61–70, 92 and Vedic Hymns Part II ( S. B. E. ), p. 158 note 2. Apām napāt–a deity ( fravashi ) of the Persian-Cappadocian Calendar: See Moulton's Early Zoroastrianism, pp. 104, 435. [2] See Macdonell's V. M. pp. 92–93.

the texts i, 96, 3, 4; iii, 29, 4 ( 11? ); x, 114, 1, &c,; at other times, the being who, as another Prometheus, fetches down from heaven, from the gods, the fire which had vanished from the earth, and brings it to the Bhṛgus, i, 60, 1; i, 93, 6; iii, 2, 13; iii, 5, 10; iii, 9, 5. To think of this bringer of fire as a man, as a sage of antiquity, who had laid hold of the lightning and placed it on the altar and the hearth, is forbidden by those texts which speak of him as bringing it from heaven, not to mention other grounds. As Prometheus belongs to the superhuman class of Titans, and is only by this means enabled to fetch down the spark from heaven, so must Mātariśvan be reckoned as belonging to those races of demi-gods who, in the Vedic legends, are sometimes represented as living in the society of the gods, and sometimes as dwelling upon earth. As he brings the fire to the Bhṛgus, it is said of these last, that they have communicated fire to men ( *e. g.*, in i, 58, 6, ) and Agni is called the son of Bhṛgu ( Bhṛgavāṇa ). Mātariśvan also must be reckoned as belonging to this half-divine race.' ... 'It may also be mentioned that the same function of bringing down fire is ascribed in one text ( vi, 16, 13 ) to Atharvan, whose name is connected with fire, like that of Mātariśvan; and also that the sisters of Atharvan are called Mātariśvarīs in x, 120, 9.' Roth, Illustrations of the Nirukta, p. 112: translated by Muir, Sanskrit Texts v, p. 205.[1]

3. क्रत्वा A Vedic instrumental. Whitney, paras. 336 [ c and 342 c. ].[2]

4. मज्मना. A noun in the instrumental used adverbially. The word does not occur in any other case.

5. प्र द्यावा शोचिः पृथिवी अरोचयत. We have already seen that devatādvandvas, as they are called, which are the only dvandvas of any frequency in the Ṛgveda, attach the termination of the dual to each member of the compound, and have a double accent. The present example shows that the two names are felt to be so loosely compounded that they may even be separated by another word.[3]

---

[1] Macdonell's Vedic Mythology pp. 71–72, 92. M. and K's Ved. Ind. ( Vol. II p. 149 ) *sub voce*; Bloomfield's Rel. Ved. pp. 165, 210, 218.

[2] M's V. G. S. p. 80, note 3; L's N. I. V. p. 404. Sk. kratu = Av. khratu ( from √ kar )-wisdom ( Jackson's A. V. Reader ).

[3] M's V. S. para 186 A 1, ( p. 269 ).

## Verse 3[1]

*Padapāṭha :*

**अस्य त्वेषाः अजराः अस्य भानवः सुऽसंदृशः सुऽप्रतीकस्य सुऽद्युतः भाऽत्वक्षसः अति अक्तुः न सिन्धवः अग्नेः रेजन्ते असंसन्तः अजराः ॥ ३**

*Sāyaṇa :*

अस्य स्तूयमानस्याग्नेः त्वेषा दीप्तयः अजरा जरारहिता अजीर्णाः अविरता इत्यर्थः । नञो जरमरेत्यादिनोत्तरपदाद्युदात्तत्वम् । तथा सुप्रतीकस्य शोभनमुखस्यास्याग्नेर्भानवो रश्मयः दीप्तेरुक्तत्वादत्र विस्फुलिङ्गा अवगन्तव्याः । ते च सुसंदृशः सुष्ठु सम्यग्द्रष्टारः सर्वतो व्याप्ता इत्यर्थः । सुद्युतः सुष्ठु सर्वतो द्योतमानाः । तथा अस्याग्नेर्भात्वक्षसः । त्वक्ष इति बलनाम त्वक्षः शर्ध इति बलनामसु पाठात् । भासमानबलाः । अक्तुरिति रात्रिनामैतत् । अक्तरूर्म्येति तन्नामसूक्तत्वात् । द्वितीयार्थे प्रथमा । अक्तुं जगदञ्जकं नैशं तमः अति अतिक्रम्य सिन्धवः स्यन्दमाना सर्वत्र व्याप्नुवन्तः असंसन्तः स्वव्यापारेष्वस्वपन्तः अतिरताः अत एवाजरा न रेजन्ते न कम्पन्ते दाहपाकादिषु न चलन्ति न चाल्यन्ते वान्यैः । यद्वा नशब्दो दृष्टान्तवचनः[2] भात्वक्षसो भा एव त्वक्षो बलं यस्य तादृशस्यादित्यस्य सिन्धवो न रश्मय इव । ते यथा स्यन्दनशीला व्याप्तिमन्तः अक्तुरिति अञ्जकं तमोऽतिक्रम्य असंसन्तो रेजन्ते तद्वद्भात्वक्षसोऽस्याग्नेरुक्तलक्षणा दीप्तयोऽपि सर्वत्र रेजन्ते कम्पन्ते व्याप्नुवन्तीत्यर्थः ॥

*Notes :*

1. Sāyaṇa takes त्वेषाः in the sense of दीप्तयः, and construes अस्य त्वेषा अजराः as a clause by itself. भानवः is according to Sāyaṇa, the subject of the next clause; सुसंदृशः and सुद्युतः are nominative plurals agreeing with भानवः and forming the predicate of the clause; सुप्रतीकस्य is in construction with अस्य. The true construction must be doubtful, but the repetition of अजराः in the second line of the verse makes it probable that that word is the subject in both of the clauses in which it here occurs.

For this meaning of the word used as a noun in the masculine Roth quotes three passages, ii, 8, 4 आ यः स्वर्ण भानुना चित्रो विभात्यर्चिषा । अञ्जानो अजरैरभि. Sāyaṇa, योऽग्निश्चित्रश्चायनीयो नानावर्णो वा अर्चिषा ज्वालया रश्मिसमूहेन आ विभाति सर्वतो भासते । तत्र दृष्टान्तः । स्वर्भानुना किरणेन सूर्य इव । स यथा विभाति तद्वत् । किं कुर्वन् । अजरैर्नित्यैर्ज्वालासमूहैः अभि सर्वतः अञ्जानो व्यञ्जयन्. iii, 18, 2 वि ते तिष्ठन्तामजरा अयासः ( there is no word in the context with which अजराः can agree as an adjective ). Sāyaṇa, ते तव रश्मयोऽजरा जरारहिताः प्रतिबन्धरहिताः

---

[1] "There is no sufficient reason for transposing verses 3 and 4, ( Kaegi ) " Oldenberg–Vedic Hymns Pt. II. ( S. B. E. ).

[2] See M's V. G. S. p. 256.

अत एव अयासः सर्वत्रगमनस्वभावाः सन्तः वि तिष्ठन्तां विशेषेण तिष्ठन्तु. vii, 3, 3 उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः. Sāyaṇa हे अग्ने नवजातस्य नवप्रादुर्भावस्य वृष्णो वर्षितुः यस्य ते तव अजरा जरारहिता ज्वाला इधाना उच्चरन्ति उद्गच्छन्ति.

The Fire-god is ever young, and his अजराः are his ageless flames. त्वेषाः is 'impetuous, swift-rushing.' Compare, for example, रथो न रुक्मी त्वेषः समत्सु i, 66, 3, where Sāyaṇa's note is रथो न रथ इव रुक्मी सुवर्णवद्रोचमानदीप्तियुक्तः समत्सु संग्रामेषु त्वेषो दीप्तः If we construe, as the metre suggests, अस्य त्वेषाः अजरा अस्य भानवः as a phrase by itself ( with त्वेषाः as the common epithet of अजराः and भानवः ), the three remaining words in the first line सुसंदृशः सुप्रतीकस्य सद्युतः are best taken, as their relative position suggests, as three genitives in construction with अस्य. This I understand to be the way in which Roth takes the line, S. L., p. 108. Grassmann in his dictionary takes all three words त्वेषाः, अजराः and सुसंदृशः with भानवः ( in spite of the repeated अस्य ). In his translation he gives 'Agni's beams, his vigorous troop of flames' ( nom. to रेजन्ते ), and takes सुसंदृशः, सुप्रतीकस्य, सुद्युतः as three genitives. Ludwig translates 'His ageless flames, his fair light' ( with रेजन्ते ) and takes सुप्रतीकस्य सुद्युतः with अस्य. In his commentary he suggests that the two words त्वेषा अजराः are to be taken as the predicate of their clause.

To explain the second line Sāyaṇa, *inter alia*, takes refuge in the absurdity that the nominative perhaps stands here for the accusative. We can avoid such an outrage on grammar, but may hardly hope to apprehend the meaning of the line. भात्वक्षसः occurs only here. Roth takes it as a genitive, and apparently ( dictionary under अति ) takes it with सिन्धवः. That form he explains as an anomalous genitive ( सिन्धवः = सिन्द्वः = सिन्धोः ). He takes अति to be a preposition governing the genitive in the sense of over,[1] on the surface of. The translation

[1] Roth cites two passages for this meaning and use of अति i, 141, 13, अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः. Sāyaṇa. मिहं मेहनशीलं मेघं यथा सूर सूर्यो वृष्ट्यर्थं शब्दयति तद्वत् Roth apparently took सूरः as the genitive of स्वर्. But subsequently he cites our passage, under सूरः, returning to Sāyaṇa's explanation of the word. In the other passage note that Sāyaṇa explains अति as he does here: प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा x, 75. 1. Sāyaṇa, ता नद्यः सप्तसप्त भूत्वा त्रेधा पृथिव्यामन्तरिक्षे दिवि चेति त्रेधा त्रिप्रकारं चक्रमुः प्रावहन् । सृत्वरीणामासां मध्ये सिन्धुरेतन्नामिका नदी ओजसा स्वबलेन अति सर्वा अपि नदीरतिक्रम्य प्रवहतीति शेषः.

according to the Siebenzig Lieder is 'Like the shimmer which floats on the surface of the stream.'

Grassmann follows Sāyaṇa in taking भात्वक्षसः and सिन्धवः as nominative plurals. अति he takes as an adverb with रेजन्ते. For सिन्धवः in the sense of streams of light he instances i, 52, 14, सिन्धवो रजसः as a somewhat similar metaphor. He translates then 'The flame-streams shine like the daylight, full of light, never slumbering, ever young.' Ludwig takes भात्वक्षसः with अग्नेः 'who has light for his strength,' and takes अत्यक्तुः to mean 'all night through.' अजराः he takes in both places as an adjective, but he would get over the apparent tautology by changing the second अजराः to अमराः. He rejects Roth's explanation of सिन्धवः and believes the meaning of the whole passage to be that Agni resembles the rivers in that, like them, he is in constant motion day and night.

['Probably we should read अत्यक्तून्; comp. vi, 4, 5, अत्येत्यक्तून्.' So Oldenberg, who translates the present verse as follows:— His flames are fierce; never aging are the flames of him who is beautiful to behold, whose face is beautiful, whose splendour is beautiful. The never sleeping, never aging (rays) of Agni whose power is light, roll forward like streams across the nights (?). ]

2. असस्नन्तः. Occurs only here. The root सस् (स्वप्) is given in the Nighaṇṭu, iii, 22; and the forms सस्तु, ससन्तु, ससन्त, ससती occur (Roth.)

## Verse 4

*Padapāṭha* :

यम् आऽईरिरे भृगवः विश्वऽवेदसम् नाभा पृथिव्याः भुवनस्य मज्मना। अग्निम् तम् गीःऽभिः हिनुहि स्वे आ दमे यः एकः वस्वः वरुणः न राजति ॥ ४

*Sāyaṇa* :

विश्ववेदसं सर्वधनम् । वेद इति धननाम । वेदो वरिव इति तन्नामसु पाठात् । तादृशं यमग्निं भृगवः भृगुगोत्रोत्पन्नाः पापस्य भर्जकाः पृथिव्या वेद्याः । एकदेशे कृत्स्नशब्दः । यद्वा एतावती वै पृथिवीत्यादिश्रुते ( Ś. Br. ) वेद्याः पृथिवीत्वम् । तस्या नाभौ उत्तरवेद्यां भुवनस्य भूतजातस्य मज्मना बलेन निमित्तेन आ आभिमुख्येन ईरिरे ईरितवन्तः स्थापितवन्तः । तमग्निं स्वे स्वकीये दमे गृहे उत्तरवेद्यां

गीर्भिः स्तुतिभिः आ हिनुहि प्राप्नुहि । हि गतौ वृद्धौ च । उतश्च प्रत्ययाच्छन्दासि वावचनमिति[1] हेर्लुगभावः । योऽग्निरेको मुख्यः सन् एक एव वा वस्वः वसुनो गवादिधनस्य राजति ईश्वरो भवति । प्रदातुमिति शेषः । राजतीत्यैश्वर्यकर्मा । क्षियति राजतीति तन्नामसु पाठात् । तत्र दृष्टान्तः । वरुणो न वारक आदित्य इव । स यथा सर्वस्येष्टे तद्वत् ॥

*Notes* :

1. विश्ववेदसम्. 'Omniscient.'[2] In his note on i, 147, 3, Sāyaṇa explains the word by विश्वप्रज्ञ. The word seems to mean विश्वधन or विश्वप्रज्ञ according to the context in which it stands.

2. नाभा A Vedic locative of the same kind as उदिता already noticed. [ 'Navel of the earth.' This expression appears to allude to the receptacle of the sacrificial Agni on the excavated altar or Vedi. That is technically called the नाभि. ]

3. हिनुहि. For the peculiarity which Sāyaṇa duly notes see Whitney, para 704. 'In the earliest language the rule as to the omission of 'hi' after a root with final vowel does not hold good ; in the Ṛgveda such forms as inuhi, kṛṇuhi, cinuhi, dhūnuhi, śṛṇuhi, spṛṇuhi hinuhi, tanuhi, and sunuhi are thrice as frequent in use, as inu, śṛṇu, sunu, tanu, and their like.'[3]

4. आ. 'In', to be construed with स्वे दमे, not as Sāyaṇa takes it with हिनुहि. Compare note 1 on No. 2, verse 15.

5. वस्वः A Vedic genitive. See Whitney, paras 336 [ e and 342 e ].[4]

Verse 5

*Padapāṭha* :

न यः वराय मरुताम्ऽइव स्वनः सेनाऽइव सृष्टा दिव्या यथा अशनिः । अग्निः जम्भैः तिगितैः अत्ति भर्वति योधः न शत्रून् सः वना नि ऋञ्जते ॥ ५

*Sāyaṇa* :

योऽग्निर्वराय वरणाय निग्रहाय शक्तो न भवति । तत्र दृष्टान्तत्रयमुच्यते । मरुतां स्वन इव । स यथाऽग्राह्यस्तद्वत् । तथा सृष्टा वैरिक्षयार्थे प्रबलेनातिसृष्टा सेनेव । सा

---

1 'उतश्च प्रत्ययाच्छन्दोवावचनम्'– Kāt. Vārt. 1 on Pāṇ. vi, 4, 106 ( Dr. Kielhorn's edition of Pat. MBh. ).

2 Sk. √ vid = Av. √ vid–to know. ( J's Av. R. ).

3 M's V. G. S. para 134 C 4 δ ( p. 146 ).

4 M's V. G. S. para 98 B, note 12 on p. 81; L's N-I. V. p. 411.

यथान्यैरनिरोध्या तद्वत् । तथा दिव्या दिवि भवा अशनिर्यथा पतत्येव न निवार्यते तद्वत् । ईदृक्सामर्थ्यमस्तीति दर्शयति । अयमग्निस्तिगितैः निशितैः तीक्ष्णीकृतैः । अन्त्यविकारश्छान्दसः । जम्भैः दन्तैः दन्तस्थानीयाभिर्ज्वालाभिः अत्ति अस्मद्विरोधिनो भक्षयति । तथा भर्वति हिनस्ति । भर्व हिंसायाम् । यास्कस्त्वाह भर्वतिरत्तिकर्मेति ( Nir. ix, 23 ) । यद्यप्यत्तिभर्वत्योरदनमेवार्थः तथापि तद्वान्तरभेदोवगन्तव्यः । तत्र दृष्टान्तः । योधो न[1] संप्रहर्ता शूर इव । स यथा शत्रून्भर्वति भक्षयति तद्वत् । किंच सोऽग्निः वनानि वृक्षादिसमूहान् न्यृञ्जते नितरां प्रसाधयति दहतीत्यर्थः । ऋञ्जतिः प्रसाधनकर्मेति यास्कः ॥[2]

*Notes :*

1. न यो वराय. 'Who cannot be hindered, who is not for hindering'. See Whitney, paras 287 and 282 c.

2. सेनेव सृष्टा. The same phrase occurs in i, 66, 7, सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका । यमो ह जातो &c. Sāyaṇa's note there is : सृष्टा प्रेरिता सेनेव स्वामिना सह वर्तमाना भटसंहतिरिव अयमग्निरमं शत्रूणां भयं दधाति विदधाति ... ... । अत्र निरुक्तम् । सेनेव सृष्टा भयं वा बलं वा दधत्यस्तुरिव दिद्युत्त्वेषप्रतीकेत्यादि ( Nirukta, x, 21 ). Roth believes that सेना in both passages means arrow, and cites also vii, 3, 4 ; i, 186, 9 ; अन्यं ते अस्मान्नि वपन्तु सेनाः ii, 33, 11; अबलाः v, 30, 9 ; viii, 64, 7 ; x, 23, 1, &c.

[ सेना never signifies an arrow. सेनेव सृष्टा means like an army sent forward in various directions. It is the Lat. exercitus effusus or agmen effusum.— Pischel, Ved. St. i, 231, note 2. Oldenberg agrees[3]. ]

3. [ न्यृञ्ज् = fall upon, attack. ]

## Verse 6

*Padapāṭha :*

कुवित् नः अग्निः उचथस्य वीः असत् वसुः कुवित् वसुऽभिः कामम् आऽवरत् । चोदः कुवित् तुतुज्यात् सातये धियः शुचिऽप्रतीकम् तम् अया धिया गृणे ॥ ६

*Sāyaṇa* :

अयमग्निर्नोऽस्माकमुचथस्य उक्थस्य स्तोत्रस्य कुवित् बहुवारं वीः कामयिता असत् भवतु । अस्तेर्लेटयडागमः । यद्वा । उचथस्य एतन्नामकस्य महर्षेर्गोत्रप्रभवस्य

---

[1] M's V. G. S. p. 236. [2] Nigh. iv, 3, 91 and Com.; Nir. vi, 21. प्रसाधनकर्मविषयस्य सभीकरणं प्रसाधनमात्मसात्करणम्–Com. on Nigh. iv, 3, 91.

[3] The opinion of Prof. von. Bradke and Prof. Bloomfield is different ( Vedic Hymns Pt. II, S. B. E. p. 159 ).

न इति संबन्धः । तथा वसुर्वासयिता सर्वेषां वसुस्थानीयो वा वसुभिर्वासयितृभिर्धनैः कामम् अत्यर्थमभिमतं वा कुवित् अतिप्रभूतम् आवरत् आवृणोतु । अभिमतप्रदानेन कामं निवर्तयत्वित्यर्थः । वृणोतेर्लेटयडागमः । छान्दसो विकरणस्य लुक् । अयमग्निश्चोदः अस्माकं कर्मसु प्रेरकः सन् धियः कर्माणि सातये लाभाय कुवित् बहु तुतुज्यात् त्वरयतु प्रेरयत्वित्यर्थः । तुजिः प्रेरणार्थः । छान्दसः शपः श्लुः । शुचिप्रतीकं शोभनावयवं शोभनज्वालं तमग्निम् अया धिया अनया स्तुतिरूपया प्रज्ञया गृणे उच्चारयामि स्तौमीत्यर्थः ॥

*Notes :*

1. कुवित्, An interrogative particle.[1]

2. वीः. This adjective occurs nowhere else.

3. असत्. Third pers. sing. subj. See Whitney, para. 562.[2] This is the usual construction with कुवित्, after which also the verb, as here, usually retains its accent.[3] Compare आवरत् in the next clause. तुतुज्यात् in the third clause, on the other hand, is an optative of the perfect stem.[4] See Whitney, para. 812 a.

4. अया. See Whitney, para. 502 b.[5]

Verse 7

*Padapāṭha* :

घृतऽप्रतीकम् वः ऋतस्य धूःऽसदम् अग्निम् मित्रम् न समऽइधानः ऋञ्जते । इन्धानः अक्रः विदथेषु दीद्यत् शुक्रऽवर्णाम् उत् ऊँ इति नः यंसते धियम् ॥ ७

*Sāyaṇa* :

घृतप्रतीकं घृतोपक्रमं प्रयाजादिष्वाज्यैर्हूयमानत्वात् । यद्वा । प्रतीकमङ्गम् । दीप्तज्वालमित्यर्थः । किंच वः युष्मत्संबन्धिनः ऋतस्य यज्ञस्य धूर्षदं धुरि निर्वहणे सीदन्तं यज्ञनिर्वाहकमग्निं मित्रं न मित्रमिव समिधानः इध्मैर्दीप्यमानः ऋञ्जते प्रसाधयति । ऋञ्जतिः प्रसाधनकर्मा । इन्धानः सम्यग्दीप्यमानः । अक्रः ज्वालासमिदादिभिराक्रान्तः अन्यैरनाक्रान्तो वा । क्रमेश्छान्दसो डः । विदथेषु यज्ञेषु वेदयत्सु स्तोत्रेषु निमित्तभूतेषु दीद्यत् स्वयं दीप्यमानः अस्मदीयां धियं प्रज्ञां यागादिविषयां शुक्रवर्णां शुभ्रवर्णां निर्मलां ज्योतिष्टोमादि कर्म वा उदु यंसते उद्यच्छत-

[1] M's V. G. S. para 180 *sub voce* p. 226. [2] M's V. G. S. p. 370.
[3] 'except twice in the ṚV.': M's V. G. S. p. 226. [4] M's V. G. S. p. 386. [5] M's V. G. S. para 111, note 7 on p. 108; L's N. I.V.pp. 357–58.

यत्येव । यमेलेस्त्यडागमः । सिप् । उशब्दोऽवधारणे । धीरिति कर्मनाम । धीः शमीति तन्नामसु पाठात् ( Nigh. ii, 1 ) ॥

*Notes :*

[ 1. वः. 'The text adds the dativus ethicus वः 'for you' ( comp. Delbrück, Altindische Syntax, 206 ) which can scarcely be translated.'— Oldenberg. He translates ऋतस्य धूर्षदम् by 'the charioteer of Ṛta' and does not take Ṛta to be sacrifice here.[1]

2. ऋञ्जते. Yāska gives ऋञ्जति the sense प्रसाधन. Sāyaṇa almost always agrees with him. प्रसाध् is of course a vague word and just for that reason perhaps may have been selected by Yāska. Devarāja, Durga and Sāyaṇa differ from one another in its interpretation. Sāy. अलंकरोति. ऋञ्ज् is a synonym of शुभ दीप्तौ and signifies : 1 ( intr. ) to shine, to beam ( literally as well as figuratively ), to be beautified ; 2 ( trans. ) to make bright or trim, decorate, honour, show respect to. There is no sharp limit between the literal and figurative senses especially in passages relating to Agni. अग्निं मित्रं न समिधान ऋञ्जते is for us a zeugma, 'He ( the priest ) who has kindled him makes Agni bright as a man adorns a friend. '— Geld., Ved. St. iii., pp. 29-33. ]

3. अक्रः. Sāyaṇa obviously does not know the meaning of this word. On i, 189, 7 and iv, 6, 3 he explains it by आक्रमिता. On iii, 1, 2 his note is अक्रः परेषामाक्रमिता. परैरनाक्रमणीयो वा. On x, 77, 3, आक्रमणशीला मरुतः These are the only places in which the word occurs.

[ In his Illustrations to the Nirukta, p. 94, Roth conjectured from a comparison of the passages in which the word occurs that अक्र was a name for a horse. Geldner too arrives at the same meaning ( Ved. St. i, 168 ). A start, he says, is given by i, 189, 7, मर्मृजेन्य उशिग्भिर्नाक्रः 'who must be diligently adorned by his worshippers like an अक्र'. Now in ii, 10, 1, a horse is called मर्मृजेन्य ( Agni is a praiseworthy horse to be diligently adorned ). मृज् in the Veda is preferably used of the adorning of a horse. He, therefore conjectures that अक्र is a

---

[1] Vedic ṛta = Avestan asha ( areta ) ; ratu, order or he who orders ; Cuneiform Persian arta ; Lat. ordo, rātus. On ṛta see Max Müller's Origin of Religion, Lecture V, pp. 243-259 and Bloomfield's Rel. Ved. pp. 126-27. 'Ṛta-Asha is an Aryan conception'-Moulton, agreeing with Max Müller, Macdonell etc. Prof. Oldenberg would credit Babylon with this conception ; see Religion des Veda, 195 ff.

word for a horse. Agni is very frequently compared to a horse. Oldenberg adopts the conjecture.[1] ]

4. विदथेषु. From धा with वि. 'The verb विधा means to distribute, to arrange, to ordain; 'thus the original meaning of विदथ must be like the meaning of विधान, distribution, disposition, ordinance. ... Within the sphere of the Vedic poets' thoughts, the most prominent example of something most artificially विहित was the sacrifice ··· Thus यज्ञ and विदथ, sacrifice and ordinance became nearly synonymous··· Finally विदथ seems to mean the act of disposing of any business or the like; this meaning appears, I believe, in passages like the well-known phrase बृहद्वदेम विदथे सुवीराः ... Thus the word विदथ and सभा approach each other in their meaning; a person influential in council is called both विदथ्य and सभेय.' Oldenberg, Vedic Hymns, Part ii., pp. 26–7. Also see Max Müller, Ved. Hymns, i., 349–50. ]

Verse 8

*Padapāṭha* :

अप्रंऽयुच्छन् अप्रंयुच्छत्ऽभिः अग्ने शिवेभिः नः पायुऽभिः पाहि शग्मैः । अदंब्धेभिः अदृंपितेभिः इष्टे अनिंमिषत्ऽभिः परिं पाहि नः जाः ॥ ८

*Sāyaṇa* :

हे अग्ने अप्रयुच्छन् अस्मास्वप्रमाद्यन् । युच्छ प्रमादे । अविच्छिन्नप्रवृत्तिः सन् अप्रयुच्छद्भिः अप्रमाद्यद्भिरनवधानरहितैः शिवेभिर्मन्त्रकल्याणैः शग्मैः सुखकरैः पायुभिः रक्षणप्रकारैः नोस्मान् पाहि रक्ष । किञ्च हे इष्टे सर्वैरेषणीयाग्ने जाः जायमनः अस्माभिर्दीप्यमानः सन् अदब्धेभिः अहिंसितैः अदृपितेभिः केनचिदप्यपरिभूतैः । दृप दृम्फ उत्क्लेशे तौदादिकः । अनिमिषद्भिः निमेषरहितैः अनलसस्वभावैः । ईदृशैर्लक्षणैर्नोस्मान् परि परितः पाहि पालय । यद्वा । उपर्युपरि जायन्त इति जाः । नो जाः । अस्मत्संबन्धिनीः पुत्रपौत्रादिरूपाः प्रजाः परि पाहि परितो रक्ष । न केवलमस्मान् किंत्वस्मत्पुत्रपौत्रादीनपि रक्ष ॥

*Notes* :

1. शिवेभिः. 'The instrumental plural (of stems masculine and neuter in a) ends later always in ais; but in the Veda is found abundantly the more normal form ebhis.' Whitney, para 329 d.[2]

2. शग्मैः. For this word see note 1 on No. 20, verse 3.

---

[1] Vedic Hymns Pt. II. (S. B. E.) p. 159.
[2] M's V. G. S. para 97 A. 1, note 9 (p. 77, 78); Pāṇ. vii, 1, 10.

## No. 5

*Maṇḍala* I *Sūkta* 154

*Sāyaṇa* :

[1]विष्णोर्नु कमिति षळृचं पञ्चदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवम् । अत्रानुक्रमणिका । षड्वैष्णवं हीति । अभिप्लवषडहेषूक्थ्येषु तृतीयसवने स्तोमवृद्धावच्छावाकस्य स्तोमातिशंसनार्थमिदमादिसूक्तद्वयं विनियुक्तम् । स्तोमे वर्धमान इति खण्डे सूत्रितम् । विष्णोर्नु कमिति सूक्ते परो मात्रयेत्यच्छावाक इति ( Āśv., vii, 9 ) । तथा तृतीयसवने सोमातिरेक उत्तरोत्तरसंस्थोपगन्तव्या आतिरात्रात् । ततोऽप्यतिरिक्ते तदर्थमेव शस्त्रमुपजनयितव्यम् । तत्रैतदेव सूक्तं सोमातिरेक इति खण्डे सूत्रितम् । महाँ इन्द्रो नृवद्विष्णोर्नु कमिति ( Āśv., vi, 7 ) । आग्निमारुतशस्त्रे आद्या विनियुक्ता । अथ यथेतामिति खण्डे सूत्रितम् । विष्णोर्नु कं वीर्याणि प्रवोचं तन्तुं तन्वन्रजसो भानुमन्विहीति ( Āśv., v, 20 ) ॥

*Notes* :

1. Translated in Muir's 'Sanskrit Texts,' Vol. iv, pp. 69-70.

2. On the position of Viṣṇu and the signification of his three strides in the ṚV., see Muir, Sk. Texts, iv, 97-8. ][2]

Verse 1

*Padapāṭha* :

विष्णोः नु कम् वीर्याणि प्र वोचम् यः पार्थिवानि विऽममे रजांसि । यः अस्कभायत् उत्ऽतरम् सधऽस्थम् विऽचक्रमाणः त्रेधा उरुऽगायः ॥ १

*Sāyaṇa* :

हे नरा विष्णोर्व्यापनशीलस्य[3] देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्र वोचं प्रब्रवीमि । अत्र यद्यपि नु कमिति पदद्वयं तथापि यास्केन नवोत्तराणि पदानीत्युक्तत्वात् ( Naigh. iii, 12 ) शाखान्तर एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कमिति पदद्वयम् । कानि तानीति तत्राह । यो विष्णुः पार्थिवानि पृथिवीसंबंधीनि रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीन्यग्निवाय्वादित्यरूपाणि रजांसि

---

[1] Viṣṇu : M's Ved. Myth. § 17 ( p. 37-42 ); Hopkin's Rel. Ind. pp. 56-57.

[2] Also M's Ved. Myth. p.38; Nirukta xii, 19 in which are cited views of the ancient mythologians–Aurṇavābha and Śākapūṇi.

[3] For a curious derivation of the word Viṣṇu from Vi + Snu (the one generally accepted being from the root viś.) see Bloomfield's Rel. Ved. p. 168.

विममे विशेषेण निर्ममे[1]। अत्र त्रयो लोका अपि पृथिवीशब्दवाच्याः। तथा च मन्त्रान्तरं। यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ( RV. i, 108, 9 ) इति। तैत्तिरीयेऽपि। योऽस्यां पृथिव्यामस्यायुषेणुरक्रम्य यो द्वितीयस्यां तृतीयस्यां पृथिव्यामिति ( T. S. i, 2, 12, 1 )। तस्माल्लोकत्रयस्य पृथिवीशब्दवाच्यत्वम्। किंच यश्च विष्णुरुत्तरमुद्गततरमतिविस्तीर्णं सधस्थं सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् अस्कभायत् तेषामाधारत्वेन स्तम्भितवान्। निर्मितवानित्यर्थः। अनेनान्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति। यद्वा। यो विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान्विममे विविधं निर्मितवान्। रजःशब्दो लोकवाची लोका रजांस्युच्यन्त इति यास्केनोक्तत्वात् ( Nir. iv, 3, 19 )। किंच यश्च उत्तरं उद्गततरमुत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत स्कम्भितवान्। सृष्टवानित्यर्थः। स्कम्भेः स्तम्भुस्तुम्भु इति विहितस्य श्नः। छन्दसि शायजपीति व्यत्ययेन शायजादेशः ( Pāṇ. iii, 1, 84 )। अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे। भूरादिलोकत्रयमित्यर्थः। भूम्यामुपार्जितकर्मभागार्थत्वादितरलोकानां तत्कारणत्वम्। किं च यश्चोत्तरमुत्कृष्टतरं सर्वेषां लोकानामुपरि भूतम्। अपुनरावृत्तेस्तस्योत्कृष्टत्वम्। सधस्थमुपासकानां सहस्थानं सत्यलोकम् अस्कभायत स्कम्भितवान्। ध्रुवं स्थापितवानित्यर्थः। किं कुर्वन्। त्रेधा विचक्रमाणः त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः। विष्णोस्त्रेधा क्रमणम् इदं विष्णुर्विचक्रमे (RV. i, 22, 17) इत्यादिश्रुतिषु प्रसिद्धम्। अत एव उरुगायः उरुभिर्महद्भिर्गीयमानः अतिप्रभूतं गीयमानो वा। य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्र वोचम्॥

*Notes* :

1. कम्. An enclitic particle of emphasis ( = Greek *κεν* ). Compare Sāyaṇa's note on i. 72, 8, where it occurs, as here, after नु, कमित्येतत्पादपूरणं येन नु येन हि &c.[2]

[ वीर्याणि. Pronounce as vīri-āṇi : ]

2. वोचम्. See note 1 on No. 2, verse 17 ( p. 77 )

3. विममे. Cannot here be meant for created. In v. 3 it cannot fitly be said that Viṣṇu constructed the firmament with his three steps. Sāy. on iii, 26, 7, रजसो विमानः = अन्तरिक्षस्याधिष्ठाता ; v, 81, 3 ( पार्थिवानि रजांसि ) विममे = परिच्छिनत्ति. Śat. Br. 6, 3, 1, 18, on this : यद्वै किंचास्यां तत्पार्थिवं तदेष सर्वं विमिमीते रश्मिभिर्ह्येनदभ्यवतनोति— Muir, Sk. Texts, iv. pp. 71-2. ]

4. यो अस्कभायत् 'The elision or absorption of initial *a* after final *e* or *o*, which in the later language is the invariable rule, is in the Veda only an occasional occurrence ; and there is no

---

1 For an altogether different interpretation, see the following paraphrase in the Bhāg. Purāṇa :

भौमान् रेणून् स विममे यो विष्णोर्वर्णयेद्गुणान्॥ viii, 5, 5.

गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य क ईशिरेऽस्य।

कालेन यैर्वा विमिताः सुकल्पैर्भूपांसवः.................. ॥ x, 14, 7.

2 See M's V. G. S. para 180 *sub voce* p. 225.

close accordance with regard to it between the written and the spoken form of the vedic texts. In the Atharvan, for example, the *a* is omitted in writing in about one-third of the cases, but is to be omitted in reading in less than one-fifth ( including a number in which the written text preserves it ). See APr. iii. 54, note.' Whitney ( 1st Edn. ) para. 135.[1]

5. त्रेधा. The metre shows that we must pronounce tra-ya-dhā.[2]

6. उरुगाय : 'The far-goer' ( = उरुक्रमः in verse 5. ) Compare Sāyaṇa on viii, 29, 7 : त्रीण्येक उरुगायो वि चक्रमे— उरुगायो वि चक्रम इति पदलिङ्गाद्विष्णुरुच्यते । उरुगाय उरुभिर्बहुभिर्गातव्यः । यद्वा बहुषु देशेषु गन्ता । बहुकीर्तिर्वा । सर्वाञ्छत्रून्स्वसामर्थ्येन शब्दयत्याक्रन्दयतीति वोरुगायः.

Verse 2

*Padapāṭha* :

प्र तत् विष्णुः स्तवते वीर्येण मृगः न भीमः कुचरः गिरिऽस्थाः । यस्य उरुषु त्रिषु विऽक्रमणेषु अधिऽक्षियन्ति भुवनानि विश्वा ॥ २

*Sāyaṇa* :

तृतीयसवने सोमातिरेक एव शस्त्रमुपजनितव्यम् । तत्र प्र तदित्ययमनुरूपस्तृचः। सोमातिरेक इति खण्डे सूत्रितम् । प्र तद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपाविति ( Āśv. vi, 7 ) । वाजपेयेनाधिपत्यकाम इति खण्डे सूत्रितम् । प्र तत्ते अद्य शिपिविष्ट नाम प्र तद्विष्णुः स्तवते वीर्येणेति ( Āśv, ix, 9 ) ॥

यस्येति वक्ष्यमाणत्वात्स इत्यवगम्यते । स महानुभावो वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण स्तवते स्तूयते सर्वैः। कर्मणि व्यत्ययेन शप् । वीर्येण स्तूयमानत्वे दृष्टान्तः । मृगो न सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहो भीमो भीतिजनकः कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा गिरिष्ठाः । पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते । अस्मिन्नर्थे निरुक्तम् । मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठाः मृगो मार्ष्टेर्गतिकर्मणः भीमो बिभ्यत्यस्माद् । भीष्मोऽप्येतस्मादेव । कुचर इति चरतिकर्म कुत्सितम् । अथ चेद्देवताभिधानं क्वायं न चरतीति वा । गिरिष्ठाः गिरिस्थायी । गिरिः पर्वतः समुद्गीर्णो भवति । पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेर्वेति ( Nir. i, 20 ) । तद्वदयमपि मृगः अन्वेष्टा शत्रूणां भीमः भयानकः सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिः भीषास्माद्वातः पवते इत्यादिश्रुतिषु (T. A. viii, 8, 1) प्रसिद्धा । किंच कुचरः शत्रुवधादिकुत्सितकर्मकर्ता । कुषु सर्वासु भूमिषु लोकत्रये संचारी वा तथा गिरिष्ठाः गिरिवदुच्छ्रितलोकस्थायी । यद्वा । गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना

[1] M's V. G. S., para 21 a, and foot-notes 5, 6 ( p. 23 ).

[2] trayidhā. ( Arnold's Vedic Metre, p. 295 ).

स्तूयते । किंच यस्य विष्णोरुरुषु विस्तीर्णेषु त्रिसंख्याकेषु विक्रमणेषु पादप्रक्षेपेषु विश्वा सर्वाणि भुवनानि भूतजातानि अधिक्षियन्ति आश्रित्य निवसन्ति स विष्णुः स्तूयते ॥

*Notes* :

1. प्र तद्विष्णुः स्तवते वीर्येण [ pronounce वीर्येण as viri-eṇa ]. Sāyaṇa takes the bull by the horns here and says that स्तवते stands for स्तूयते ( on ii, 24, 1 he renders the same word by त्वां स्तौति ). He does not explain तत्. I do not quite understand how Roth takes the clause. The translation in the Siebenzig Lieder is 'For this great deed is Viṣṇu magnified.' The वीर्येण of our verse is taken to be the same as the वीर्याणि of verse 1. Compare Roth's general note on the hymn, S. L., p. 54. 'The older poetry knows only the one deed of Viṣṇu, that he bestrode the whole universe in three steps[1] and fixed fast the heavens, and that under his three footsteps all beings have spacious room to dwell in ( ṚV. vi, 69, 5 ) : he himself dwells where he planted his foot highest — in highest heaven— and with him the pious dead, (verse 5).'

But in the St. Petersburg Dictionary Roth cites our passage under the first meaning of प्र+स्तु without remark. Grassmann in his dictionary took तत् to be the accusative after प्रस्तवते and translated 'undertakes this glorious deed.' वीर्येण he took to mean might, not mighty deeds here. In his translation Grassmann accepted the rendering of the Siebenzig Lieder. Ludwig translates 'Viṣṇu is praised by reason of his strength.' In his commentary Ludwig refers to vi, 20 10[2] and suggests 'diesz verkündigt nachdrücklich von sich' as perhaps a better rendering. Hillebrandt Vedachrestomathie under the word, gives 'laut rühmen' as the meaning of प्रस्तवते here.

I do not see why we should not translate प्र तद्विष्णुः स्तवते 'Viṣṇu praises,' makes loud boast of this, *i. e.*, the mighty deeds mentioned in the last verse. वीर्येण I would take adverbially, 'mightily, such is his might.'

---

[1] See M's Vedic Mythology pp. 38–40, more especially p. 40 para "In the Brāhmaṇas......sacrifice."

[2] This passage lends no support to the way in which it is desired to take प्र स्तवते here, प्र पूरवः स्तवन्त एना यज्ञैः, (Sāyaṇa) प्रस्तवन्ते त्वां स्तुवन्ति.

2. मृगो न भीमः कुचरो गिरिष्ठाः. The simile is not applicable to Viṣṇu generally, but to Viṣṇu conceived as planting his foot on the height of heaven and now magnifying his own great deed. He is like ( roars like ) a fierce lion[1] prowling on a mountain top. Compare x, 180, 2, where the whole phrase recurs in the middle of a description of Indra advancing to the fight. Sāyaṇa's note there is कुचरः कुत्सितचरणः गिरिष्ठः पर्वतनिवासी मृगो न सिंह इव हे इन्द्र त्वं भीमो भयंकरोऽसि.

A wild beast or beast of the forest is the oldest meaning of मृग. Compare the classical word मृगेन्द्र. The word कुचर occurs only in these two passages in the Ṛgveda. It and गिरिष्ठाः have a reference to the god as well as to the wild animal to whom he is here compared. See the next verse where Viṣṇu is called गिरिक्षित्.

Verse 3

*Padapāṭha* :

प्र विष्णवे शूषम् एतु मन्म गिरिऽक्षिते उरुऽगायाय वृष्णे ।
यः इदम् दीर्घम् प्रऽयतम् सधऽस्थम् एकः विऽममे त्रिऽभिः इत् पदेभिः ॥ ३

*Sāyaṇa* :

विष्णवे सर्वव्यापकाय शूषमस्मत्कृत्यादिजन्यं बलं महत्त्वं मन्म मननं स्तोत्रं मननीयं शूषं बलं वा विष्णुमेतु प्राप्नोतु । कर्मणः संप्रदानत्वाच्चतुर्थी । कीदृशाय । गिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते उरुगायाय बहुभिर्गीयमानाय वृष्णे वर्षित्रे कामानाम् । एवंमहानुभावं शूषं प्राप्नोतु । कोस्य विशेष इति उच्यते । यो विष्णुरिदं प्रसिद्धं दृश्यमानं दीर्घमतिविस्तृतं प्रयतं नियतं सधस्थं सहस्थानं लोकत्रयमेक इत् एक एव अद्वितीयः सन् त्रिभिः पदेभिः पादैर्विममे विशेषेण निर्मितवान् ॥

*Notes* :

1. शूषम् (śu+u+ṣam). Roth derives this word from श्वस् and takes it as an adjective, in the sense of piping, sounding, clanging, here and in four other passages of the Ṛgveda which he cites. x, 54, 6 अध प्रियं शूषमिन्द्राय मन्म...अवाचि. Sāyaṇa, अध संप्रति तस्मा इन्द्राय प्रियं प्रीतिजनकं शूषं बलं शत्रूणां शोषकत्वाद्बलकरं मन्म मननीयं स्तोत्रं &c. x. 6, 4, शूषेभिर्वृधो जुषाणो अर्कैः. Sāyaṇa, वृधो वर्धितोऽग्निः शूषेभिर्विलक्षणबलैः । बलनिमित्तैर्हविर्भिरित्यर्थः । अर्कैः स्तोत्रैश्च जुषाणः सेव्यमानः सन्. It seems doubtful whether शूषेभिः is an adjective here.

---

[1] The source of the later myth of the Nṛsiṁhāvatāra.

iii, 7, 6 उतो पितृभ्यां प्रविदानु घोषं महो महद्भ्यामनयन्त शूषम्. Sāyaṇa, उतो अपि च महो महतो महद्भ्यां पितृभ्यां द्यावापृथिवीभ्यां प्रविदा प्रवेदनेन अनु घोषमनु घुष्यमाणं शूषं सुखम्। शूषं शुनमिति सुखनामसु पाठात्। तत्सुखं यजमाना अग्निमनयन्त अग्निं प्रापितवन्तः. vi. 10, 2. स्तोमं यमस्मै ममतेव शूषम्. Sayāṇa, ये स्तोमं स्तोत्रम् शूषं सुखकरं &c. In other two passages the adjective occurs according to Roth in the sense of snorting, spirited. iii, 49, 2 इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः Sāyaṇa, स इन्द्र इनतमोतिशयेन सेनास्वामी सत्वभिः परितः सीदद्भिर्मरुद्भिः सह यो यान् गच्छन् शूषैः। शोषयन्ति परबलानीति शूषाणि बलानि &c. ix, 71, 2 प्र कृष्टिहेव शूष एति रोरुवत्. Sāyaṇa, शूषः शत्रूणां शोषको बलवान् &c. The word, as Sāyaṇa notes, is given in the Nighaṇṭu among the synonyms of बल ii, 9 and सुख iii, 6. Ludwig translates 'let the song go up to Viṣṇu for strength to him.'

[ वृष्णे. 'In वृषन् we have one of those words which it is almost impossible to translate accurately. It occurs over and over again in the Vedic hymns, and if we once know the various ideas which it either expresses or implies, we have little difficulty in understanding its import in a vague and general way, though we look in vain for corresponding terms in any modern language.'

वृषन्, from वृष् to scatter semen, originally meant the male. It implies strength and eminence. By itself it most frequently means man in his sexual character. Then it comes to mean fertilising, strong. It is also used as in epitheton ornans to be rendered by hero or strong, as a name of various deities, and as a general and empty term of praise—M. Müller, Vedic Hymns, Part i, pp. 138-153.]

Verse 4

*Padapāṭha :*

यस्यं त्री पूर्णा मधुंना पदानिं अक्षींयमाणा स्वधयां मदंन्ति। यः उंइतिं त्रिऽधातुं पृथिवीम् उत द्याम् एकंः दाधारं भुवंनानि विश्वां ॥ ४

*Sayaṇa :*

यस्य विष्णोः मधुना मधुरेण दिव्येनामृतेन पूर्णा पूर्णानि त्रीणि पदानि पादप्रक्षेपणानि अक्षीयमाणा अक्षीयमाणानि स्वधया अन्नेन मदन्ति मादयन्ति तदाश्रितजनान्। य उ य एव पृथिवीं प्रख्यातां भूमिं द्यामुत द्योतनात्मकमन्तरिक्षं च विश्वा भुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च। यद्वा। पृथिवीशब्देन अधोवर्तीन्यतलवितलादिसप्तभुवनान्युपात्तानि। द्युशब्देन तदवान्तररूपाणि भूरादिसप्तभुव-

नानि । एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि । त्रिधातु । त्रयाणां धातूनां समाहारस्त्रिधातु । पृथिव्यप्तेजोरूपधातुत्रयविशिष्टं यथा भवति तथा दाधार धृतवान् । तुजादित्वादभ्यासस्य दीर्घत्वम् ( Pāṇ. vi, 1, 7 )। उत्पादितवानित्यर्थः । छन्दोगारण्यके तत्तेजोऽसृजत ता आप ऐक्षन्तेति भूतत्रयसृष्टिमुक्त्वा हन्तेमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणीत्यादिना त्रिवृत्करणसृष्टिरुपपादिता ( Chh. Up. vi, 2, 3-3, 3 ) यद्वा । त्रिधातु कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः ॥

*Notes* :

1. त्री. Whitney, para. 482c.[1]

2. यस्य त्री पूर्णा &c., Roth, S. L., p. 54, has the following note :— 'All beings in the world enjoy the sweetness of his highest footstep, that is heaven. From Viṣṇu flows the comfort and enjoyment which are found in the threefold world .'

3. स्वधया मदन्ति. 'Rejoice in, are made glad with, food.' Compare Max Müller, Vedic Hymns, Part i, p. 36. The phrase recurs in our No. 23, verse 7, उभा राजाना स्वधया मदन्ता.

But Roth takes it differently. There is good reason to believe that the word स्वधा had in the Veda a meaning which was subsequently altogether lost sight of in India. See Max Müller's note on the word already referred to.[2] Roth gives custom, rule ( Gr. ἔθος ) as the first meaning of the word and cites three

[1] M's V. G. S. p. 99.

[2] 'Svadhā, literally one's own place, afterwards, one's own nature. It was a great triumph for the science of comparative philology that long before the existence of such a word as svadhā in Sanskrit was known, it should have been postulated by Professor Benfey in his Griechisches Wurzel-lexicon published in 1839, and in the Appendix of 1842. Svadhā was known, it is true, in the ordinary Sanskrit, but there it only occurred as an exclamation used on presenting an oblation to the manes. It was also explained to mean food offered to deceased ancestors, or to be the name of a personification of Māyā or worldly illusion, or of a nymph. But Professor Benfey, with great ingenuity, postulated for Sanskrit a noun svadhā, as corresponding to the Greek ἦθος and the German *sitte*., O.H.G. *sit-u*. Gothic *sid-u*. The noun svadhā has since been discovered in the Veda, where it occurs very frequently; and its true meaning in many passages where native tradition had entirely misunderstood it has really been restored by means of its etymological indentification with the Greek ἔθος or ἦθος.'

passages, iv, 33, 6 अनु स्वधामृभवो जग्मुरेताम् ( compare Max Müller, *loc, cit.* p. 33. 'According to their nature the Ṛbhus went to her, scil, the cow; or according to this their nature, they came.' ). Sāyaṇa अनु चतुर्धाकरणानन्तरमेतां तृतीयसवनगतां स्वधां सोमाख्यममृतमृभवो जग्मुः. iv, 52, 6 उषो अनु स्वधामव ( Max Müller, 'Dawn, help! as thou art wont.' ) Sāyaṇa, अनु पश्चात् स्वधां हविर्लक्षणमन्नमव रक्ष. iv, 13, 5 कया याति स्वधया ( Max Müller, 'By what inherent power does he ( the sun ) move on?' ). Sāyaṇa, कया स्वधया केन बलेन याति गच्छति स्वधाशब्दोऽन्नवाच्यत्र तत्कार्यं बलं लक्षयति.

In ix, 103, 5; vi, 2, 8; viii, 32, 6; x, 129, 5; ix, 86, 10, Roth takes the word to mean accustomed place, home ( Gr. ἦθος ). A third meaning of the word according to Roth is, usual condition, comfort, well-being, contentment. He cites three passages, vii, 8, 3, कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः. 'What contentment didst thou feel?' ( Max Müller, 'In what character dost thou light up our work and what character dost thou assume, when thou art praised?' ) Sāyaṇa, हे अग्ने त्वं कया स्वधया हविषा नोऽस्माकं सुवृक्तिं स्तुतिं वि वसः व्याप्नुषे आच्छादयसि वा। कामु कां च स्वधां शस्यमानः स्तूयमानस्त्वमृणवः प्राप्नुयाः. i, 165, 6 क्व स्या वो मरुतः स्वधासीत् ( Max Müller, 'Where was that custom of yours, O Maruts, when you left me alone' &c. ). Sāyaṇa, स्या सा स्वधा तदुदकं बलं वा. So on previous verse Sāyaṇa says स्वधामुदकं बलं वा. अस्मत्सृष्टोदकजन्यं हविः. स्वधामनु in i, 165, 5 is by Roth translated 'to our wish, in the nick of time' and by Max Müller, 'according to thy wont'. ix, 113, 10 स्वधा च यत्र तृप्तिश्च 'where there is pleasure and fulness of joy' ( Translation in S. L. p. III ). Max Müller, 'where there is food and rejoicing.' Sāyaṇa स्वधा अन्नं स्वधाकारेण वा दत्तमन्नम्.

Roth notes the frequent use of the expressions स्वधामनु or अनु स्वधां, as usual, at pleasure, as desired, undisturbed, i, 6, 4; i, 33, 11; i, 165, 5, &c. and of our form स्वधया, to which he assigns the meaning, in the usual way; with contentment, comfortably, willingly; spontaneously ( also the pl. स्वधाभिः ). The word occurs as here with मदन्ति in i, 154, 4; i, 108, 12; iii, 4, 7; v, 32, 4; vii, 47, 3; x, 14, 7. Lastly, Roth treats स्वधा ( Cf. सुधा ), sweet drink, oblation, especially that poured out for the manes, as a distinct word, being that recognised in Nigh. i, 12 as=उदक and in Nir. vii, 25 as=अन्न. Our phrase स्वधया मदन्ति has in Roth's opinion nothing to do with the phrase स्वधयाऽन्ये मदन्ति in No. 29, verse 3, स्वधया in the one case

being an instrumental adverb meaning gladly, freely, and in the other a noun meaning with the offering. This would seem to imply a great interval of time between the dates of the composition of the two hymns.

4. त्रिधातु पृथिवीमुत द्याम्. The expression पृथिवीमुत द्यां is in apposition to त्रिधातु, and means the same thing. Earth and Heaven are 'the threefold world.' Roth compares iv, 42, 4 उत त्रिधातु प्रथयद्वि भूम.' Sāyaṇa, उत अपि च भूम व्याप्तमाकाशं त्रिधातु त्रिप्रकारं वि विशेषेण प्रथयत मदर्थमेव क्षित्यादि लोकत्रयमकार्षीत्परमेश्वरः.

5. दाधार. See Whitney, para 786. 'A considerable number of roots have in the Veda a long vowel in their reduplication ··· ··· Most are Vedic only; but दाधार is common also in the Brāhmaṇa language, and is even found later.'[1]

Verse 5

*Padapāṭha* :

तत् अस्य प्रियम् अभि पार्थः अश्याम् नरः यत्र देवऽयवः मदन्ति । उरुऽक्रमस्य सः हि बन्धुः इत्था विष्णोः पदे परमे मध्वः उत्सः ॥ ५

*Sāyaṇa* :

आतिथ्यायां तदस्येत्येषा प्रधानस्य याज्या । अथातिथ्यात खण्डे सूत्रितम् । इदं विष्णुर्वि चक्रमे तदस्य प्रियमभि पाथो अश्यामिति ( Āśval. iv, 5 ) ।

अस्य महतो विष्णोः प्रियं प्रियभूतं तत्सर्वैः सेव्यत्वेन प्रसिद्धं पाथः । अन्तरिक्षनामैतत् । पाथोन्तरिक्षं पथा व्याख्यातमिति यास्केनोक्तत्वात् ( Nir. vi, 7 ) । अविनश्वरं ब्रह्मलोकमित्यर्थः । [ अभि? ] अश्यां व्याप्नुयाम् । तदेव विशेष्यते । यत्र स्थाने देवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तः यज्ञदानादिभिः प्राप्तुमिच्छन्तो नरा मदन्ति तृप्तिमनुभवन्ति तदश्यामित्यन्वयः । पुनरपि तदेव विशेष्यते । उरुक्रमस्य अत्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना । अत एव विष्णोर्व्यापकस्य परमेश्वरस्य परमे उत्कृष्टे निरतिशये केवलसुखात्मके पदे स्थाने मध्वः[2] मधुरस्य उत्सः निष्यन्दो वर्तते । तदश्याम् । यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेणामृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः । ततोऽधिकं नास्तीत्याह । इत्था इत्थमुक्तप्रकारेण स हि बन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरो वा तस्य पदं प्राप्तवतां न पुनरावृत्तिः । न च पुनरावर्तत इति[3] श्रुतेस्तस्य बन्धुत्वम् । हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ॥

[1] M's V. G. S. p. 393. [2] M's V. G. S. p. 81 and note 8, Lanman's N. I. V. p. 411. [3] Jāb. Up. etc.

*Notes* :

1. [ पाथः = स्थानम् ( Sāy. on vii, 47, 3 ) ].

2. उरुक्रमस्य &c Sāyaṇa takes स हि बन्धुरित्था parenthetically, ‘ Verily such a friend is he, ’ the main sentence being ‘ In the highest step of the wide-stepping Viṣṇu there is a spring of nectar, ’ and supplies तदश्याम्. ‘ may I win there. ’ Roth, followed by Grassmann, takes उरुक्रमस्य &c,. to be a clause by itself, and विष्णोः &c., to be another, both independent of the previous part of the verse. ‘ There is a society of friends ( बन्धुः ) of the mighty strider, there the spring of sweetness in Viṣṇu's highest seat. ’ ( Grassmann ‘ There is a spring of sweetness. ’ ). Ludwig appears to me to have completely misunderstood Sāyaṇa's explanation of स हि बन्धुरित्था. ‘ That बन्धु and उत्सः are one and the same thing is, after Sāyaṇa's excellent explanation, not open to doubt : the translation in the Siebenzig Lieder needs no refutation, for the reason why the speaker wishes himself in Viṣṇu's heaven is just that spring of madhu which is thought of as inseparable from it. Anyone who has the slightest feeling for style will see how the whole verse is arranged to throw the whole final emphasis on मध्व उत्सः ’. Ludwig accordingly translates ‘ Appertaining ( बन्धुः ) to that is there, in the highest place of Viṣṇu the wide-stepper, the spring of madhu. ’ But Sāyaṇa's phrase स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरो वा refers to Viṣṇu, not to the spring of madhu. Compare the words which follow— तस्य पदम्.

Roth, it will be seen, takes बन्धुः as a collective expression for the society of heaven, the नरो देवयवः of the previous clause. He compares x, 15, 3 to the Manes,

आहं पितॄन्त्सुविदत्राँ अवित्सि
नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य
भजन्त पित्वस्त इहागमिष्ठाः ॥

‘ I have found the gracious Fathers, the children and the highest step of Viṣṇu : come gladly to us, oh ye who sit on the grass strewn for you, and drink at pleasure the sweet draught. ’

But बन्धुः may refer rather to the tie between the god and his worshipper, ‘ Verily such is the brotherhood of Viṣṇu, etc., scil, that I too may hope to win there. ’ Compare the first of

the passages cited by Roth under that meaning of बन्धुः vii, 72, 2, युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम्, where बन्धुः must be taken in a sense answering to सख्या ( Sāyaṇa युवयोर्मम च बन्धुर्बन्धकः पितामहः समान एक एव...तं बन्धुं तद्बन्धुत्वं वा वित्तं जानीतम् ).

[ 3. इत्था. Pischel in Ved. St., ii, pp. 88-9, says that इत्था and the Pr. एत्थ are identical. To derive एत्थ from अत्र is against all laws of phonetics. The most frequent sense of इत्था is 'here,' but like अत्र it means 'there' also.[1] He translates the second half of the verse thus: 'In the highest place of the wide-stepping Viṣṇu— there indeed is our relationship— there is a spring of mead.' The sense, he says, is plain from the preceding verses of the strophe.

4. This is a passage which must be understood as intimating a belief in a future state of happiness ].

Verse 6

*Padapāṭha* :

ता वाम् वास्तूनि उश्मसि गमध्यै यत्र गावः भूरिऽशृङ्गाः अयासः । अत्र अह तत् उरुऽगायस्य वृष्णः परमम् पदम् अव भाति भूरि ॥ ६

*Sayaṇa* :

हे पत्नीयजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनाय उश्मसि कामयामहे । तदर्थं विष्णुं प्रार्थयाम इत्यर्थः । तानीत्युक्तं कानीत्याह । यत्र येषु वास्तुषु गावो रश्मयो भूरिशृङ्गा अत्यन्तोन्नत्युपेता । बहुभिराश्रयणीया वा अयासः अयना गन्तारः । अतिविस्तृताः । यद्वा । यासो गन्तारः । अतादृशा अत्यन्तप्रकाशयुक्ता इत्यर्थः । अत्राह अत्र खलु वास्त्वाधारभूते द्युलोक उरुगायस्य बहुभिर्महात्माभिर्गातव्यस्य स्तुत्यस्य वृष्णः कामानां वर्षितुर्विष्णोस्तत् तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूरि अतिप्रभूतमवभाति स्वमहिम्ना स्फुरति । अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गाः । भूरीति बहुनो नामधेयं प्र भवतीति सतः । शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा अयासोऽयनाः । तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि । पादः पद्यतेरिति ( Nir. ii, 7 ) ॥

[1] For it-thā, *thus*, *so*, and *truly*-see M's V. G. S. pp. 211, 218.

*Notes* :

1. वाम्. The dual must refer to Viṣṇu in conjunction with some other god, not, as Sāyaṇa takes it, to the Yajamāna and his wife. But who the other god is, or why mention of him should be made so abruptly it is not easy to say. The difficulty has led Roth ( S. L., p. 54 ) to suggest that we have here a verse belonging to a Mitra Varuṇa hymn, which has been improperly tacked on to our hymn, on account of the expression परमं पदं occurring in it. But compare note 1 on No. 2, Verse 6.

[ 2. गमध्यै. Whitney, paras. 969 and 970 j. ][1]

3. गावो भूरिशृङ्गाः[2] The 'kine with many horns' are perhaps the stars with their myriad rays.

4. अयासः. 'Unwearying'. I translate Roth's article on the word 'अयास् ( अ+यास् from यस् ) 1. adjective ( not exerting themselves ) agile, light, expert. The forms which occur are acc. sing. अयासम्, nom. & acc. pl. अयासः, and gen. pl. अयासाम्. Frequently of the Maruts, Ṛgveda i, 64, 11 ; 167, 4 ; 108, 9 ; 169, 7 ; iii, 54, 13 ; v, 42, 15 ; vi, 66, 5 ; vii, 8, 2 ; गावः i, 154, 6 ; अश्वम् ix, 89, 4 ; सिंहम् ix, 89, 3 ; अर्यः iv, 6, 10 ; अजराः iii, 18, 2.— In Nirukta ii, 7 and by the commentators derived from i to go— 2. indecl. Fire. Uṇ. iv, 221.'

## No. 6

*Maṇḍala* II *Sūkta* 12

*Sāyaṇa* :

द्वितीयेऽनुवाक एकादश सूक्तानि । तत्र यो जात इति पञ्चदशर्चं प्रथमं सूक्तं गार्त्समदं त्रैष्टुभमैन्द्रम् । संसवे निष्केवल्ये निविद्धानीयस्य पुरस्ताद्यो जात एवेति शंसेत् । यदि पर्यायानिति खण्डे सूत्रितम् । यो जात एवेति निष्केवल्य इति ( Āśval. vi, 6 ) । आभिप्लविके तृतीयेऽहनि निष्केवल्ये यो जात एवेति निविद्धानीयम् । सूत्रितं च । तृतीयस्य ऽर्यमा यो जात एवेति मध्यंदिन इति ( Āśval. vii, 7 ) । विश्वजिति माध्यंदिनसवने मैत्रावरुणः स्वशस्त्रे प्राकृतात्सूक्तात्पूर्वं यो जात इति सामसूक्तं शंसेत् । विश्वजितोऽग्निं नर इति खण्डे सूत्रितम् । सत्रा मदासो यो जात एवाभूरेक इति सामसूक्तानीति ( Āśval. viii, 7 ) । अग्निष्टुन्निष्केवल्ये निविद्धानमिदम् श्येनाजिराभ्यामिति खण्डे सूत्रितम । तिष्ठा हरी इति यो जात एवेति मध्यंदिन इति ( Āśval. ix, 7 ) । महाव्रते निष्केवल्ये यो जात एवेति

---

[1] M's V. G. S. para 211 b ( p. 334 ) where this passage is quoted.

[2] Compare the *goloka* and *gokula* of the later mythology.

सूक्तम् । उरू इति खण्डे सूत्रितम् । वने न वा यो न्यधायि चाकन् यो जात एव प्रथमो मनस्वानिति ( Ait. Āraṇ. v, 3, 1 ) । अत्रेतिहासो बृहद्देवतायामुक्तः[1] ।

संयुज्य तपसात्मानमैन्द्रं बिभ्रन्महद्वपुः ।
अदृश्यत मुहूर्तेन दिवि च व्योम्नि चेह च ॥
तमिन्द्र इति मत्वा तु दैत्यौ भीमपराक्रमौ ।
धुनिश्च चुमुरिश्चोभौ सायुधावभिपेततुः ॥
विदित्वा स तयोर्भावमृषिः पापं चिकीर्षतोः ।
यो जात इति सूक्तेन कर्माण्यैन्द्राण्यकीर्तयत् ॥ (Bṛ.Dev. iv, 66-68.)

अन्ये त्वन्यथा वर्णयन्ति । पुरा किलेन्द्रादयो वैन्ययज्ञं समाजग्मुः । गृत्समदोऽपि तत्रागत्य सदस्यासीत् । दैत्याश्चेन्द्रजिघांसया तत्र समागमन् । तान्दृष्ट्वा निर्जगामेन्द्रो यज्ञाद् गृत्समदाकृतिः · स च गृत्समदो वैन्येन पूजितो यज्ञवाटान्निरगच्छत् । निर्गच्छन्तं तमृषिं दृष्ट्वा अयमेवेन्द्र इति मन्यमानास्तमसुराः परिवव्रुः । नाहमिन्द्रः स्तुच्छः किं त्वेवंगुणोपेतः स इत्यनेन सूक्तेन तान्प्रत्युवाच । अपरे त्वेवं कथयन्ति । गृत्समदस्य यज्ञे प्रविष्टमेकाकिनमिन्द्रं ज्ञात्वा असुराः परिवव्रुः । स इन्द्रो गृत्समदरूपेण यज्ञवाटान्निर्गत्य स्वर्गं जगाम । ततोऽसुरा इन्द्रो विलम्बित इत्यन्तः प्रविश्य गृत्समदं दृष्ट्वा पूर्वमेव गृत्समदो गतः अयं त्विन्द्रोऽस्मद्भयाद्गृत्समदरूपेणास्त इति तं जगृहुः । स तान् नाहमिन्द्रोऽयमित्यनेन सूक्तेन प्रत्युवाच । अयमेवार्थो महाभारते प्रपञ्चितः ॥

*Notes :*

For my notes and translation here I am much indebted to memoranda of a lecture delivered on this hymn by Professor Aufrecht.

Verse 1

*Padapāṭha :*

**यः जातः एव प्रथमः मनस्वान् देवः देवान् क्रतुना परिऽअभूषत् । यस्य शुष्मात् रोदसीइति अभ्यसेताम् नृम्णस्य मह्ना सः जनासः इन्द्रः ॥ १**

*Sāyaṇa :*

गृत्समदो ब्रूते । जनासः जनाः हे असुरा यो जात एव जायमान एव सन् प्रथमः देवानां प्रधानभूतः मनस्वान् मनस्विनामग्रगण्यः देवः द्योतमानः सन् क्रतुना वृत्रवधादिलक्षणेन स्वकीयेन कर्मणा देवान् सर्वान्यागदेवान्पर्यभूषत् रक्षकत्वेन पर्यग्रहीत् । भूष अलंकारे भ्वादिः । लङि रूपम् । यद्वा । सर्वानन्यान्देवान्पर्यभूषत् पर्यभवत् अत्यक्रामत् । अस्मिन्पक्षे भवतेर्व्यत्ययेन क्सः । श्युकः कितीतीट्प्रतिषेधः । यस्येन्द्रस्य शुष्मात् शरीरात् बलात् रोदसी द्यावापृथिव्यौ अभ्यसेतामबिभीताम् । भ्यस भये । अनुदात्तेत् । भ्यस भयवेपनयोरिति नैरुक्ताः ( Nir. iii, 21 ) । अभ्यसेतामवेपेतां

[1] Bṛ. Dev. iv, 65-79.

वा । तथा च मन्त्रान्तरम् । इमे चित्तव मन्यवे वेपेते भियसा मही इति ( ṚV. i, 80, 11 ) । नृम्णस्य सेनालक्षणस्य बलस्य मह्ना महत्त्वेन युक्तः स इन्द्रो नाहमिति । अत्र निरुक्तम् । यो जात एव प्रथमो मनस्वी देवो देवान्क्रतुना कर्मणा पर्यभवत्पर्यगृह्णात्पर्यरक्षदत्यक्रामदिति वा । यस्य बलाद्द्यावापृथिव्यावप्यबिभीतां नृम्णस्य मह्ना बलस्य महत्त्वेन स जनास इन्द्र इत्यृषेर्दृष्टार्थस्य प्रीतिर्भवत्याख्यानसंयुक्तेति ( Nir. x, 10 ) ॥

*Notes* :

1. जात एव ' So soon as he was born. '

2. क्रतुना पर्यभूषत्. ' Adorned with strength. ' Compare i, 15, 4 अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना, and Sayāṇa's note there : हे अग्ने देवानिह अस्मिन्कर्मणि आवह । ततो योनिषु स्थानेषु त्रिषु सवनेषु सादय देवानुपवेशय ततस्तान्परिभूष अलंकुरु । ऋतुना सह त्वं सोमं पिब.

3. यस्य शुष्मात्. ' At whose breath, from before whose breath. ' The root is that of श्वस्. The word is used as an adjective in, for example, i, 52, 4, where शुष्माः ( मरुतः ) means the snorting ( roaring ) Maruts. Compare शुष्मं in the last hymn, verse 3. To say that ' breath ' means ' strength ' here, is to turn poetry into prose.

4. स जनास इन्द्रः ' ' He, O men, is Indra ! ' The refrain with which each verse of this sublime hymn [ except the last ] closes. Sāyaṇa's explanation, ' He, not I, am Indra, ' refers to the ridiculous story which, in his introduction to the hymn, he quotes from the Bṛhaddevatā, and which is in itself a measure of the distance in time and spirit between that work and the writer of the words before us.

Verse 2

*Padapāṭha* :

**यः पृथिवीम् व्यथमानाम् अदृंहत् यः पर्वतान् प्रऽकुपितान् अरम्णात् । यः अन्तरिक्षम् विऽममे वरीयः यः द्याम् अस्तभ्नात् सः जनासः इन्द्रः ॥ २**

*Sāyaṇa* :

हे जनाः, यः इन्द्रः व्यथमानां चलन्तीं पृथिवीमदृंहत् शर्कराभिर्दृढामकरोत् । दृंह दृहि वृद्धौ । यश्च प्रकुपितान् इतस्ततश्चलितान्पक्षयुक्तान्पर्वतानरम्णात् नियमि-

[1] **Indra** : See Muir's S. T. sec. VI; Macdonell's Ved. Myth. pp. 54–66; Hopkin's Rel. Ind., pp. 91–96; Bloomfield's Rel. Ved. pp. 173–182; =Inda-ra of the Boghaz-köi inscription.

तवान् स्वे स्वे स्थाने स्थापितवान् । अरम्णात् रमु क्रीडायाम् । अन्तर्भावितण्यर्थस्य व्यत्ययेन श्नाप्रत्ययः । यश्च वरीय उरुतममन्तरिक्षं विममे निर्ममे विस्तीर्णं चकारेत्यर्थः । यश्च द्यां दिवमस्तभ्नात् तस्तम्भ निरुद्धामकरोत् । स्तम्भु रोधन इति सौत्रो धातुः । स एवेन्द्रो नाहमिति ॥

*Notes :*

1. [ यः पृथिवीम् &c. Cf. Maitrā. Saṁ. i, 10, 13:— The hills are the eldest children of Prajāpati. They had wings. They flew about and settled wherever they liked. The earth thus tottered. Indra cut off their wings and made fast the earth by means of them ( the hills ). The wings became clouds. Hence it is that clouds always go to the hill, as they are the places where they once grew. ]

2. प्रकुपितान्. ( For प्रकुपिताँ see note 4 on No. 2, verse 11, p. 72. ) 'The moving' mountains. We learn from the Veda that the original meaning of the root कुप् was 'to move.' Transferred to the emotions the same root yielded in Sanskrit a word meaning 'anger' and in Latin a word meaning 'desire.' The word is first transferred by metaphor from the physical world to the region of the mind, and thereafter is within that sphere restricted variously in the two kindred languages. The next word in our verse, अरम्णात्, 'he fixed fast', is an equally striking example of the light thrown by the Veda on the history of language. In later Sanskrit the simple root means only 'to rejoice.' The Veda shows that the first meaning was 'to be in a state of rest' and that the word, applied to the mind, was thereafter, not as in the previous case, restricted to part only of its meaning proper, but extended so as to include other joys than that of rest.

3. [ विममे. 'The word here may mean constructed.'— Muir, Sk. Texts, iv, p. 101. ]

Verse 3

*Padapāṭha :*

यः ह॒त्वा अहि॑म् अरि॑णात् स॒प्त सिन्धू॑न् यः गाः उ॒त्ऽआ॒जत् अ॒प॒ऽधा व॒लस्य॑ । यः अश्म॑नोः अ॒न्तः अ॒ग्निम् ज॒जान सं॒ऽवृक् स॒मत्ऽसु॑ सः ज॒ना॒सः इन्द्रः॑ ॥ ३

यः अहिं[1] मेघं हत्वा मेघहननं कृत्वा सप्त सर्पणशीलाः सिन्धून् स्यन्दनशीला अपः अरिणात् प्रैरयत् । यद्वा । सप्त गङ्गायमुनाद्या मुख्या नदीररिणात्[2] रीङ् स्रवणे क्र्यादिः । यश्च वलस्य[3] वलनामकस्यासुरस्य अपधा तत्कर्तृकान्निरुद्धा गा उदाजत् निरगमयत । अपधा । अपपूर्वाद्दधातेरातश्चोपसर्ग इति भावेङ्प्रत्ययः ( Pāṇ. iii, 3, 106 ) । सुपां सुलुगिति ( Pāṇ. vii, 1, 39 ) पञ्चम्या आकारः । यश्च अश्मनोः । अश्नुते व्याप्नोत्यन्तरिक्षमित्यश्मा मेघः । अत्यन्तमृदुरूपयोर्मेघयोरन्तर्मध्ये वैद्युतमग्निं जजान उत्पादयामास । यश्च समत्सु संभक्षयन्ति योद्धॄणामायूंषीति समदः संग्रामाः । तेषु संवृक् भवति वृणक्तेर्हिंसार्थस्य क्विपि रूपम् । स इन्द्रो नाहमिति ॥

*Notes* :

1. सप्त सिन्धून्[4]. 'The seven rivers.' Sāyaṇa's alternative explanation of सप्त is ridiculous. For the seven rivers[5] of the Vedic poets see, Max Müller's India— What can it teach us ?' p. 122[6] and pp. 171 fg.

2. अपधा. This word occurs only here. It is a Vedic locative, of the same kind as गुहा in the next verse. Roth takes it as a Vedic instrumental [ also Lanman[7] ], but translates ( S. L., p. 58 ) 'from the hiding place of Vala.' So also Grassmann. Ludwig suggests that the word is instrumental in sense, and that we must take it to mean wedge or key ( quasi reserator ).

[ 3. अश्मनोरन्तः 'Between two clouds or stones.—' Muir, Sk. Texts, v., p. 205. See footnote to translation. ]

4. संवृक् This word also, like अपधा above, occurs nowhere else in the Ṛgveda, and Roth, quotes one other passage for it, V. S. 38, 28, त्विषः संवृक् क्रत्वे, दक्षस्य ते etc.

---

1 See Nir., ii, 16.

2 For the different interpretations of the Vedic myth of the Captive Waters' see Tilak's Arctic Home, Ch. IX, pp. 232-296 ; Bloomfield's Rel. Ved., pp. 178-81. 3 M's Ved. Myth., p. 159.

4 Sk. sapta = Av. hapta = Lat. septus. Skt. Sapta Sindhavaḥ = Av. Hapta-hindu.

5 For the different identifications see M and K's Ved. Ind. Vol. II-sapta sindhavaḥ ; Tilak's Arctic Home, pp. 289-93.

6 'In the Veda the stage on which the life of the ancient king and poets is acted is the valley of the Indus and the Punjab, as it is now called, the Sapta Sindhavaḥ of the Vedic poets. The land watered by the Ganges is hardly known, and the whole of the Dekkan seems not to have been discovered.'

7 L's N. I. V. p. 447 ; M's V. G. S. para 97 A. 2.

### Verse 4

*Padapāṭha* :

येन॑ इ॒मा विश्वा॑ च्यव॑ना कृ॒तानि॑ यः दास॑म् वर्ण॑म् अध॑रम् गुहा॑ अक॒रित्यक॑ः । श्व॒घ्नीऽइ॑व यः जि॒गी॒वान् ल॒क्षम् आद॑त् अ॒र्यः पु॒ष्टानि॑ सः ज॒ना॒स॒ः इन्द्र॑ः ॥ ४

*Sāyaṇa* :

येन इन्द्रेण इमा इमानि विश्वा विश्वानि च्यवना[1] नश्वराणि भुवनानि कृतानि स्थिरीकृतानि । यश्च दासं वर्णं शूद्रादिकं यद्वा दासमुपक्षपयितारमधरं निकृष्टमसुरं गुहा गुहायां गूढस्थाने नरके वा अकः अकार्षीत् । करोतेर्लुङि मन्त्रे घसेत्यादिना च्लेर्लुकि रूपम् । लक्षं लक्ष्यं जिगीवान् । जि जये क्सौ सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वम् । दीर्घश्छान्दसः । जितवान् योऽर्योऽरेः । षष्ठ्येकवचने छान्दसो यणादेशः[2] । शत्रोः संबन्धीनि पुष्टानि समृद्धानि आदत् आदत्ते । तत्र दृष्टान्तः । श्वघ्नीव । श्वभिर्मृगान् हन्तीति श्वघ्नी व्याधः । यथा व्याधो जिघृक्षितं मृगं परिगृह्णाति तद्वत् ॥

*Notes* :

1. च्यवना कृतानि. 'Were overturned.' कृतानि cannot mean स्थिरीकृतानि, as Sāyaṇa would take it. Grassmann's translation 'who is the maker of all that moves' is of course possible. But compare अच्युतच्युत् in verse 9. Note also that if च्यवना is part of the subject of the clause and refers to the common division of the world into that which moves and that which stands still, the want of a word for the other part of the division is much felt. Lastly, the poet seems to have passed from Indra's work of creation, and to be now engaged in describing his subsequent exploits. Compare the next line.

2. दासं वर्णं. 'The hostile colour, dark skin.' A term of reproach then as now in India, in the mouths of those whose skin is whiter. The words दास and दस्यु are used in the Ṛgveda of all the enemies of the Aryans, whether demons or men. Here the reference seems clearly to be, as Sāyaṇa takes it, to the non-Aryan tribes. So also Grassmann. Roth translates 'demon brood.' [ See Muir., Sk. Texts, ii. pp. 358 ff. ][3]

---

[1] M's V. G. S. para 97 A. 1. a and note 14 ( p. 78 ).

[2] N. I. V. pp. 384, 400.

[3] See also Dāsa, Dasyu-in M. and K's Vedic Index, Vol. I, p. 356; M's Vedic Mythology, p. 157; Tribes and Castes of the Central Provinces Vol. I. pp. 16–17.

3. गुहा. A Vedic locative. Roth, followed by Grassmann, takes it to be a shortened instrumental used as an ablative. [ गुहा, occurring fifty-three times, may be an adverb with a recessive accent, from गुहा, like दिवा ; from दिवा or a homophonous Instr. Sing. fem. ( Lanman, Noun-inflection in the Veda, Journ. Amer. Or. Soc., vol. x. ) ][1]

4. श्वघ्नीव यो जिगीवाँ[2] लक्षमादत्. 'As the winning gamester takes the stake.' So Roth by conjecture. Aufrecht 'As a gambler who has won a lac.' The meaning is very uncertain. In four of the five places in which the obscure word श्वघ्निन् occurs it introduces a simile ( श्वघ्नीव ). On i, 92, 10— पुनः पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना । श्वघ्नीव कृत्नुर्विज आ मिनाना मर्तस्य देवी जरयन्त्यायुः— Sāyaṇa's explanation is श्वघ्नीव व्याधस्त्रीव । सा यथा विजश्चलतः पक्षिण आ मिनाना पक्षादिच्छेदनेन हिंसन्ती तेषामायुर्जरयति । ... श्वघ्नी । शुना मृगान्हतवान् श्वहा ।. ( Our verses 4 and 5, taken together give us, it will be seen, an exact parallel to the श्वघ्नीव... विज आ मिनाना of this example ). iv, 20, 3 ( of Indra ) श्वघ्नीव वज्रिन्त्सनये धनानाम्— Sāyaṇa, श्वघ्नीव मृगयुर्मृगानिव. viii, 45, 38 ( of Indra ) श्वघ्नीव— Sāyaṇa, श्वघ्नीव कितव इव. x, 42, 9 ( of Indra ) कृतं यच्छ्वघ्नी वि चिनोति काले— Sāyaṇa, यद्यथा । अत्र प्रकारवचनप्रत्ययस्य लोपो द्रष्टव्यः । श्वघ्नी कितवः कृतं कृतसमयं प्रतिकितवं कितवानां मध्ये विचिनोति परीक्ष्य गृह्णाति तद्वदिन्द्रः काले युद्धकाले बलवन्तं शत्रुं परीक्ष्य वधार्थं गृह्णातीत्यर्थः. x, 43, 5 ( of Indra ) कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत्— Sāyaṇa, श्वघ्नी परस्वानां हन्ता कितवो देवने द्यूते कृतं विचिनोति तद्वदिन्द्रः सूर्यं मृगयते.

Verse 5

*Padapāṭha* :

**यम् स्म पृच्छन्ति कुह सः इति घोरम् उत ईम् आहुः न एषः अस्ति इति एनम् । सः अर्यः पुष्टीः विजःऽइव आ मिनाति श्रत् अस्मै धत्त सः जनासः इन्द्रः ॥ ५**

*Sāyaṇa* :

अपश्यन्तो जना घोरं शत्रूणां घातकं यं पृच्छन्ति स्म कुह सेति स इन्द्रः कुत्र वर्तत इति । सेति । सोचि लोपे चेत्पादपूरणमिति ( Pāṇ. vi, 1, 134 ) सोर्लोपे गुणः । न क्वचिदसौ तिष्ठतीति मन्यमाना जना एनमिन्द्रमाहुः एष इन्द्रो नास्तीति । तथा च मन्त्रः । नेन्द्रो अस्तीति नेम उ त्व आहेति ( Ṛ V. iii. 100, 3 ) ईमिति

1 L's N. I. V. pp. 358, 400; M's V. G. S. para 97 A. 2.

2 jigīvā'n ( see Arnold's Vedic Metre. § 178, p. 298 ). For the sandhi in the Saṁhitāpāṭha, see M's V. G. S. para 40, 3 ( p. 32. )

पूरणः । स इन्द्रो विज इव । इवशब्द एवार्थे । उद्वेजक एव सन् अर्यः अरेः संबन्धीनि पुष्टीः पोषकाणि गवाश्वादीनि धनानि आ मिनाति सर्वतो हिनस्ति । मीङ् हिंसायाम् । मीनातेर्निगम इति ह्रस्वः । तस्मात् श्रदस्मा इन्द्राय धत्त[1] स इन्द्रोस्तीति विश्वासमत्र कुरुत । यद्यप्यसौ विशेषतोस्माभिर्न दृश्यते तथाप्यस्तीति विश्वासं कुरुत । एवं निर्धारणमहिमोपेतः स इन्द्रो नाहमिति ॥

*Notes* :

1. सेति. 'In the Veda, and more rarely in the later language, the rule for the maintenance of the hiatus ( स इति ) is sometimes violated and the remaining contiguous vowels are combined into one.' Whitney ( 1st Edn. ), para. 176. b[2].

2. घोरम्. Take, with Aufrecht, as an adverb. 'In this awful manner.' Roth, Grassmann and Ludwig follow Sāyaṇa, and construe with यम्.

3. ईम्. This word is, in the Veda, a demonstrative accusative with no distinction of gender or number[3]. The object referred to is often as here repeated ( एनम् ).

4. विज इव. The metre shows that we must pronounce vi-je-va. Compare note 1 above. In the former of the two cases of this Vedic Sandhi the written text conforms to the real state of the case : in the latter it does not. Compare note on verse 9 below. ( But Grassmann would read वा for इव here. ) विजः here is not the nominative but the accusative. The word occurs in only one other place, and then in a similar context. ( i, 92, 10 quoted above in note 4, on verse 4. ) It means perhaps gain or stake ( Aufrecht ).

5. श्रदस्मै धत्त. 'Place your trust on him.' श्रत् or श्रद् धा is the Latin credo.[4]

Verse 6

*Padapāṭha :*

यः रध्रस्यं चोदिता यः कृशस्यं यः ब्रह्मणंः नाधंमानस्य कीरेः । युक्तऽग्रांव्णः यः अविता सुऽशिप्रः सुतऽसोंमस्य सः जनासः इन्द्रंः ॥ ६

---

[1] dhattā—Arnold's Vedic Metre, p. 298.

[2] M's V. G. S. para 48a; Pāṇ. vi, 1, 134,—illustrated from Classical Sanskrit by Bhattoji and others ( S. K. ). Note also so'ryaḥ for सो अर्यः suggested in Arnold's Vedic Metre, p. 298.

[3] M's V. G. S. p. 220. [4] Celtic cretim.

*Sāyaṇa* :

यो रधस्य । रध हिंसासंराद्ध्योः । समृद्धस्य चोदिता धनानां प्रेरयिता भवति । यश्च कृशस्य दरिद्रस्य च यश्च नाधमानस्य । नाधृ णाधृ याच्ञोपतापैश्वर्याशीःषु । याचमानस्य कीरेः । करोतेः कीर्तयतेर्वा । स्तोतुर्ब्रह्मणो ब्राह्मणस्य च धनानां प्रेरयिता । यश्च सुशिप्रः शोभनहनुः सुशीर्षको वा सन् युक्तग्रावाः अभिषवार्थमुद्यतग्रावाः सुतसोमस्य अभिषुतसोमस्य यजमानस्य अविता रक्षिता भवति स एवेन्द्रो नाहमिति । ब्रह्मशब्दस्य त्वन्नपरत्वे ह्याद्युदात्तता स्यात् । यथा ब्रह्म वन्वानो अजरं सुवीरमिति ( ṚV. iii. 8, 2 ) अयं त्वन्तोदात्तः पठ्यत इति नान्नपरः ॥

*Notes* :

1. रध्रस्य चोदिता. A favourite epithet of Indra. Cf. ii, 21, 4 रध्रचोदः— Sāyaṇa, रध्र हिंसासंराद्ध्योः । रध्राणां समृद्धानां प्रेरकः । यद्वा हिंसकानां शत्रूणां चोदकः. vi, 44, 10 किमङ्ग रध्रचोदनं त्वाहुः— Sāyaṇa, अङ्ग हे इन्द्र त्वा त्वां रध्रचोदनं रध्रस्य राधकस्य समृद्धस्य धनस्य चोदनं चोदयितारमाहुः कथयन्ति पुराजाः. viii, 80, 3 किमङ्ग रध्रचोदनः— Sāyaṇa, हे इन्द्र त्वं रध्रचोदनः । रध्रं राधकं चोदयतीति रध्रचोदनः. x, 38, 5 रध्रचोदनम्— Sāyaṇa, राधकस्य चोदनम् प्रेरकम्.

But the meaning of रध्र is uncertain. The simple word occurs in only three other passages. ii, 34, 15 यया रध्रं पारयथात्यंहो, 'with that ( help ) by which you carry the 'radhra' across dangers ( to the Maruts )." Sāyaṇa, रध्रमाराधकं यजमानम्. vii, 56, 20 इमे रध्रं चिन्मरुतो जुनन्ति— Sāyaṇa, इमे मरुतो रध्रं चित् समृद्धमपि जनं जुनन्ति प्रेरयन्ति. ( These two last passages taken together show that Sāyaṇa is no safe guide as to this word, as indeed he does not profess to be. For रध्र in these two passages must mean the same thing ). x, 24, 3 यस्पतिर्वार्याणामसि रध्रस्य चोदिता ( of Indra ). Sāyaṇa, हे इन्द्र यस्त्वं वार्याणां वरणीयानां धनानां पतिरसि स्वामी भवसि । रध्रस्य राधकस्य स्तोतुश्च चोदिता धनदानेन कर्मसु नियोक्ता च भवसि.

In vi, 18, 4 we have अरध्र and another compound with रध्र—

सदिद्धि ते तुविजातस्य मन्ये
सहः सहिष्ठ तुरतस्तुरस्य ।
उग्रमुग्रस्य तवसस्तवीयोऽ-
रध्रस्य रध्रतुरो बभूव ॥

Sāyaṇa अरध्रस्य शत्रुभिर्वशीकर्तुमशक्यस्य । रधेर्वशीकरणार्थस्य रूपम् । रध्रतुरो वशीकरणीयानां सपत्नानां हिंसकस्य तव &c. In vi, 62, 3 we have the only other passage in which अरध्र occurs : ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्थाधिय ऊहथुः शश्वदश्वैः ( of the Aśvins— Sāyaṇa, ता ह तौ खलु उग्रा उग्रौ अश्विनौ युवां यदरध्रमसमृद्धं त्यद्वर्तिर्यजमानस्य तद्गृहं समर्थयितुं गच्छतः &c.

In the St. Petersburg Dictionary under रध्र Roth ( who had previously given not lazy as the meaning of अरध्र ) derives the word from रध=अर्ध् ( ऋध् ) and compares the Zend aredra. For the meaning he gives Sāyaṇa's double explanation of rich, or he who pleases the gods, righteous. Grassmann believes that the word means weary. In the Siebenzig Lieder रध्रस्य and कृशस्य here are rendered by 'the rich and the poor.' Aufrecht translated 'who is a furtherer of an honest man and of a poor man.'

[ In vi, 62, 3 ( quoted above ) अरध्र is an epithet of the *vartis* or path of the Aśvins. This path is spoken of as गोमत, हिरण्यवत्, अश्वावत्, इरावत, &c. अरध्र must, therefore, mean not poor, not miserly, *i. e*, rich, liberal. रध्रस्य चोदिता would mean he who impels the miser to be liberal. Cf. vi, 53, 3. रध्रस्य alone is to be connected with चोदिता. The other Genitives, *viz*., कृशस्य ब्रह्मणो नाधमानस्य कीरेः, युक्तग्राव्णः, सुतसोमस्य, with अविता. Cf. किमङ्ग रध्रचोदनः सुन्वानस्यावितेदसि ( viii, 80, 3 ); यस्पतिर्वार्याणामसि रध्रस्य चोदिता । इन्द्र स्तोतृणामविता ( x, 24, 3 ) &c.— Pischel, Ved. St., i, pp. 125–6.

2. ब्रह्मन् n. [ *Nomina actionis* ] a hymn, a prayer.

ब्रह्मन् m. [ *Nomina agentis* ] ( 1 ) composer or repeater of a hymn of prayer, contemplator, sage or poet; ( 2 ) a minister of public worship, a worshipper or priest; ( 3 ) one particular kind of priest with special duties as distinguished from होतृ &c. In some texts ब्रह्मन् *m.* seems to designate a 'priest by profession.'— Muir, i, pp. 241–258.

3. कीरेः. All the passages in the RV. where the word कीरि occurs fall into two groups. In one of them the word is always followed by the particle चिद् ( = अपि ). That fact itself indicates that कीरि means something that is in some way or other not quite propitious or favourable. If we were to consider all the passages and compare the expression कीरिचोदन, it will, I believe, be found that the repeated proof of the word meaning 'small', 'wretched', 'poor' is firmly established. In i, 31, 13, *e. g*., कीरि is contrasted with रातहव्य ( he who brings offerings ). In x, 41, 2 the यज्ञ of a Kīri is contrasted with a होतृमत् ( possessed of a होतृ ) यज्ञ, which means a big and costly sacrifice. In viii, 103, 13 again, कीरि is contrasted with रातहव्यः स्वध्वरः. कीरिणा, in i, 100, 9c, corresponds to अनाशुना अर्वता in vi, 45, 2, a passage containing a similar idea. Also cf. यस्त्वा हृदा कीरिणा ( with an humble heart ) मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि । v, 4, 10.

कीरि is thus a synonym of स्तु - Abridged from Pischel, Ved.St., i, 216-228 and 129 ].

Verse 7

*Padapāṭha* :

यस्यं अश्वांसः प्रऽदिशिं यस्यं गावंः यस्यं ग्रामांः यस्यं विश्वें रथांसः । यः सूर्यंम् यः उषसंम् जजानं यः अपाम् नेता सः जनासः इन्द्रंः ॥ ७

*Sāyaṇa* :

यस्य सर्वान्तर्यामितया वर्तमानस्य प्रदिशि प्रदेशने अनुशासने अश्वासः अश्वा वर्तन्ते यस्यानुशासने गावः यस्यानुशासने ग्रामाः । ग्रसन्तेत्रेति ग्रामा जनपदाः । यस्याज्ञायां विश्वे सर्वे रथासः रथा वर्तन्ते यश्च वृत्रं हत्वा सूर्यं जजान जनयामास यश्चोषसम्[1] । तथा मन्त्रः । जजान सूर्यमुषसं सुदंसा इति ( Ṛ V. iii, 32, 8 ) । यश्च मेघभेदनद्वारापां नेता प्रेरकः स इन्द्र इत्यादि प्रसिद्धम् ॥

Verse 8

*Padapāṭha* :

यम् क्रन्दंसीइतिं संयतीइतिं संऽयती विह्वयेंतेइतिं विऽह्वयेंते परें अवंरे उभयांः अमित्रांः । समानम् चित् रथंम् आतस्थिऽवांसां नानां ह्वेतेइतिं सः जनासः इन्द्रंः ॥ ८

*Sāyaṇa* :

यं क्रन्दसी रोदसी शब्दं कुर्वाणे मानुषी दैवी च द्वे सेने वा संयती परस्परं संगच्छन्त्यौ यमिन्द्रं विह्वयेते स्वरक्षार्थं विविधमाह्वयतः । परे उत्कृष्टाः अवरे अधमाश्च उभया उभयविधा अमित्राः शत्रवः यमाह्वयन्ति । समानम् इन्द्ररथसदृशं रथम् आतस्थिवांसा आस्थितौ द्वौ रथिनौ तमेवेन्द्रं नाना पृथक् ह्वेते आह्वयेते । यद्वा । समानमेकरथमारूढाविन्द्राग्नी ह्वेते यज्ञार्थं यजमानैः पृथगाहूयेते । तयोरन्यतरः स इन्द्रो नाहमिति ॥

*Notes* :

1. Notice here the use of इति in the Pada text. It is always put to call attention to a dual ; and then the word, if a compound, is repeated that the compound may be separated into its two parts.

---

[1] Uṣā'sam, Arnold's Ved. Metre, pp. 29, 85; also § 170 ii a, p. 130.

2. क्रन्दसी. The two shouting armies are not, as Sāyaṇa supposes, gods and men in conflict. The reference is to two armies of men locked in fight ( संयती ) and each invoking the aid of the god of battle. Compare the next verse.

3. परेवर उभया ( nom. pl. ) अमित्राः. ' Those on this side and those on that, foes to each other.' [ उभयाः is never used in the dual. ]

4. The two on the same chariot are the driver and the fighting man. They also have their several prayers.

Verse 9

*Padapāṭha* :

यस्मा॑त् न ऋ॒ते वि॒ऽजय॑न्ते जना॑सः यम् यु॒ध्य॑मानाः अव॑से हव॑न्ते । यः विश्व॑स्य प्र॒ति॒ऽमान॑म् ब॒भूव॑ यः अ॒च्यु॒त॒ऽच्युत् सः ज॒ना॒सः इन्द्रः ९

*Sāyaṇa* :

यस्माद्दते जनासो जना न विजयन्ते विजयं न प्राप्नुवन्ति । अतः युध्यमाना युद्धं कुर्वाणा जना अवसे स्वरक्षणाय यमिन्द्रं हवन्ते आह्वयन्ति । यश्च विश्वस्य सर्वस्य जगतः प्रतिमानं प्रतिनिधिर्बभूव यश्चाच्युतच्युत् अच्युतानां क्षयरहितानां पर्वतादीनां च्यावयिता स इन्द्र इत्यादि प्रसिद्धम् ॥

*Note* :

न ऋते. The metre shows that we must pronounce nar-te. ' In the Vedic texts the vowel *ṛ* is written unchanged after the *a*- vowel, which, if long, is shortened : thus, महऋषिः instead of महर्षिः. The two vowels, however, are usually pronounced as one syllable.'[1] Whitney, para, 127 a. The written text then follows a supposed uniform law to which the actual occurrences do not correspond.

Varse 10

*Padapāṭha* :

यः शश्व॑तः महि॑ एनः॑ दधा॑नान् अम॑न्यमानान् शर्वा॑ ज॒घान॑ । यः शर्ध॑ते न अ॒नु॒ऽददा॑ति शृ॒ध्याम् यः दस्योः॑ ह॒न्ता सः ज॒ना॒सः इन्द्रः॑ ॥ १०

*Sāyaṇa* :

यो महि महदेनः पापं दधानान् शश्वतो बहूनमन्यमानाम् आत्मानमजानत इन्द्रमपूजयतो वा जनान् शर्वा । शृणाति शत्रूननेनेति शरुर्वज्रः । तेनायुधेन ।

[1] M's V. G. S. para 19 a.

हन्तेर्लिटि रूपम् । यश्च शर्धते उत्साहं कुर्वते अनात्मज्ञाय जनाय शृध्यामुत्साहनीयं कर्म नानुददाति न प्रयच्छति । अनुपूर्वात् डुदाञ् दाने जौहोत्यादिकः । अभ्यस्तानामादिरिति ( Pāṇ. vi, 1 189 ) तिङि चोदात्तवतीति ( Pāṇ. viii, 1, 71 ) गतेर्निघातः । यश्च दस्योरुपक्षपयितुः शत्रोर्हन्ता घातकः स इन्द्र इत्यादि पूर्ववत् ॥

[ *Note* :

Pronounce mahi-eno ( 1. 1 ) & śaru-ā ( 1. 2 ).

अनुददाति., अनुदा = concede, yield, forgive. Cf. अना(न)नुदो वृषभो दोधतो वधो...रध्रचोदः... इन्द्रः...उषसः स्वर्जनत् ( ii, 21, 4 ); अना (न)नुदो वृषभो जग्मिराहवं निष्टप्ता शत्रुं पृतनासु सासहिः असि... ( ii, 23, 11 ). अननुदः = not yielding, not surrendering— Ved. Hymns, i. p. 199. ]

Verse 11

*Padapāṭha* :

यः शम्बरम् पर्वतेषु क्षियन्तम् चत्वारिंश्याम् शरदि अनुऽअविन्दत् । ओजायमानम् यः अहिम् जघान दानुम् शयानम् सः जनासः इन्द्रः ॥ ११

*Sāyaṇa* :

यः पर्वतेषु क्षियन्तम् इन्द्रभिया बहून संवत्सरान्प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं शम्बरमेतन्नामकं मायाविनमसुरं चत्वारिंश्यां शरदि चत्वारिंशे संवत्सरे अन्वविन्दत् अन्विष्यालभत । लब्ध्वा च य ओजायमानं । कर्तुः क्यङ सलोपश्च । ओजसोप्सरसो नित्यमिति सकारलोपः (Pāṇ.iii, 1, 11, 2) । बलमाचरन्तमहिं[1]-माहन्तारं दानुं दानवं शयानं शम्बरमसुरं जघान हतवान् स इन्द्रो नाहमिति ॥

[ *Notes* :

1. शम्बरम्. 'Prof. Roth remarks as follows ( Lit. and Hist. of the Veda, p. 116 ) : 'In the passages which speak of Divodāsa, mention is made of his deliverance, by the aid of the gods, from the oppressor, Śambara, *e. g.*, ṚV. i, 112, 14; ix, 61, 2. It is true that Śambara is employed at a later period to designate an enemy in general, and in particular the enemy of Indra, Vṛtra; but it is not improbable that this may be the transference of the more ancient recollection of a dreaded enemy to the greatest of all enemies, the demon of the clouds.'[2] ( See, however, p. 368 above. )'— Muir, p. 389.

---

[1] M's Ved. Myth. pp. 152, 158. *Cf.* The Iranian Azhi ( a serpent ) Dahāka and the Hebrew Serpent ( Satan ). See *inter alia*, Moulton's Early Zoroastrianism, pp. 70, 130, 147. [2] M's Ved. Myth. p. 161.

2. चत्वारिंश्यां शरदि. For a new interpretation proposed of this expression here, see Tilak 'The Arctic Home in the Vedas,' pp. 280–3. The meaning assigned is 'On the *fortieth* ( scil. *tithi* or day ) in autumn.' ]

Verse 12

*Padapāṭha :*

**यः सप्तऽरश्मिः वृषभः तुविष्मान् अवऽअसृजत् सर्तवे सप्त सिन्धून् । यः रौहिणम् अस्फुरत् वज्रऽबाहुः द्याम् आऽरोहन्तम् सः जनासः इन्द्रः ॥ १२**

*Sāyaṇa :*

यः सप्तरश्मिः सप्तसंख्याकाः पर्जन्या रश्मयो यस्य । ते च रश्मयो वराहवः स्वतपसो विद्युन्महसो धूपयः श्वापयो गृहमेधाश्चेत्येते ये चेमेऽशिमिविद्विषः पर्जन्याः सप्त पृथिवीमभिवर्षन्ति वृष्टिभिरिति तैत्तिरीयारण्यके ( T. Ā. i, 9, 4–5 ) ह्याम्नाताः । वृषभो वर्षकस्तुविष्मान् वृद्धिमान्बलवान्वा सप्त सर्पणस्वभावान् सिन्धूनपः सर्तवे सरणाय अवासृजत् अवसृष्टवान् । यद्वा । गङ्गाद्याः सप्त मुख्या नदीरसृजत् । यश्च वज्रबाहुः सन् द्यां दिवमारोहन्तं रौहिणमसुरम् अस्फुरत । जघान । स्फुरणे तुदादिः ॥

*Notes :*

सर्तवे. A Vedic infinitive.[1] [ See Whitney, para, 970 b. ] Compare the latter part of note 1 on No. 3, verse 4.

Verse 13

*Padapāṭha :*

**द्यावा चित् अस्मै पृथिवीइति नमेतेइति शुष्मात् चित् अस्य पर्वताः भयन्ते । यः सोमऽपाः निऽचितः वज्रऽबाहुः यः वज्रऽहस्तः सः जनासः इन्द्रः ॥ १३**

*Sāyaṇa :*

अस्मै इन्द्राय द्यावा पृथिवी । इतरेतरापेक्षया द्विवचनं[2] प्र मित्रयोर्वरुणयोरितिवत् ( Ṛ̣V. vii, 66, 1 ) । नमेते स्वयमेव प्रह्वीभवतः । णमु प्रह्वत्वे[3] । कर्मकर्तरि न दुहस्नुनमां यक्चिणाविति यकः प्रतिषेधः ( Pāṇ.iii, 1, 89 ) । चिदपि न अस्येन्द्रस्य शुष्माद्बलात्पर्वता भयन्ते बिभ्यति । यः सोमपाः सोमस्य पाता निचितः सर्वैः । यद्वा । अन्येभ्योऽपि देवेभ्यो दृढाङ्गः । वज्रबाहुः । वज्रसदृशबाहुः । यश्च वज्रहस्तः वज्रयुक्तः स इन्द्र इत्यादि प्रसिद्धम् ॥

---

[1] M's V. G. S. para, 167, 1 b 4. [2] M's V. G. S. para, 186, A 1.

[3] Av. √nam–to bow, bend...(Jackson.)

Verse 14

*Padapāṭha* :

यः सुन्वन्तम् अवति यः पचन्तम् यः शंसन्तम् यः शशमानम् ऊती । यस्य ब्रह्म वर्धनम् यस्य सोमः यस्य इदम् राधः सः जनासः इन्द्रः ॥ १४

*Sāyaṇa* :

यः सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानमवति रक्षति । यश्च पुरोडाशादीनि हवींषि पचन्तं यश्च ऊती ऊतय । सुपां सुलुगिति ( Pāṇ.vii. 1. 39 ) चतुर्थ्याः[1] पूर्वसवर्णदीर्घः । स्वरक्षार्थे शस्त्राणि शंसन्तं यश्च शशमानमवति स्तोत्रं कुर्वाणं रक्षति । ब्रह्म परिवृढं स्तोत्रं यस्य वर्धनं वृद्धिकरं भवति । तथा यस्य सोमो वृद्धिहेतुर्भवति । यस्य चेदमस्मदीयं राधः पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति । स इन्द्र इत्यादि प्रसिद्धम् ॥

*Notes :*

[ 1. शशमानम्.[2] Perf. Part. of शम्. The original meaning 'to work, to labour, to be active' appears throughout in the ṚV. and from it comes the later meaning 'to be tired, to rest,' just as in the case of the Gr. kàm-no. Among other things it means 'to be active in the service of the gods ( by offerings ), to pray zealously.— *Gr.* ]

2. ऊती. A Vedic instrumental.[3] 'The yā ( instr. ) of ī-stems is in a few Vedic examples contracted to ī, and even to i.' ( Whitney, para, 363 d. ) It is not, of course, certain that contraction of yā to ī is what has taken place in such cases.

Verse 15

*Padapāṭha* :

यः सुन्वते पचते दुध्रः आ चित् वाजम् दर्दर्षि सः किल असि सत्यः । वयम् ते इन्द्र विश्वह प्रियासः सुऽवीरासः विदथम् आ वदेम ॥ १५

*Sāyaṇa :*

इदानीमृषिः साक्षात्कृतमिन्द्रं प्रति ब्रूते । हे इन्द्र यो दुध्रो दुर्धरः सन् सुन्वते सोमाभिषवं कुर्वते पुरोडाशादिहवींषि पचते यजमानाय वाजमन्नं बलं वा दर्दर्षि भृशं प्रापयासि स तादृशस्त्वं सत्यो यथार्थभूतोसि । न पुनर्नास्तीति बुद्धियोग्योसि । किलेति प्रसिद्धौ । ते तव प्रियासः सुवीरासः कल्याणपुत्रपौत्राः सन्तो वयं विश्वह[4] सर्वेष्वहःसु विदथं स्तोत्रम् आ वदेम ब्रूयाम ॥

---

[1] M's V. G. S. p. 81 note 4.

[2] M's V. G. S. App. 1. p. 422.

[3] M's V. G. S. pp. 80, 81.

[4] M's V. G. S. para 179 p. 212.

## No. 7

*Maṇḍala* III *Sūkta* 59

*Sāyaṇa* :

मित्रो जनानिति नवर्चं षष्ठं सूक्तं वैश्वामित्रं त्रैष्टुभं मैत्रम्। मित्रो मैत्रं चतुर्गायत्र्यन्तमित्यनुक्रमणिका। आदितः पञ्च त्रिष्टुभः शिष्टाश्चतस्रो गायत्र्यः। मित्रो देवता। अग्निहोत्रार्थे पयसि वर्षबिन्दुपतने मित्रो जनानित्यनया समिधमादध्यात्। सूत्रितं च मित्रो जनान्यातयति ब्रुवाण इति समिदाधानमिति (Āśval.iii. 11)॥

[ *Note* :

Translated in Muir's " Sanskrit Texts," vol. v, p. 69. ]

Verse 1

*Padapāṭha* :

**मित्रः जनान् यातयति ब्रुवाणः मित्रः दाधार पृथिवीम् उत द्याम्। मित्रः कृष्टीः अनिऽमिषा अभि चष्टे मित्राय हव्यम् घृतऽवत् जुहोत ॥ १**

*Sāyaṇa :*

ब्रुवाणः स्तूयमानः शब्दं कुर्वाणो वा मित्रः। प्रकर्षेण सर्वैर्मीयते तथा सर्वान्वृष्टिप्रदानेन त्रायत इति वा मित्रः सूर्यः। जनान् कर्षकादिजनान्यातयति कृष्यादिकर्मसु प्रयत्नं कारयति। तथा मित्र एव पृथिवीम् उत[1] अपि च द्यामेतावुभौ लोकौ वृष्टिद्वारान्नं यागांश्च जनयन् दाधार धारयति। तथा सति मित्रः अनिमिषा अनिमिषेणानुग्रहदृष्ट्या कृष्टीः कर्मवतो मनुष्यानभि चष्टे सर्वतः पश्यति। एतत्सर्वं ज्ञात्वा हे ऋत्विजो घृतवदुपस्तरणाभिघारणयुक्तं हव्यं हवनयोग्यं पुरोडाशादिकं तस्मै मित्राय देवाय जुहोत जुहुत प्रयच्छतेत्यर्थः। उक्तार्थं यास्को ब्रवीति। मित्रो जनान्यातयति ब्रुवाणः शब्दं कुर्वन्। मित्र एव धारयति पृथिवीं च दिवं च मित्रः कृष्टीरनिमिषन्नभिविपश्यतीति। कृष्टय इति मनुष्यनाम कर्मवन्तो भवन्ति विकृष्टदेहा वा[2]। मित्राय हव्यं घृतवज्जुहोतेति व्याख्यातम्। जुहोतिर्दानकर्मेति ( Nir. x, 22 )। यातयति। यती प्रयत्न इत्यस्य ण्यन्तस्य लटि रूपम्। दाधार तुजादीनामित्यभ्यासस्य दीर्घः ( Pāṇ. vi, 1, 7 )। जुहोत जुहोतेर्लोटि प्रत्ययस्य तवादेशः। गुणः। निघातः॥

---

[1] M's V. G. S. para 180 *sub voce* pp. 222–23.

[2] Skt. √ kṛṣ karṣ = Av. √ karṣ–to draw, to draw furrows, to plow ( Jackson ).

*Notes* :

मित्रो[1] जनान्यातयति ब्रुवाणो 'Mitra speaks, and the people are arrayed.' The alternative explanation which Sāyaṇa suggests for ब्रुवाणः need not detain us. The word expresses the same idea as that which we have in the 'God said, Let there be light, and there was light,' of the Bible (Genesis i, 3). Mitra speaks, and it is done. But the meaning of यातयति is uncertain. यातयज्जनः (for the form of the compound see note 2 on verse 5 below) occurs, as an epithet of Mitra and other gods, in four passages of the Ṛgveda: i, 136, 3, मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः— Sāyaṇa, तयोः मित्रावरुणयोः यातयज्जनः तयोरेव संबन्धाद्रुभयोर्मध्ये स्थितो यातयज्जनः स्वस्वव्यापारनियोजितसर्वजनः। मित्रावरुणौ अहोरात्रदेवौ[2]। अर्यमा तु तयोरेव सामर्थ्यात्सर्वप्राणिनः प्रेरयतीत्यर्थः। किंच यातयज्जनः यातयन्ति लोके यदीया जनाः प्रेष्याः स तादृशः। यद्वा यात्यमाना नरके निपात्यमाना जनाः प्राणिनः अयष्टारो येन स तादृशः। कर्मसाक्षित्वात्स्वकर्मानुरोधेन प्राणिनः सुकृते यातयतीत्यर्थः। तादृशोर्यमा मित्रावरुणयोरधीनो वर्तत इति शेषः The second passage is verse 5 of our hymn. For Sāyaṇa's note there see below. v, 72, 2, यातयज्जना (of Mitra and Varuṇa)— Sāyaṇa, यातयन्तः कर्मसु प्रवर्तयन्तो जना ऋत्विजो ययोस्तौ यातयज्जनौ। अथवा यातयन्तः शत्रून्हिंसन्तो जना भृत्या ययोस्तौ. vii, 102, 12, तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम्। मित्रं न यातयज्जनम्— Sāyaṇa, हे विप्र मेधाविन्स्तोतः अर्वन्तं न अश्वमिव सानसिं संभजनीयं शुष्मिणं बलिनं मित्रं न सखायमिव यातयज्जनं हतशत्रुजनं तमग्निं गृणीहि स्तुहि (the passages already quoted make it certain that Mitra here too is a proper name, and that यातयज्जनं is to be construed with it, instead of, or as well as, with अग्नि).

I translate Roth's note, S. L., p. 18.

'Compare Ṛgveda vii, 36, 2 :

इमां वां मित्रावरुणा सुवृक्ति-
मिषं न कृण्वे असुरा नवीयः।
इनो वामन्यः पदवीरदब्धो
जनं च मित्रो यतति ब्रुवाणः॥

---

[1] **Mitra.** Sk. Mitra = Mi-it-ra of the Boghaz-kōi inscription (See M. and K's Vedic Index, Vol. I, preface, p. viii.) = Av. Mithra. = Mihir of later Persian. For the characteristics and functions of this god see M's V. M. § Mitra; Muir's S. T. Vol. V, sec. V; Hopkin's Rel. Ind., pp. 67, 69; Moulton's Early Zoronstrianism, pp. 62–67. For the etymology of the word, see Nigh, Com. Adh. V *sub voce*, (Bib. Ind. Ed. p, 479); M's Ved. Myth., p. 30.

[2] Muir's S. T. sec. V (6), p. 70; T. Br. i, 7, 10, 1; Sāy. on ṚV. i, 89, 3 and i, 141, 9.

This hymn of praise I bring you, Varuṇa and Mitra, once again to you, O spirits, a sweet oblation: one of you is for us a strong sure leader, the other, Mitra, by his word holds the folk in order.

Compare also v, 65, 6. The action of Mitra is compared to that of a commander, whose word arrays and guides the ranks.'

[ Geldner ( Ved. St., iii, pp. 11-26 ) यतते intr. ( *e. g.* वैश्वानरो यतते सूर्येण, i, 98, 1 ; V. S., 26, 7 — Mahidhara, स्पर्धते सूर्यसमतेजा इत्यर्थः ). यतति sometimes intr., but generally tr. and equivalent to यातयति. यत् has the sense of resembling, being of equal birth, emulation, matching, outbidding, seeking to surpass, and, as in classical Sk., of being active, striving ; the causal sense being to spur someone to rivalry or emulation, to set a good example. Other senses of यत् are rivalry in a bad sense, jealousy, quarrelling and to make haste, to be quick, to march.

For the sense of ब्रुवाणः Ātm. he compares कथं सोऽनुशिष्टो ब्रुवीत ( Chānd. Up. 5, 3, 4 ), कथं नु नो ब्राह्मिष्ठो ब्रुवीत ( M. S. 1, 6, 9 ), &c., in addition to the passages cited in the St. Pet. Lex. under the second sense of ब्रू and takes it to mean calling himself. 'Calling himself Mitra ( friend ) he sets men a good example.' Cf. V. S. 27, 5 मित्रेणाग्ने मित्रधेये यतस्व 'vie wirh Mitra in friendship, O Agni.' यातयज्जनः below he similarly takes to mean 'setting a good example to men.' ]

2. दाधार. See note 5 on No. 5, verse 4[1] ( p. 109 ).

3. अनिमिषा. 'With eyes that sleep not.' An adverb ( instrumental in form ). The form occurs again in vii, 60, 7. इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति— Sāyaṇa, इमे मित्रादयो दिवो द्युलोकस्य पृथिव्याश्च संबन्धिनः अनिमिषा अनिमिषेण सर्वदा चिकित्वांसः जानन्तः । कम् । अचेतसमज्ञानं नयन्ति प्रापयन्ति कर्माणि.

Verse 2

*Padapāṭha* :

प्र सः मित्र मर्तः अस्तु प्रयस्वान् यः ते आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वाऽऊतः न एनम् अंहः अश्नोति अन्तितः न दूरात् ॥ २

*Sāyaṇa* :

देवसुवां हविःषु मित्रस्य सत्यस्य प्र स मित्रेति याज्या । एषैव प्रातर्होमस्य कालात्ययनिमित्ते मैत्रे चरौ याज्या । सूत्रितं च । प्र स मित्र मर्तो अस्तु प्रयस्वांस्त्वां

[1] M's V. G. S. App. I, √ dhṛ p. 393.

नष्टवान्महिमाय पृच्छत इति ( Āśval. iv, 11 ) । तत इष्टिर्मित्रः सूर्योऽभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वानिति संस्थितायामिति च ( Āśval. iii, 12 ) ॥

हे आदित्य व्रतेन यज्ञेन युक्तो यो मनुष्यस्ते तुभ्यं शिक्षति हविर्लक्षणमन्नं ददाति । हे मित्र स मर्तो[1] मनुष्यः प्रयस्वान् अन्नवान् प्र अस्तु प्रभवतु । त्वोतस्त्वया रक्षितः स मनुष्यः केनापि न हन्यते न बाध्यते न जीयते नाभिभूयते च । एनं तुभ्यं हविर्दत्तवन्तं पुरुषमंहः पापमन्तितः समीपान्नाश्नोति न प्राप्नोति दूरादपि न प्राप्नोति । शिक्षतिर्दानकर्मा । व्यत्ययेन परस्मैपदम् । यद्वृत्तयोगादनिघातः । जीयते । जयतेः कर्मणि यक्यकृत्सार्वधातुकयोरिति दीर्घः । त्वोतः तृतीया कर्मणीति पूर्वपदस्वरः ( Pāṇ. vi, 2, 48 ) अश्नोति । अशू व्याप्तौ । स्वादिः । व्यत्ययेन परस्मैपदम् ॥

*Note* :[2]

शिक्षति. 'Seeks to serve thee.' The desiderative of the Vedic root शक् ( शग्धि, &c. ) to help. See below note 1 on No. 20, verse 3 (p. 208). For the 4th Pāda read f. n. 2 below.

Verse 3

*Padapāṭha :*

**अनमीवासः इळया मदन्तः मितऽज्ञवः वरिमन् आ पृथिव्याः । आदित्यस्य व्रतम् उपऽक्षियन्तः वयम् मित्रस्य सुऽमतौ स्याम ॥ ३**

*Sāyaṇa :*

देवसुवां हविःषु मित्रस्य सत्यास्यानुवाक्या । अनमीवास इळया मदन्तः प्र स मित्र मर्तो अस्तु प्रयस्वानिति सूत्रितम् ( Āśval. iv, 11 ) ॥

हे मित्र अनमीवासो रोगवर्जिता इळयान्नेन मदन्तो माद्यन्तः पृथिव्याः वरिमन्विस्तीर्णे प्रदेशे मितज्ञवो मितजानुका आ यथाकामं सर्वत्र गच्छन्त आदित्यस्य संबन्धि व्रतं कर्मोपक्षियन्तस्तस्य कर्मणः समीपे निवसन्तस्तदीयं कर्म कुर्वाणा इत्यर्थः । तादृशा वयं मित्रस्यादित्यस्य सुमतौ शोभनायामनुग्रहबुद्ध्यां स्याम वर्ते-

---

1 Av. maretan-mortal, man.

2 '2d hypersyllabic verse, §224: Sandhi combination of all the words in the first part of the verse is unlikely'.—Arnold's Vedic Metre, p. 300. 'Hypersyllabic verses containing thirteen syllables ( Triṣṭubh ) or fourteen syllables ( Jagatī ) are usually formed by an extension of the rhythm of the cadence. They appear to be characteristic of the archaic period, but there are also several occurrences in the popular ( later ) Ṛgveda'. *Ibid*, p. 208.

महि । मदन्तः । मर्दा हर्षे इत्यस्य शतरि व्यत्ययेन शप् । मितज्ञवः । जानुशब्दस्य ज्ञुश्छान्दसः । वरिमन् उरुशब्दात्पृथ्वादित्वादिमनिच् । प्रियस्थिरेत्यादिना वरादेशः । सुपां सुलुगिति सप्तम्या लुक् । व्यत्ययेनाद्युदात्तः ॥

*Notes :*

मितज्ञवः. This word occurs in three other places only : vi, 32, 3, स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय— Sāyaṇa, पुरुकृत्वा बहुकर्मकृत्स इन्द्रो वह्निभिः हविषां वोढृभिः ऋक्वभिः स्तोतृभिः शश्वत्सर्वदा मितज्ञुभिः संकुचितजानुभिरङ्गिरोभिः सह गोषु निमित्तभूतेषु जिगाय आसुराञ्जितवान्. vii, 82, 4, युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः— Sāyaṇa, हे इन्द्रावरुणौ वह्नयो हविषां स्तोत्राणां वा वोढारः ऋत्विजः युत्सु युद्धेषु पृतनासु शत्रुसेनासु रक्षणार्थं युवामित् युवामेव हवन्ते आह्वयन्ति । मितज्ञवः संकुचितजानुकाः अंगिरसोपि क्षेमस्य रक्षणस्य प्रसवे उत्पादने निमित्तभूते सति युवामेव हवन्ते. vii, 95, 4, उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् । मितज्ञुभिर्नमस्यैरियाना— Sāyaṇa, उत अपि च जुषाणा प्रीयमाणा सुभगा शोभनधना स्या सा सरस्वती नोस्माकमस्मिन्यज्ञ उप श्रवत् अस्मदीयाः स्तुतीरुपशृणोतु । कीदृशी सा । मितज्ञुभिः प्रह्वैर्जानुभिः नमस्यैः नमस्कार्यैर्देवैः इयाना उपगम्यमाना. Roth explains the word as meaning having well-fixed, firm knees ( firm of foot, S. L. ) ; so also Grassmann, 'having upright knees ( that is, knees which do not sink together )'. Ludwig takes it to be a technical term, and notes that the position referred to is described by Haug.

2. वरिमन्. 'Throughout both Veda and Brāhmaṇa an abbreviated form of the loc. sing. [ of nouns in *an* ] with the ending i omitted, or identical with the stem, is of considerably more frequent occurrence than the regular form : thus *Mūrdhan, karman, adhvan,* beside *mūrdhaṇi etc.* '— Whitney, para, 425c.[1]

3. आ. 'In.' A preposition governing वरिमन्. Compare note 1 on No. 2, verse 15 ( p. 76 ).

Verse 4

*Padapāṭha :*

**अयम् मित्रः नमस्यः सुऽशेवः राजा सुऽक्षत्रः अजनिष्ट वेधाः । तस्य वयम् सुऽमतौ यज्ञियस्य अपि भद्रे सौमनसे स्याम ॥ ४**

*Sāyaṇa :*

अयं पूर्वमन्त्रे प्रतिपादितो मित्रः सूर्यः नमस्यः[2] सर्वैर्नमस्करणीयः सुशेवः शोभनसुखः । सुखेन सेव्य इत्यर्थः । राजा सर्वस्य जगतः प्रकाशप्रदानेन स्वामी । सुक्षत्रः । क्षत्रशब्देन बलमुच्यते । शोभनबलोपेतः वेधाः सर्वस्य जगतो विधाता एवंगुणोपेतः

---

[1] M's V. G. S. para 90. 2 ( p. 67 ).  [2] Av. $\sqrt{}$ nam to bow, bend.

सूर्यः अजनिष्ट प्रादुरभूत् । तस्यैवंविधगुणोपेतस्य यज्ञियस्य[1] यज्ञार्हस्य सूर्यस्य सुमतौ[2] शोभनायां बुद्धौ भद्रे कल्याणकारिणि सौमनसे सौमनस्ये अपि यजमाना वयं स्याम भवेम । नमस्यः नमसि साधुः । तत्र साधुरिति यत । तित्स्वरितः ( Pāṇ. vi, 5, 185 ) । अजनिष्ट । जनी प्रादुर्भाव इत्यस्य लुङि सिचि रूपम् । सौमनसे । सुमनस इदमित्यर्थे तस्येदमित्यण् । प्रत्ययस्वरः ( Pāṇ. iii, 1, 3 ) ॥

*Note* :

सुशेवः. 'Kind.' Compare vii, 48, 4, पितेव सोम सूनवे सुशेवः. Also i, 91, 15, सखा सुशेव एधि नः, and Sāyaṇa's note there : सुशेवो अस्मभ्यं दातव्येन शोभनेन सुखेन युक्तः सन् सखा एधि हितकारी भव. The word is applied to a friend, i, 187, 3 : ii, 1, 9 ; to a son, v, 42,2 : vii, 4 ; 8 ; to a mother, x, 18, 10 ; to a wife, A. V. xiv, 2, 26, as well as to the gods ( Roth ).

Verse 5

*Padapāṭha* :

**महान् आदित्यः नमसा उपऽसद्यः यातयत्ऽजनः गृणते सुऽशेवः । तस्मै एतत् पन्यऽतमाय जुष्टम् अग्नौ मित्राय हविः आ जुहोत ॥ ५**

*Sāyaṇa* :

योयमादित्यो[3] महानत एव नमसा नमस्कारेण उपसद्यः सर्वैरुपसदनीयः यातयज्जनः प्रातःप्रातः स्वस्वकर्मणि प्रवर्तनीया जना येनेति स तथोक्तः गृणते स्तोत्रं कुर्वते जनाय सुशेवश्च भवति तस्मै पन्यतमाय स्तुत्यतमाय मित्राय आदित्याय जुष्टं प्रीतिविषयमेतद्धविरग्नौ आ जुहोत जुहुत । यातयज्जनः । यती प्रयत्न इत्यस्य ण्यन्तस्य शतरि रूपम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरे[4] ( Pāṇ. vi, 2, 1 ) प्राप्ते मरुद्वृधादित्वात्पूर्वपदान्तोदात्तत्वम् । ( Kāt. Vārt. 2 on Pāṇ. vi, 2, 106 ) । गृणते गॄ शब्दे । शतुरनुम इति ( Pāṇ. vi, 1, 173 ) विभक्तेरुदात्तत्वम् । पन्यतमाय । पनतेरघ्न्यादित्वाद्यत् । यतोऽनाव ( Pāṇ. vi, 1, 213 ) इत्याद्युदात्तत्वम् । जुष्टम् । नित्यं मन्त्रे ( Pāṇ. vi, 1, 210 ) इत्याद्युदात्तत्वम् ॥

*Notes* :

1. महाँ. For the sandhi see note 4 on No. 2, verse 11.

2. यातयज्जन: One of a class of compounds peculiar to the Veda. Whitney, para 1309, calls them participial compounds. 'This group of compounds, in which the prior member is a present participle and the final member its object, is a small one ( toward thirty examples ) and exclusively Vedic--indeed,

---

[1] Av. √ yaz-to worship. [2] Av. √ man-to think.

[3] Av. Maz from √ man-to be great ; Akkadian Maḥ-great ; Semetic Māg ; Persian Magus ; Bactrian Mōghu. [4] M's V. G. S. p. 455.

almost limited to the oldest Vedic ( of the Ṛgveda ).[1] The accent is on the final syllable of the participle, whatever may have been the latter's accent as an independent word.' For the meaning of the word see note 1 on verse 1 *supra*.

Verse 6

*Padapāṭha :*

मित्रस्य चर्षणिऽधृतः अवः देवस्य सानसि । द्युम्नम् चित्रश्रवःऽतमम् ॥ ६

*Sāyaṇa :*

अभिप्लवषडहे दशरात्रे च सप्तदशैकविंशादिस्तोमे सति होत्रादिकशस्त्रेष्वावापस्थाने पञ्चसप्तादिसंख्याका ऋच आवपनीयाः । तत्र मैत्रावरुणशस्त्रे मित्रस्य चर्षणीधृत इत्याद्याश्चतस्र आवापार्थाः । सूत्रितं च । मित्रस्य चर्षणीधृत इति चतस्रो मैत्र्य इति ( Āśval. vii, 5 ) ॥

चर्षणीधृतः मनुष्याणां वृष्टिप्रदानेन धारकस्य मित्रस्य देवस्य संबन्धि अवः अन्नं सानसि सर्वैः संभजनीयं द्युम्नं तदीयं धनं च चित्रश्रवस्तममतिशयेन चायनीयकीर्तियुक्तम् । सानसि । सनोतेः सानसिपर्णसीत्यादिना सिच्प्रत्ययान्तत्वेन निपातनादुपधावृद्धिः । चित्त्वादन्तोदात्तः । स्वमोरिति स्वमोर्लुक् ॥

*Notes :*

[ 1. चर्षणीधृतः. The Pada text restores the metrically lengthened vowel of चर्षणि ].

2. सानसि. 'Is the procurer of.' The word is an adjective in the nominative, agreeing with अवः and governing द्युम्नं in the accusative. The word does not occur again with this rare construction, but is itself of not infrequent occurrence. i, 8, 1; i, 75, 2; i, 175, 2; iv, 15, 6; vii, 93, 2; viii, 21, 2; ix, 85, 5; ix, 100, 4; ix, 106, 2 and 3; x, 63, 14; x, 140, 4 and 5. 'Bringing again, winning, making booty, victorious.' — Roth.

Verse 7

*Padapāṭha :*

अभि यः महिना दिवम् मित्रः बभूव सऽप्रथाः । अभि श्रवःऽभिः पृथिवीम् ॥ ७

*Sāyaṇa :*

प्रातर्होमस्य कालात्यये मैत्रेष्टिः । तस्यामभि यो महिनेत्यनुवाक्या । सूत्रितं च अभि यो महिना दिवं प्र स मित्र मर्तो अस्तु प्रयस्वानिति ( Āśval. iii, 12 ) ॥

यो मित्रो महिना स्वकीयेन महिम्ना दिवमन्तरिक्षमभि बभूव अभिभवति स

[1] M's V. G. S., para 189 A. 2 a ( p. 280 ).

मित्रः सप्रथाः । प्रथः प्रसिद्धिः कीर्तिः । तत्सहितः श्रवोभिः वृष्टिद्वारोत्पादितैरन्नैः पृथिवीमभि अभिभवति बह्वन्नयुक्तां करोतीत्यर्थः । सप्रथाः । प्रथ प्रख्याने । असुन् । वोपसर्जनस्येति सहस्य सभावः ॥

*Notes* :

1. महिना. 'From a few stems in *man* is made ( Vedic irregularity ) an abbreviated instrumental singular, with loss of *m* as well as of *a* : thus महिना etc. for महिम्ना etc. '— Whitney, para, 425 e.[1]

2. श्रवोभिः. Grassmann and Ludwig translate 'in glory,' taking the word to answer to महिना in the previous clause. Roth refers श्रवोभिः here to a word श्रवः ( from श्रु=स्रु ) stream, flow, and trsnslates, 'in his flight.' I translate Roth's article on this second श्रवः ( to which, and not to श्रवः fame, he refers the meaning अन्न and धन of the commentators ) adding extracts from Sāyaṇa. ( 1 ) Stream, flow : iii, 1, 16, सुरेतसा श्रवसा तुञ्जमानाः— Sāyaṇa सुरेतसा शोभनवीर्येण श्रवसा त्वत्कृतेनान्नेन. ix, 87, 5 ; ix 110, 5 ; i, 51, 10, आ पूर्यमाणमवहन्नभि श्रवः (to the stream of Soma)-- Sāyaṇa श्रवोभिः हविर्लक्षणमन्नमभिलक्ष्य. i, 61, 10, गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः— Sāyaṇa, श्रवः कर्मफलभूतमन्नमभि आभिमुख्येन ददातीति शेषः. i, 91, 18, आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व-- Sāyaṇa, हे सोम त्वममृतायास्माकममृतत्वायामरणत्वाय आप्यायमान आ समन्ताद्वर्धमानः सन्दिवि नभसि स्वर्गे उत्तमान्युद्गततमान्युत्कृष्टानि श्रवांस्यन्नान्यस्माभिर्भोक्तव्यानि हविर्लक्षणानि वा धिष्व धारय. ( 2 ) course, quick movement : vii, 90, 7 अर्वन्तो न श्रवसो भिक्षमाणाः-- Sāyaṇa, अर्वन्तो न अश्वा इव हविषां वोढारः श्रवसः अन्नस्य । द्वितीयार्थे षष्ठी । अन्नं भिक्षमाणा याचमानाः. iv, 41, 9 ; ix, 97, 25, अर्वाँ इव श्रवसे सातिमिच्छ-- Sāyaṇa, हे सोम अन्नार्थे युद्धे अर्वानिव अश्वो यथा गच्छति तद्वत्त्वं श्रवसे अस्माकमन्नार्थं तथा. iv, 26, 5, उत श्रवो विविदे श्येनो अत्र — Sāyaṇa, उत अपि च अत्र अस्मिँल्लोके श्येनः सुपर्णः श्रवः सोमाहरणनिमित्तं यशः विविदे लेभे. i, 92, 8 ; 165, 12 ; iii, 37, 7 ; x, 102, 4 ; 131, 3 ; viii, 69 ( 80 in M. M. ) 5, हन्तो नु किमाससे प्रथमं नो रथं कृधि । उपमं वाजयु श्रवः-- Sāyaṇa, अस्माकमन्नमिच्छन् श्रवः अन्नं हविर्लक्षणमुपमम् । अन्तिकनामैतत । तवान्तिकभूतं वर्तत इति शेषः । यस्मादेवं तस्माद्रथमस्मदीयं प्रथमं कृधीति. iii, 54, 22, अस्मद्र्यक्सं मिमीहि श्रवांसि, ( perhaps 'direct thy course towards us' ) — Sāyaṇa, दीपितानि तानि ( referring to the preceding words स्वदस्व हव्या समिषो दिदीहि ) श्रवांसि अन्नानि अस्मदभिमुखानि अस्मद्र्यक् अस्मदभिमुखानि सं मिमीहि संमानय कुर्वित्यर्थः vi, 37, 3. अभि श्रव ऋज्यन्तो वहेयुः ( scil. अश्वाः ) — Sāyaṇa, ऋज्यन्तः

---

[1] M's V. G. S., para 90. 2 and footnote 1 ( p. 69 ).

ऋजुगमनाः सन्तः... श्रवः श्रवणीयमस्मदीयं हविः अच्छ आभिमुख्येन अभि वहेयः आवहेयुः. iii, 19, 5 अधि श्रवांसि धेहि नस्तनूषु-- Sāyaṇa किंच नस्तनूषु अस्माकं तनुजेष्वपत्येषु श्रवांसि अन्नानि अधि धेहि अधिकं निधेहि. The next example is our passage श्रवोभिः, in his flight. ( 3 ) course, bed : vii. 79, 3, अभूदुषा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि-- Sāyaṇa, सुविताय कल्याणाय श्रवांसि अन्नानि अजीजनत् उदपादयत प्रकाशितवतीत्यर्थः. x, 27, 21, श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति-- Sāyaṇa, परः परस्तादन्तरिक्षलोकस्योपरि स्थिते सूर्यमण्डले स्थितमेना एतत् । श्रव इत्यन्ननाम । तद्धेतुत्वादुदकं श्रव उच्यते । यदप्युदकं मेघोदरगतादुदकादन्यदप्यस्ति अव्यथी व्यथारहिता जरिमाणः स्तोतारो मरुदादयस्तादृशमुदकं तरन्ति अन्तरिक्षलोकं प्रत्यवतारयन्ति. Some of the passages cited under the first श्रवः, fame, are perhaps examples of this meaning of श्रवः, course. ( 4 ) According to the commentary = अन्न ; so Naigh. ii, 7, Nir. x, 3. Sāyaṇa chooses the meaning especially in passages where the Soma is meant. ( 5 ) = धन Naigh. ii, 10, Nir. iv, 24-- Compare viii, 2, 38 गाथश्रवस ( hastening to the song ; according to Sāyaṇa, whose praise is to be sung ) वसु°, वाज°, वृद्ध°. '

Verse 8

*Padapāṭha* :

## मित्राय पञ्च येमिरे जनाः अभिष्टिऽशवसे । सः देवान् विश्वान् बिभर्ति ॥ ८

*Sāyaṇa* :

पञ्च जनाः निषादपञ्चमाश्चत्वारो वर्णाः अभिष्टिशवसे शत्रूणामभिगन्तृबलयुक्ताय मित्राय येमिरे हवींष्युद्यच्छन्ति । स तादृशो मित्रः विश्वान् सर्वान् देवान् बिभर्ति स्वस्वरूपतया धारयति । अभिष्टिशवसे । इषेर्मन्त्र वृषेत्यादिना क्तिन् । तादौ च नितीत्यभेरन्तोदात्तत्वम् । ( Pāṇ. vi, 2, 50 ) । शकन्ध्वादित्वात्पररूपत्वम् । बहुव्रीहौ पूर्वपदस्वरः ॥

*Notes* :

1. पञ्च[1] जनाः [2] ' The Aryans as the middle point, and the people of the North, the East, the West, and the South by whom they are surrounded ' ( Roth's note in S. L. ). Max Müller, on the other hand, speaks of the Āryas as the people of the five Nations ( ' India-- What can it teach us ? ' p. 95, note ). Compare Muir's remarks on the phrase, ( Sanskrit Texts, i, p. 176 f. ) Muir translates Roth's article in the Petersburg Dictionary : ' The phrase *five races* is a designation of all nations, not merely of the Aryan tribes. It is an ancient enumeration, of the origin of which we find no express expla-

---

1 Skt. = Av. 2 See M and K's Ved. Ind., *sub voce* ( Vol. I. p. 466 ).

nation in the Vedic texts. We may compare the fact that the cosmical spaces or points of the compass are frequently enumerated as *five*, especially in the following text of the A. V. iii, 24, 2 : इमा याः पञ्च प्रदिशो मानवीः पञ्च कृष्टयः–– 'These five regions, the five tribes sprung from Manu, among which ( regions ) we should have here to reckon as the fifth the one lying in the middle ( *dhruvā dik*, A. V. iv, 14, 8 ; xviii, 3, 34 ), that is, to regard the Āryas as the central point, and round about them the nations of the four regions of the world. According to the Vedic usage, five cannot be considered as designating an indefinite number.'

[ 2. अभिष्टिशवसे. अभिष्टि ( अभि+अस्ति )= help. युष्माकमभिष्टये -साहाय्यार्थमभिगमनायाभिष्टये ( ? ) वा, Sāy. on viii, 68 ( or, omitting the 11 वालखिल्यसूक्तs, 57 ), 5. ]

Verse 9

*Padapāṭha :*

मित्रः देवेषु आयुषु जनाय वृक्तऽबर्हिषे । इषः इष्टऽव्रताः अकः इत्यकः ॥ ९

*Sayaṇa :*

मित्रः भगवादित्यः देवेषु[1] द्योतमानादिगुणयुक्तेषु आयुषु मनुष्येषु मध्ये यो जनः वृक्तबर्हिः । वृक्तं लूनं बर्हिर्येन सः । बर्हिर्लवनासादनपूर्वं हविषो दाता ऋत्विगित्यर्थः । तस्मै वृक्तबर्हिषे जनाय इष्टव्रताः इष्टानि कल्याणानि व्रतानि कर्माणि याभिः सिध्यन्ति ता इषः तादृशान्यन्नानि अकः करोति तस्मै ददातीत्यर्थः । वृक्तबर्हिषे । ओव्रश्च छेदने । कर्मणि निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । बहुव्रीहौ पूर्वपदस्वरः । अकः । करोतेर्लुङि च्लेर्मन्त्रे घसेत्यादिना लुक् ( Pāṇ. ii, 4, 80 ) । सिपो हल्ङ्यादिलोपः । निघातः ॥

*Notes :*

1. वृक्तबर्हिषे. वृक्तबर्हिस् is generally a name of the priest, so called because he has to trim the sacrificial grass. 'The Sacred Kuśa grass ( Poa cynosuroides ) after having had the roots cut off, is spread on the Vedi or altar, and upon it the libation of Soma juice, or oblation of clarified butter, is poured out. In other places, a turf of it in a similar postion is supposed to form a

[1] 1. Sk. Devas=Indo-Eur. Deivos, archaic Lat. deivos ( deus ), Celtic devos, Old Scand. tivar, Lith. dëvas-Bloomfield. 2. 'The true meaning of deva is its history, beginning from its etymology and ending with its latest definition'.—Max Müller ( Orig. Rel., Vol. I, Lecture iv, p. 202 ). 3. For deva ( Indo-Aryan ) and daevas ( Iranian ) see Moulton's Early-Zoroastrianism ( references given in the Index, p. 453 ).

fitting seat for the deity or deities invoked to the sacrifice. According to Mr. Stevenson it is also strewn over the floor of the chamber in which the worship is performed.'— Max Müller, Vedic Hymns, part i, p. 84.

2. इष्टव्रताः. The word does not occur again. Roth takes it to mean 'obeying the wish,' *i. e.*, of the god, issuing as he pleases. Grassmann refers इष्ट in the word to the worshippers 'according to their wish.'

3. अक्रः. Third person singular of an aorist of कृ.[1] See Whitney, para. 831. Cf. Ṛ̣V. ii, 12, 4b *supra.*

---

## No. 8

*Maṇḍala* III *Sūkta* 61

### Verse 1

*Sāyaṇa* :

उषो वाजेनेति सप्तर्चमष्टमं सूक्तं वैश्वामित्रं त्रैष्टुभमुषोदेवताकम् । तथा चानुक्रान्तम् । उष उषस्यामिति । प्रातरनुवाक उषस्ये क्रतावाश्विनशस्त्रे च त्रैष्टुभे छन्दस्येतस्य सूक्तस्य विनियोगः । सूत्रितं च । उषो वाजेनेदमु त्यदिति ( Āśval. iv, 14 ) ॥

*Padapāṭha* :

**उषः वाजेन वाजिनि प्रऽचेताः स्तोमम् जुषस्व गृणतः मघोनि । पुराणी देवि युवतिः पुरंऽधिः अनु व्रतम् चरसि विश्वऽवारे ॥ १**

*Sāyaṇa* :

वाजेन वाजिनि अन्नेन अन्नवति । तथा च मन्त्रः सं वाजैर्वाजिनीवतीति (Ṛ̣V. i, 48, 16) । मघोनि धनवति हे उषः प्रचेताः प्रकृष्टज्ञानवती सती गृणतः तव स्तोत्रं कुर्वतः स्तोतुः स्तोमं स्तोत्रं जुषस्व सेवस्व । यद्वा । वाजेन हविर्लक्षणेनान्नेन सह स्तोमं जुषस्वेति संबन्धः । विश्ववारे विश्वैः सर्वैर्वरणीये हे उषो देवि पुराणी पुरातनी युवतिः तरुणीत्युपमा । तद्वच्छोभमाना । सुसंकाशा मातृमृष्टेव योषेतिवत् ( Ṛ̣V. i, 123, 11 ) । पुरंधिः । पुरु बहु धीः स्तोत्रलक्षणं कर्म यस्याः सा । बहुस्तोत्रवती । पुरंधिर्बहुधीरिति यास्कः (Nir. vi, 13) । पुरंधिः शोभमाना वा । एवंविधगुणोपेता त्वमनु व्रतं यज्ञकर्माभिलक्ष्य चरसि यष्टव्यतया वर्तसे । मघोनि ।

---

[1] M's V. G. S. p. 375.

मघशब्दान्मतुबर्थे छन्दसीवनिपाविति[1] वनिप्। स्त्रियामृन्नेभ्यो ङीप्। श्वयुवमघोनामतद्धित इति संप्रसारणे कृते गुणः। संबुद्धावम्त्रार्थनयोर्ह्रस्वः। निघातः (Pāṇ. viii, 1, 19)। पुराणी। पुराणशब्दः पुराणप्रोक्तेष्विव (Pāṇ. vi,3,105) त्यन्तोदात्तत्वेन निपातितः। टिड्ढाणञिति ङीप्। अनुदात्तस्य च यत्रोदात्तलोप (Pāṇ. vi, 1, 161) इत्यन्तोदात्तत्वम्। पुरंधिः। पृषोदरादित्वादुकारस्यामादेश ईकारस्य ह्रस्वश्च। आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यान[2]मित्याद्युदात्तत्वम्॥

*Notes* :

1. उषः[3]. A vocative, accented because it stands at the beginning of a pāda. The accent proper of the word उषः is on the last syllable. Compare उषसम् verse 5 *infra*. But all vocatives, if accented at all, have accent on the first syllable. See[4] Whitney, para. 314.

[ 2. वाजेन वाजिनी. 'Wealthy by wealth or booty,' M. M. ( Ved. Hymns, i, 44 ).

वाज, connected with vegeo, vigeo, vigil, wacker, is one of the many difficult words in the Veda, the general meaning of which may be guessed, but in many places cannot yet be determined with certainty ··· The St. Pet. Dict. gives the following list of them— swiftness, race, prize of race, gain, treasure, [ according to the commentators, usually, food, also oblation ], race horse, &c. Here we perceive at once the difficulty of tracing all these meanings back to a common source, though it might be possible to begin with the meanings of strength, strife, contest, race, whether friendly or warlike, then to proceed to what is won in a race or in war, viz., booty, treasure, and lastly to take वाजाः in the more general sense of acquisitions, goods bestowed as gifts— M. M., 'India,' p. 164.

The transition of meaning from वाज, booty, to वाज, wealth in general, finds an analogy in the Germ. kriegen, to obtain, also in Gewinn, and A. S. winnan, to strive, to fight, to obtain.'— M. M. ]

---

1 °पौ च ( Kāt. Vārt. 2 on Pāṇ. v, 2, 109. ), °पौ च वक्तव्यौ. ( Mbh. ) quoted under Pāṇ. v, 2, 122 in the S. K.

2 Kāt. Vārt. ( Kielhorn's Pāt. MBh. Vol. III. p 132 ).

3 Uṣas : Max Müller's 'India-What can it teach us ?', pp. 197-98. Muir's S. T., Vol. V., Sec. XIII ; Hopkin's Rel. Ind., pp. 73-80 ; Tilak's "Arctic Home", Ch. V. For the philology of Uṣas ( = Gr. Eos. ) see Cox's Mythology of the Aryan Nations, p. 227, footnote 5.

4 Pāṇ. vi, i, 198 ; viii i, 19 ; M's V. G. S., App. III, para 18.

3. पुराणी देवि युवतिः. Compare पुनः पुनर्जायमाना पुराणी, said of Uṣas in i, 92, 10.

[ 4. पुरंधिः [1] ( पुरं+धा ). पुर् = fullness. पुरंधि=बहूनां धारयित्री, sustainer of many ( Sāy. on i, 181, 9 ).

5. विश्ववारे. वारं=वरणीयं धनम् ( Sāy. on v, 16, 2 ). ऋधद्वाराय= ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशायाग्नये ( Sāy. on vi, 3, 2 ). Cf. अशस्तवार, भूरिवार, पुरुवार. विश्ववार = possessed of all good things or riches. ]

Verse 2

*Padapāṭha* :

**उषः॑ दे॒वि॒ अम॑र्त्या वि भा॒हि॒ च॒न्द्रऽर॑था सू॒नृताः॑ ई॒रय॑न्ती ।
आ त्वा॒ व॒ह॒न्तु॒ सु॒ऽयमा॑सः अश्वाः॑ हिर॑ण्यऽवर्णाम् पृ॒थु॒ऽपाज॑सः ये ॥ २**

*Sāyaṇa* :

हे उषो देवि अमर्त्या[2] मरणधर्मरहिता सुवर्णमयरथोपेता सूनृताः प्रियसत्यरूपा वाच ईरयन्ती उच्चारयन्ती । तथा च मन्त्रवर्णः । सुम्नावरी सूनृता ईरयन्तीति ( ṚV. i, 113, 12 ) । तादृशी त्वं वि भाहि सूर्यकिरणसंबन्धाद्विशेषेण दीप्यस्व । पृथुपाजसः प्रभूतबलयुक्ता अरुणवर्णा येऽश्वा विद्यन्ते सुयमासः सुष्ठु नियन्तुं शक्या रथे योजितास्तेऽश्वा हिरण्यवर्णां त्वा त्वामा वहन्तु । सुयमासः । यमेरकृच्छ्रार्थे खल् । लित्स्वरः ( Pāṇ. vi, 1, 183 ) ॥

*Notes* :

सूनृता ईरयन्ती. Muir, V, 193, has a note on the word *sūnṛta* communicated by Aufrecht : ' Professor Aufrecht thinks that this word sūnṛta is to be explained as follows : He considers it to be a derivative from *nṛt*, ' to be in motion ' compounded with *su*. Its first meaning is movable ( *sūnṛtā maghāni*, ṚV. vii, 57, 6 ), then ' brisk, alert ( *sūnṛta*, predicated of Indra, viii, 46, 20 : *sūnṛte* of Uṣas, iv, 55, 9 ; i, 123, 5 ; 124, 10 ; viii, 9, 17 ). As a feminine substantive in the plural it means either ' activity ' or, with a supplied *gir*, ' lively voices ' ( *sūnṛtānām girām* — iii, 31, 18 ) ; *netrī sūnṛtānām* is

1 Purandhi—' active, zealous ' ; a goddess of Activity ( Hillebrandt ) ; of Plenty ( Macdonell ) ; = Avestan Pārendi–a goddess of riches and abundance. See M's Ved. Myth., pp. 37, 124.

2 Skt. √ mar = Av. √ mar to die ; Av. ameretat–immortality ; Av-maretan–mortal, man ( Jackson's Av. R. ).

Uṣas as a stimulator, or rather, leader ( χορηγός ) of joyful voices ( of birds, etc. ); ( *sūnṛtā īrayantī* is just the same.' So, *vāyor iva sūnṛtānām udarke,*— ṚV. i, 113, 18, " when fervent voices arise like the rising of the wind. " ( *ortu vocum velut ortu venti* ).

With our phrase compare जीवमुदीरयन्ती said of Uṣas in i, 113, 8 and see also the verse quoted in the next note.

[ सूनृताः । वाङ्नामैतत् । पशुपक्षिमृगादीनां वचांसि ईरयन्ती प्रेरयन्ती । उत्पादयन्ती । Sāy. on i, 113, 12 which he has himself quoted above, and which too refers to Uṣas. ]

Verse 3

*Padapāṭha :*

उषः॑ प्रतीची भुव॑नानि विश्वा॑ ऊर्ध्वा तिष्ठसि अमृत॑स्य केतुः । समानम् अर्थ॑म् चरणीयमा॑ना चक्रम्ऽइव नव्यसि आ ववृत्स्व ॥ ३

*Sāyaṇa :*

हे उषो देवि विश्वा सर्वाणि भुवनानि प्रतीची । प्रति आभिमुख्येन अञ्चति प्राप्नोतीति प्रतीची । अमृतस्य मरणधर्मरहितस्य सूर्यस्य केतुः प्रज्ञापयित्री त्वमूर्ध्वा नभस्युन्नता तिष्ठसि । नव्यसि पुनः पुनर्जायमानतया हे उषो देवि अर्थम् । अर्यते गम्यतेऽस्मिन्नित्यर्थो मार्गः । समानमेकं मार्गमुदयात्प्राचीनकाललक्षणं चरणीयमाना चरितुमिच्छन्ती त्वमा ववृत्स्व पुनस्तस्मिन्मार्ग आवृत्ता भव । तत्र दृष्टान्तः । चक्रमिव यथा नभसि चरितुः सूर्यस्य रथाङ्गं पुनः पुनरावर्तते तद्वत् । प्रतीची । प्रतिपूर्वादञ्चतेः क्विन् । अञ्चतेश्चोपसंख्यानमिति ङीप् । अच इत्यकारलोपे (Pāṇ. vi, 4, 138 ) चाविति दीर्घः ( Pāṇ. vi, 3, 138 ) । उदात्तनिवृत्तिस्वरेणान्तोदात्तः ( Pāṇ. vi, 1, 222 ) । केतुः । चायृ पूजानिशामनयोरित्यस्माच्चायः की ( Pāṇ. vi, 1, 35 ) चेति तुः । की इत्यादेशः । आर्धधातुकलक्षणो गुणः । अर्थम् अर्तेस्थन्प्रत्ययः । नव्यसि । नवशब्दादीयसुनि ङीपि रूपम् । ईकारलोपश्छान्दसः । ववृत्स्व । वृतु वर्तने । बहुलं छन्दसीति विकरणस्य श्लुः ॥

*Notes :*

1. प्रतीची भुवनानि विश्वा. 'In the face of all creatures.' Compare

> विश्वानि देवी भुवनाभिचक्ष्या
> प्रतीची चक्षुरुर्विया वि भाति ।
> विश्वं जीवं चरसे बोधयन्ती
> विश्वस्य वाचमविदन्मनायोः ॥ i, 92, 9 :

2. समानमर्थं चरणीयमाना. 'Pressing forward to the same mark', *i. e.*, as in all former days. Taken along with the following नव्यसि the phrase presents the contrast which we have had already in पुराणी युवतिः. Compare

समानो अध्वा स्वस्रोरनन्त-
स्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके
नक्तोषासा समनसा विरूपे ॥ i, 113, 3 :

'The two sisters have one road that never ends: along it they go each in her turn god-impelled: they do not strive, they do not stand still, beneficent night and day, one in mind, diverse in body.' It may be a question whether समान here, however, does not mean 'common to the two.' Compare समानं चिद्रथमातस्थिवांसा, ii, 12, 8, *supra*.

3. चरणीयमाना is the participle of a verb which is used only here.

## Verse 4

*Padapāṭha* :

**अवं स्यूमंऽइव चिन्वती मघोनीं उषाः याति स्वसंरस्य पत्नीं । स्वः जनंन्ती सुऽभगां सुऽदंसाः आ अन्तांत् दिवः पप्रथे आ पृथिव्याः ॥ ४**

*Sāyaṇa* :

येयमुषाः स्यूमेव वस्त्रमिव विस्तृतं तमः अव चिन्वती अवचयमपक्षयं प्रापयन्ती मघोनी धनवती स्वसरस्य सुष्ठु अस्यति क्षिपति तम इति स्वसरः सूर्यो वासरो वा तस्य पत्नी सती याति गच्छति । स्वः स्वकीयं तेजः जनन्ती जनयन्ती सुभगा सुधना सौभाग्ययुक्ता वा सुदंसाः शोभनाग्निहोत्रकर्मा सेयमुषा दिवः द्युलोकस्य आ अन्तात् पृथिव्याश्च आ अन्तात् अवसानात्पप्रथे प्रथते प्रकाशत इत्यर्थः । स्यूमेव । षिवु तन्तुसंताने । अविषिशुषिभ्यः किदिति[1] मन्प्रत्ययः । छ्वोः शूडनुनासिके चेत्यूठ् । यणादेशः । सुपां सुलुगिति सोर्लुक् । नित्त्वादाद्युदात्तः ( Pāṇ. vi, 1, 197 ) चिन्वती । शतुरनुम इति ङीप उदात्तत्वम् ( Pāṇ. vi, 1, 173 ) । जनन्ती । जन जनन इत्यस्य ण्यन्तस्य शतरि रूपम् । छन्दस्युभयथेति ( Pāṇ. iii. 4, 117 ) शप आर्धधातुकत्वेन णिलोपः ॥

---

[1] अविसिविसिशुषिभ्यः कित्. ( Uṇ. Sū. I. i. 149 ).

*Notes* :

1. अव स्यूमेव चिन्वती. 'Casting aside, as it were, her garment.' The picture of the approaching chariot of the Dawn must, as Ludwig has seen, be carried over from the last verse. By the mantle that enveloped Uṣas we are of course to understand, as Sāyaṇa says, the darkness she dispels. But the rare word स्यूमन् is a difficulty. The simple word occurs in one other passage only: i, 113, 17 स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः— Sāyaṇa, वह्निः स्तोत्राणां वोढा रेभः। स्तोतृनामैतद। स्तोता उषसो विभातीः तमसोपनोदनेन प्रकाशमाना उषोदेवताः स्तवानः स्तुवन् वाचः वेदरूपायाः संबन्धीनि स्यूमना स्यूमानि अनुस्यूतानि संततान्युक्थानि उदियर्ति उद्गमयति उच्चारयति. Roth, who compares स्यूमन् to the Greek hymen, would take वाचः as an accusative and स्यूमना as an instrumental 'in one line or string, that is, forming a continuous row.' The compounds स्यूमगभस्ति and स्यूमरश्मि occur each twice. In i, 122, 15 the former word is an epithet of the chariot of Mitra and Varuṇa. Sāyaṇa, स्यूमगभस्तिः। स्यूम[1] कमिति सुखनाम (Naigh. iii, 6)। सुखकरदीप्तिः सन्. In vii, 71, 3 it is an epithet of the chariot of the Aśvins. Sāyaṇa, स्यूमगभस्ति सुखरश्मि स्यूतरश्मिम्. Roth takes this word to mean 'whose pole is made of a leather strap', and suggests that we are perhaps to understand a kind of double rein. In both the passages in which it occurs— i, 112, 16; viii, 52, 2— स्यूमरश्मि is a proper name. Sāyaṇa on i, 112, 16, स्यूमरश्मये स्यूतः संबद्धो रश्मिदीप्तिर्यस्य तस्मै एतत्संज्ञकाय ऋषये. In vi, 36, 2 we have another compound स्यूमगृभे. Sāyaṇa, स्यूम्नः स्यूतान् अविच्छेदेन वर्तमानान् (compare Roth's explanation of स्यूमना above) शत्रून गृह्णते. Roth takes स्यूमगृभ् to mean 'catching hold of the reins,' that is with his teeth, an epithet of an unmanageable horse. It is not, however, clear from the context there, स्यूमगृभे दुधयेऽर्वते च, whether स्यूमगृभे does not stand by itself. Grassmann takes it so, translating 'to the holder of the reins and to the horse.' In his dictionary he follows Roth. A fourth compound occurs in i, 174, 5 स्यूमन्यू an epithet of the two horses of the wind, Sāyaṇa, स्यूमकमिति सुखनाम। तदिच्छन्तौ सततगामिनौ वा. Roth, 'eager for the reins, that is tearing at the reins, impatient'.

---

[1] 'स्यूम। कम्-इति द्विपदामिदम्'. ग. (footnote on स्यूमकम्-in the Bib. Ind. Edition, of the Naigh.-Nirukta).

These passages certainly set up a presumption in favour of taking स्यूमन् in our passage also in the sense of reins. The meaning of the allegorical description of the dawn here must be held to be uncertain. I give various explanations which have been hazarded. Roth translates the whole line, 'The mistress of the house [ compare note below ] bestirs herself, drawing back the strap ( that closes the door, δεσμὸς in Homer ).' Grassmann takes our clause to mean ' unloosening her girdle. ' Ludwig 'shaking down the reins.' Ludwig has the note, ' Either shaking from above, down from her chariot, the reins in order to urge on her horses, or throwing them away altogether ( in the form of rays ) in order to alight. '

2. Grassmann, quite unnecessarily, holds that we should read उषा आ ( *i. e.*, उषाः आ ) for उषा.[1] याति means ' marches on.'

3. स्वसरस्य पत्नी. 'Queen of the place,' that is, of the world through which she advances. Sāyaṇa has no warrant for the signification he attaches here and on v, 62, 2 ( with another etymology, स्वसरस्य स्वयं सर्तुः आदित्यस्य ) to स्वसर. It means, in accordance with its etymology, place of resort, ' one's own resort.' Compare ii, 19, 2-- वयो न स्वसराण्यच्छा, ( as birds to their nests ), where Sāyaṇa's note is वयो न यथा पक्षिणः स्वसराणि। सुष्ठु अर्यन्ते प्राप्यन्त इति स्वसराणि कुलायाः। तानभिलक्ष्य गच्छन्ति तद्वत्. Also ii, 34, 5, हंसासो न स्वसराणि ( as swans to their nest )-- Sāyaṇa, हंसासो न यथा हंसाः स्वसराणि स्वकीयानि निवासस्थानानि प्राप्नुवन्ति तद्वत्. In ii, 2, 2 it is used of the stall in which cattle are kept : अभि त्वा नक्तीरुषसो ववाशिरेऽग्ने वत्सं न स्वसरेषु धेनवः, ( as cows in the cattle-pens low after a calf )-- Sāyaṇa, स्वसरेषु स्वयं सरणशीलेष्वहःसु सरणाधिकरणेषु गोष्ठेषु वा धेनवो वत्सं न वत्समिव.

In Naigh. i, 9 स्वसर is given among the synonyms for अहन् ( Compare Nirukta v, 4. on स्वसर in Naigh. iv, 2 ). If we accept this alternative explanation our phrase will mean, ' Queen of the day.' [ In Naigh, iii, 4, स्वसर is given among the synonyms for गृह. ]

---

[1] " 4b probably *Uṣā' ā' yāti*"—Arnold's Ved. Metre, p. 300.

4. स्वर्जनन्ती. 'Bringing heaven to life ( again ).' Compare जनयन्तो दैव्यानि व्रतानि, No. 22, verse 3, and Ait. Brāh., iv. 5 तम इव हि रात्रिर्मृत्युरिव.

[ 5. सुदंसाः, 'Doing wonderful deeds,' 'rich in glorious deeds.' दंस् a root still met with in Zend in the sense of, 'to teach.' The original meaning seems to be 'to show', 'to demonstrate.' The derivatives in the ṚV. refer to wonderful and glorious deeds of the gods-- Gr. सुदंसाः = शोभनकर्मा ( Sāy. on i. 62, 7 ). सुदंससः ( मरुतः ) शोभनकर्माणः । एतदेवोपपादयति । हि यस्मान्मरुतो रोदसी द्यावापृथिव्यौ वृधे वृष्टिप्रदानादिना वर्धनाय चक्रिरे कृतवन्तः अतः सुदंसस इत्यर्थः ( Sāy. on i, 85, 1 ). ]

Verse 5

*Padapāṭha :*

अच्छ वः देवीम् उषसंम् विऽभातीम् प्र वः भरध्वम् नमसा सुऽवृक्तिम् । ऊर्ध्वम् मधुधा दिवि पाजः अश्रेत् प्र रोचना रुरुचे रण्वऽसंदृक् ॥ ५

*Sāyaṇa :*

हे स्तोतारो वः युष्मानच्छ अभिलक्ष्य विभातीं शोभमानामुषसं देवीं प्रति वो युष्माकं संबन्धिना नमसा नमस्कारेण सह सुवृक्तिं शोभनां स्तुतिं प्र भरध्वं सूयं कुरुत । मधुधा मधुराणि स्तुतिलक्षणानि वाक्यानि दधातीति मधु सोमः तं धारयतीति वा । यद्वा मधुधा आदित्यधात्री । यद्वा अवग्रहाभावादव्युत्पन्नावयवमखण्डमिदं पदमुषोनाम । सेयमुषाः दिवि नभसि ऊर्ध्वं पाजः ऊर्ध्वाभिमुखं पाजः तेजः अश्रेत् श्रयति । तथा रोचना रोचनशीला रण्वसंदृक् रमणीयदर्शना उषाः प्र रुरुचे प्रकर्षेण दीप्यते । यद्वा रोचना लोकान्प्र रुरुचे प्रकर्षेण स्वतेजसा दीपयति । तथा च मन्त्रवर्णः । व्युच्छन्ती हि रश्मिभिर्विश्वमाभासि रोचनमिति (ṚV. i, 49. 4) । रण्वसंदृक् । रवेर्गत्यर्थस्याच्प्रत्ययः । इदित्त्वान्नुमागमः । संपूर्वाद्दृशेः क्विन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः ॥

*Notes :*

1. The construction of the first line is variously explained. Sāyaṇa takes the first वः to be the accusative[1] after अच्छ, and the

---

[1] M's V. G. S., para 176, 1.

second वः to be a genitive dependent on नमसा. Delbrück ( p. 44 ) would supply a verb of calling after अच्छ. ‘I call on you, bring to Uṣas,’ or perhaps, ‘call on Uṣas.’ This last is Ludwig's way of taking the words. Both Grassmann and Ludwig take with Sāyaṇa the second वः as a genitive, but make it dependent on सुवृक्तिम्. In both clauses वः is perhaps an enclitic dative, as it almost certainly is in the first. अच्छ governs देवीम्[1], in construction with प्र भरध्वम्. Compare the construction of the word in the passage cited, ( ii, 19, 2 ), in note 3 on the last verse.

2. सुवृक्तिम्. ‘सुवृक्ति is generally explained by a hymn of praise, and it cannot be denied that in this place ( 1, 64, 1 ), as is in most others, that meaning would be quite satisfactory. Etymologically, however, सुवृक्ति means the cleaning and trimming of the grass on which, as on a small altar, the oblation is offered : cf. वृक्तबर्हिः i, 38, 1, note 2, p. 84.[2] Hence, although the same word might be metaphorically applied to a carefully trimmed, pure, and holy hymn of praise, yet wherever in the Veda the primary meaning is applicable it seems safer to retain it ; cf. iii, 61, 5 ( our passage ) ; vi, 11, 5.’ Max Müller, Vedic Hymns, Pt. i, p. 109.

3. पाजो अश्रेत्.[3] ‘Enters into light’ the light, as it were, meeting and joining itself to the dawn. Roth ‘spreads her light.’ He compares v, 29, 1 समिद्धो अग्निर्दिवि शोचिरश्रेत— Sāyaṇa, शोचिः तेज अश्रेत श्रयति. iv, 6, 2 ऊर्ध्वं भानुं सवितेवाश्रेत्— Sāyaṇa, भानुं दीप्तिं ... ऊर्ध्वमश्रेत ऊर्ध्वमुखामाश्रयति. vii, 72, 4, &c.

Verse 6

*Padapāṭha* :

ऋतऽवरी दिवः अर्कैः अबोधि आ रेवती रोदसीइति चित्रम् अस्थात् । आऽयतीम् अग्ने उषसम् विऽभातीम् वामम् एषि द्रविणम् भिक्षमाणः ॥ ६

*Sāyaṇa* :

ऋतावरी सत्यवती येयमुषाः दिवः द्युलोकादर्कैस्तेजोभिरबोधि सर्वैर्ज्ञायते । ततो रेवती धनवती सेयं रोदसी द्यावापृथिव्यौ चित्रं नानाविधरूपयुक्तं यथा भवति तथा

[1] M's V. G. S. pp. 208, 303.

[2] Part of the note referred to has been quoted under वृक्तबर्हिषे, No. 7, Verse 9.

[3] M's V. G. S. p. 425.

अस्थात् सर्वतो व्याप्य तिष्ठति । हे अग्ने आयती त्वदभिमुखमागच्छन्ती विभाती भासमानामुषसमुषोदेवीं भिक्षमाणो हवींषि याचमानस्त्वं वामं वननीयं द्रविणमग्निहोत्रादिलक्षणं धनमेषि प्राप्नोषि । अबोधि । बुध अवगमने । कर्मणि लुङि च्लिण् भावकर्मणोरिति च्लिण् । चिणो लुक् । रेवती । रयिशब्दान्मतुप् । छन्दसीर ( Pāṇ. viii, 2, 15 ) इति वत्वम् । रयेर्मतौ बहुलमिति[1] संप्रसारणपरत्वे । गुणः । उगितश्चेति ङीप् । रैशब्दाच्चोपसंख्यानमिति मतुप उदात्तत्वम्[2] ॥

[ *Note* :

अबोधि.[3] Cf. त्वा ( Uṣas ) प्रति स्तोमैरभुत्स्महि ( Sāy. बोधयामः ) iv, 52, 4 ; प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ( Sāy. प्रतिबोधयन्ति ) vii, 80, 1. ]

Verse 7

*Padapāṭha* :

**ऋतस्य॑ बु॒ध्ने उ॒षसा॑म् इ॒ष॒ण्यन् वृषा॑ म॒हीइति॑ रोद॑सी॒इति॑ आ वि॒वे॒श । म॒ही मि॒त्रस्य॑ वरु॑णस्य मा॒या च॒न्द्राऽइ॑व भा॒नुम् वि द॒धे॒ पु॒रु॒त्रा ॥ ७**

*Sāyaṇa* :

वृषा वृष्टिद्वारा अपां प्रेरकः आदित्यः ऋतस्य अग्निहोत्रादिकर्मकरणे सत्यभूतस्य अह्नः बुध्ने मूले उषसामिषण्यन् । प्रेरणं कुर्वन् मही[4] महत्यौ रोदसी द्यावापृथिव्यौ आ विवेश सर्वतः प्रविष्टवान् । यद्वा वृषा वर्षिता इषण्यन् सर्वतो गच्छन्नुषसां संबन्धी रश्मिसमूहः रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयम् । तत उषाः मही महती मित्रस्य वरुणस्य मित्रावरुणयोर्माया प्रभारूपा सती चन्द्रेव सुवर्णानीव भानुं स्वप्रभां पुरुत्रा बहुषु देशेषु वि दधे विदधाति सर्वत्र प्रसारयति । मही । अलुगभावश्छान्दसः । पुरुत्रा । देवमनुष्येत्यादिनाधिकरणे त्राप्रत्ययः ( Pāṇ. v, 4, 56 ) ॥

*Notes* :

1. ऋतस्य बुध्ने. Sāyaṇa's interpretation seems very fanciful. But there is no agreement as to the real meaning of the phrase. In his note on वृषन्, Vedic Hymns, Part i., p. 145, Max Müller translates our line 'The hero in the depth of the heaven, yearning for the dawns, has entered the great sky and the earth.' Grassmann, 'on holy ground.' Ludwig, 'on the ground of the holy rite.'

---

1 Kāt. Vārt. 6 under Pāṇ. vi, 1, 37 ; cited in S. K.

2 मतुबुदात्तत्वे रेग्रहणम् ( Kāt. Vārt. 1, under, Pāṇ. vi, 1, 176 ) ; रेशब्दाच्च in S. K. under Pāṇ. vi, 1, 176.

3 M's V. G. S., p. 401.

4 Skt. √ Mah = Av. √ Maz-to be great.

In x, 111, 8 and i, 24, 7, as Roth indicates, बुध्न itself has the meaning which Sāyaṇa would attribute to it here (बुध्न, मध्य, अन्त). But the phrase ऋतस्य बुध्ने cannot well be separated from the similar phrases ऋतस्य सदनं, सदः, सद्म, योनिः, पदं, नाभिः, collected by Roth under ऋत and explained by him as referring, 'not only to the central point of belief and ceremonial in this world, that is, the altar and similar ideas, but also of the holiest in the other world.' In the very next hymn, iii, 62, we have ऋतस्य योनिः twice. Verse 13, ऋतस्य योनिमासदम्-Sāyaṇa, ऋतस्य यज्ञस्य योनिं स्थानं हविर्धानाख्यम्. Verse 18, योनावृतस्य सीदतम्—Sāyaṇa, ऋतस्य यज्ञस्य योनौ देवयजनाख्ये देशे. If Sāyaṇa is right, as I think he is, in taking वृषा here to be the sun, the verse describes the entry of the sun into heaven and earth. To the priest who stands facing the holy Dawn, the spot where the sun at last appears, seems to be the very root and foundation of the holy place he is standing in.

2. उषसामिषण्यन्वृषा. Sāyaṇa does not know whether to take उषसाम् with इषण्यन् 'urging on the dawns' or with वृषा 'the vṛṣā (explained as = वर्षिता रश्मिसमूहः) of the dawns.' Roth and Max Müller adopt the former construction but translate, the one, 'urging on the dawns,' the other, 'yearning for the dawns.' Grassmann takes the other construction without Sāyaṇa's fantastic explanation in that connection of वृषा. Ludwig is not afraid to say categorically that in उषसाम् here we have an old instrumental form. 'उषसाम् is herein instrumental: we find that the full termination of the third case is preserved especially before a following vowel, in case where it was easy (as modern philologists do) to confuse it with the genitive pl.' Ludwig refers to another case, but it is not necessary to follow up so extravagant a theory. [Pischel takes उषसाम् as an acc. In some texts, he urges, words such as पुर् have to be read as two syllables and गीर्भिः, पूर्भिः as three, showing that the original forms must have been पुरा, गिराभिः पुराभिः. It may have been the same with उषस्. (Ved. St., I, p. 185)].

For वृषा see Max Müller's note on the word already referred to. The strong bull of the dawns, the bull that accompanies the dawns and urges them on is, I think, as Sāyaṇa says, the sun. But compare Max Müller's explanation. 'The hero who yearns for the dawns is generally Indra: here, however, considering that Agni is mentioned in the preceding verse, it is more likely that this god, as the light of the morning, may have been meant by the poet.'

3. Sāyaṇa seems right in referring the second line to Uṣas. It is when the sun has entered heaven and earth that the dawn can spread her light far and wide. But, as far as the words go, मही मित्रस्य वरुणस्य माया may also refer to the sun, and so Grassmann takes them. This enables him to translate चन्द्रेव 'like the fair one,' that is, I presume, the dawn. Delbrück suggests that चन्द्रेव is perhaps a Vedic sandhi for चन्द्रमिव. Compare Roth's explanation of गृहो as गृहम्, No. 31, verse 13 (p. 282 *infra*).

---

## No. 9

*Maṇḍala* IV. *Sūkta* 46

*Sāyaṇa* :

पञ्चमेऽनुवाके त्रयोदश सूक्तानि। तत्राग्रं पिबेति सप्तर्चं प्रथमं सूक्तं वामदेवस्यार्षं गायत्रम। कृत्स्नामिन्द्रवायुदेवताकमाद्या केवलवायव्या। तथा चानुक्रान्तम्। अग्रं वायव्याद्यैन्द्रवायवं तु गायत्रमिति। सूक्तविनियोगो लैङ्गिकः। आद्ये द्वे ऐन्द्रवायवग्रहस्य याज्ये। तथा च सूत्रितम् अग्रं पिबा मधूनामिति याज्ये अनवानमिति ( Āśval. v, 5 ) ॥

[ *Notes* :

For the distinction between वायु and वात see Macdonell's Vedic Mythology, pp. 81-2. ]

Varse 1

*Padapāṭha* :

**अग्रंम् पिब मधूंनाम् सुतम् वायोइति दिविंष्टिषु। त्वम् हि पर्वऽपाः असिं ॥ १**

*Sāyaṇa* :

हे वायो त्वमग्रमिन्द्रादिभ्यः पूर्वं मधूनां मधुरसानां सोमानां संबन्धिनं सुतमभिषुतं रसं पिब। कुत्रेति तदुच्यते। दिविष्टिषु दिवः स्वर्गस्य प्रापकेषु यज्ञेषु। यद्वा अस्माकं दिवः स्वर्गस्य एषणेषु निमित्तेषु। त्वं हि त्वं खलु पूर्वपा असि। हिशब्दो देव दधिषे पूर्वपेयमित्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थः (Ṛ.V. vii, 92, 1)। वायोरग्रपानं देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्नहं प्रथमः पिबेयमित्यादि ब्राह्मणेस्पष्टमाम्नातम्। तत्र हि वायुराजिं प्रथमं धावित्वाग्रपानं लब्धवान् ( Ait. Br. ii, 25 ) ॥

## Verse 2

*Padapāṭha* :

शतेन॑ न॒ः अ॒भिष्टि॑ऽभिः नि॒युत्वा॑न् इन्द्र॑ऽसारथिः । वा॒यो॒-
इति॑ सु॒तस्य॑ तृ॒म्प॒त॒म् ॥ २

*Sāyaṇa* :

हे वायो नियुत्वान्[1] नियुद्भिस्तद्वान् इन्द्रसारथिः इन्द्रसहायः सन् त्वं शतेन अपरिमितैः अभिष्टिभिः अभित एषणीयैः कामैर्निमित्तभूतैः आगच्छेति शेषः । आगत्य च सुतस्य सुतमभिषुतं नोऽस्मदीयं सोमं तृम्पतम् पिबतं त्वमिन्द्रश्च । इन्द्रस्य साहित्यं ब्राह्मण एवोक्तम् । तत्तुरीयभागिन्द्रोऽभवत्त्रिभाग्वायुरिति तुरीये हैव संग्रहीतारो वदन्ते-मुनैवानूकाशेन यदद इन्द्रः सारथिरिव भूत्वोदजयदिति वा ॥ (Ait.Br., ii, 25) ॥

## Verse 3

*Padapāṭha* :

आ वा॒म् स॒हस्र॑म् हर॑यः इन्द्र॑वायू॒ इति॑ अ॒भि प्रय॑ः । वह॑न्तु
सोम॑ऽपीतये ॥ ३

*Sāyaṇa* :

हे इन्द्रवायू[2] वां युवां सहस्रं हरयः सहस्रसंख्याका अश्वाः प्रयः अन्नं प्रति त्वरयन्तः सन्ति । अत्र हरिशब्दोऽश्वसामान्यवचनः ते सोमपीतये आ वहन्तु ॥

## Verse 4

*Padapāṭha* :

रथ॑म् हिर॑ण्यऽवन्धुरम् इन्द्र॑वायू॒ इति॑ सु॒ऽअ॒ध्व॒रम् । आ हि
स्थाथ॑ः दि॒वि॒ऽस्पृश॑म् ॥ ४

*Sāyaṇa* :

हे इन्द्रवायू हिरण्यवन्धुरं हिरण्मयनिवासाधारकाष्ठोपेतं दिविस्पृशं द्युलोकस्पर्शिनं स्वध्वरं शोभनाध्वरवन्तं रथम् आ स्थाथो हि आस्थितौ खलु । यस्मादेवं तस्मादागच्छतमित्यर्थः । स्वध्वरं प्रत्यास्थाथ इति वा व्याख्येयम् ॥

---

[1] S. K. under Pāṇ. vi, i, 176; for the sandhi in the saṁhitāpāṭha, see M's V. G. S., para 39. See also note 4 on No. 2 Verse 11 (p. 72) and note 2 on No. 6 Verse (p. 115) *supra*.

[2] 3b etc. I'ndrā-Vā́yū—Arnold's Vedic Metre, p. 302.

Verse 5

*Padapāṭha* :

रथे॑न पृ॒थु॒ऽपाज॑सा दा॒श्वांस॑म् उप॑ ग॒च्छ॒त॒म् । इन्द्र॑वायू॒-
इति॑ इ॒ह आ ग॒त॒म् ॥ ५

*Sāyaṇa* :

रथेन पृथिव्यादिकस्तृचो दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रे ऐन्द्रवायवो द्वितीयः । सूत्रितं च । रथेन पृथुपाजसा ( this Verse ) बहवः सूरचक्षस ( ṚV. vii, 66, 10 ) इति ( Āśval vii, 12 ) ॥

हे इन्द्रवायू पृथुपाजसा प्रभूतबलेन रथेन दाश्वांसं[1] दातारं यजमानमुप गच्छतम् । तदर्थमिह अस्मिन्यज्ञे आ गतमागच्छतम् ॥

Verse 6

*Padapāṭha :*

इन्द्र॑वायू॒इति॑ अ॒यम् सु॒तः तम् दे॒वेभिः॑ स॒ऽजोष॑सा । पिब॑-
तम् दा॒शुषः॑ गृ॒हे ॥ ६

*Sāyaṇa* :

हे इन्द्रवायू अयं सोमः सुतः अभिषुतः । तं सोमं देवेभिर्देवैः सजोषसा समानप्रीतौ दाशुषो हविर्दातुः गृहे यागशालायां पिबतम् ॥

Verse 7

*Padapāṭha :*

इ॒ह प्र॒ऽयान॑म् अ॒स्तु॒ वा॒म् इन्द्र॑वायू॒इति॑ वि॒ऽमोच॑नम् । इ॒ह
वा॒म् सोम॑ऽपीतये ॥ ७

*Sāyaṇa* :

हे इन्द्रवायू वां युवयोः इह अस्मिन्यज्ञे प्रयाणं गमनमस्तु । इह अस्मिन्नेव यज्ञे वां सोमपीतये विमोचनमश्वानामस्तु । पर्यवसानत एकार्थत्वेऽप्यादरार्थत्वादविरोधः॥

---

[1] M's V. G. S., para 157 b.

## No. 10

*Maṇḍata* IV *Sūkta* 54

*Sāyaṇa* :

अभूद्देव इति षडृचं नवमं सूक्तं वामदेवस्यार्षं सावित्रम् । अन्त्या त्रिष्टुप् । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । तथा चानुक्रमणिका । अभूद्देवः षट् त्रिष्टुबन्तमिति । अग्निष्टोमे वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदम् । तथा च सूत्रम् । अभूद्देव एकया च दशाभिश्च स्वभूते इति (Āśval. v, 18) आद्या सावित्रग्रहस्यानुवाक्या । तथा च सूत्रम् । सावित्रेण ग्रहेण चरन्त्यभूद्देवः सविता वन्द्यो नु इति ( Āśval. v. 18 ) ॥

*Note* :

The root सु or सू, from which the word सवितृ is derived, has three principal significations : ( 1 ) to generate or bring forth ; ( 2 ) to pour forth a libation ; and ( 3 ) to send or impel. When treating of derivatives of this root as applied to सवितृ, Sāyaṇa sometimes gives them the sense of sending or impelling, and sometimes of permitting or authorizing (अनुज्ञा). In a few places he explains the root as meaning to beget. ... ... ... The word प्रसवितृ as well as various other derivatives of the root सु, are introduced in numerous passages of the ṚV. relating to the god सवितृ, with evident reference to the derivation of that name from the same root, and with a constant play upon the words, such as is unexampled in the case of any other deity. '— Muir, V., p. 165.]

### Verse 1

*Padapāṭha :*

**अभूत् देवः सविता वन्द्यः नु नः इदानीम् अह्नः उपऽवाच्यः नृभिः । वि यः रत्ना भजति मानवेभ्यः श्रेष्ठम् नः अत्र द्रविणम् यथा दधत् ॥ १**

*Sāyaṇa* :

स सविता[1] देवः अभूत् प्रादुरासीत् । अतः नु क्षिप्रमेव नोऽस्माकं वन्द्यः वन्दनीयो भवति । इदानीं यागकाले अह्नस्तृतीये सवने नृभिरस्मदीयैर्होतृभिः उपवाच्यः स्तुत्यो भवति । यः देवो मानवेभ्यः मनोरपत्येभ्यः यजमानेभ्यस्तेषामर्थाय रत्ना रमणीयानि धनानि वि भजति । स देवः श्रेष्ठं प्रशस्यं द्रविणं गवादिलक्षणं धनं नः अस्मभ्यम् अत्रास्मिन्कर्मणि यथा दधत् दद्यादित्यर्थः । तथा वन्द्य उपवाच्यश्चाभूदिति ॥

---

[1] **Savitr : Muir's S. T., Vol. V, sec. xi ; M's Ved. Myth., pp. 32–34 ; Hopkin's Rel. Ind., pp. 46–50. For derivation of the name, see Yāska's Nir. x, 31 and Muir's S. T., Vol. V, sec. xi ( 2 ), p. 165.**

[ *Note* :[1]

For the distinction between Sūrya and Savitṛ see Kaegi's Ṛgveda, p. 57. ][2]

1. इदानीमह्नः. 'Now of the day, at this point of the day, now in the morning.' इदाह्नः iv. 33, 11 presents a complete parallel, except that there the period of the day indicated by इदा is expressly mentioned in the words तृतीये अस्मिन्सवने which follow. Compare Sāyaṇa : इदा इदानीं चमसादिनिर्माणानन्तरमह्नः सुत्याहसंबन्धिनस्तृतीये सवने. In vii, 41, 4— उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्-इदानीम् is perhaps not to be taken as Grassmann ( Dictionary, otherwise in Translation ) does with अह्नाम्. But that construction occurs at vii, 34, 1. Compare also viii, 22, 11 and 13, where the phrases इदा चिदह्नः and इदा चिदहानाम् are used as synonymous, Sāyaṇa giving ( दिवसस्य, अह्नाम् ) प्रातःकाले.

Verse 2

*Padapāṭha* :

**देवेभ्यः हि प्रथमम् यज्ञियेभ्यः अमृतऽत्वम् सुवसि भागम् उत्ऽतमम् । आत् इत् दामानम् सवितः वि ऊर्णुषे अनूचीना जीविता मानुषेभ्यः ॥ २**

*Sāyaṇa* :

प्रथमं देवेभ्यो हि । हिशब्दः प्रसिद्धौ । देवेभ्यः याज्ञियेभ्यः यज्ञार्हेभ्यः अमृतत्वं तत्साधनमुत्तममुत्कृष्टतमं भागं सोमादिलक्षणं सुवसि अनुजानासि । आदित् अनन्तरमेव दामानं हविषां दातारं हे सवितः वि ऊर्णुषे प्रकाशयसि । मानुषेभ्यः यजमानेभ्यः जीविता जीवितानि अनूचीना अनुक्रमयुक्तानि । पितृपुत्रपौत्रा इत्यनुक्रमः । ईदृशानि जीवितानि पश्चाद्व्यूर्णुषे ॥

---

1 Inserted here from the Supplementary Notes in the 3rd Ed.

2 See Yāska's Nir., xii, 12 ; Sāy. on ṚV. iv, 53, 6 ; v, 81, 4 ; vii, 45, 1; M's Ved. Myth., pp. 33–34.

*Notes* :

1. स्तवसि. The verb is chosen on account of its relation to the name of the god. Compare स्तवताद verse 3, स्तवन्ति verse 4, स्तवसि and स्तवाय ते verse 5 below. It keeps its accent on account of the हि in the sentence. Cf. also the accent of the verbs in Verses 1 and 4 of No. 9. [1]See Whitney, para. 595 e.

2. दामानम्, It is clear that Sāyaṇa's explanation is wrong. दामानम्, here corresponds to भागम् in the previous clause, and the words अनूचीना जीविता are in apposition to it, as अमृतत्वम् there is in apposition to भागम्. But there is some difference of opinion as to the meaning to be assigned to दामानम् here. Roth recognises four words दामन्, two accented on the first syllable, and two on the last. 1. दामन् ( from दा to give[2] ) *m.* giver ( of इन्द्र ) : रायो दामा मतीनाम् ( vi, 44, 2 )— Sāy., रायो धनस्य दामा दाता ; ( of अग्नि ) : दामानम् ( viii, 23, 2 )—Sāy., दातारम्. 2. दामन् ( from the same root ) *n.* giving, a gift : इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः ( viii, 93, 8 )— Sāy., दामने धनादिदानाय ; स आ गमदिन्द्रो यो वसूनां चिकेतद्दातुं दामनो रयीणाम् [ 'The genitive is dependent on चिकेतद्' ] ( v, 36, 1 ). Compare अदामन्, सुदामन्. 3. दामन् (from दा to cut) *m.* or *f.* The allotted part, the portion. आदिद्दामानं &c. ( our passage ). नाह दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम् ( x, 42, 8 ). न ते दामान आदभे ( viii, 21, 16 ). Roth's fourth दामन् is the common word for a band or girdle, which he derives from a root दा द्यति, not found in the Dhātupāṭha, but existing in the Greek δέω to bind, and in such forms as, for example, सन्दितम् bound, No. 2 verse 3 *supra.*

In x, 42, 8 Sāyaṇa takes दामानम् to mean दातारम् as he does here. But on viii, 21, 16 he has ते तव दामानः तानि दानानि ascribing to the word the meaning we wish to give it here. The third case दाना ( for दाम्ना, see Whitney, 425 e ), the accent of which shows that it belongs to our word, and not to the neuter paroxytone, occurs once or twice, and is explained by Sāyaṇa in the same way. So, for example, in v, 52. 14 where he has दाना हविर्दानेन.

3. व्यूर्णुषे.[3] 'Thou showest.' Compare 'hath brought immortality *to light.*' 2 Tim. i, 10.

---

[1] M's V. G. S., App. III, para 19 B ( p. 467 ).

[2] Av. √ dā ; Av. dāman-creature, creation ( Jackson ).

[3] M's V. G. S., App. I, √ vṛ-to cover ( p. 419 ).

Verse 3

*Padapāṭha* :

अचित्ती यत् चकृम दैव्ये जने दीनैः दक्षैः प्रऽभूती पुरुषत्वता । देवेषु च सवितः मानुषेषु च त्वम् नः अत्र सुवतात् अनागसः ॥ ३

*Sāyaṇa* :

हे सवितः वयमचित्ती अप्रज्ञया दैव्ये जने त्वयि दीनैः दुर्बलैः पुत्रादिभिः ऋत्विग्भिर्वा तथा दक्षैः प्रवृद्धैर्वा तैः प्रभूती प्रभूत्या ऐश्वर्यमदेनेति यावत् । पुरुषत्वता पुरुषवत्तया च यदागश्चकृम । न केवलं त्वय्येव कृतमपि तु देवेष्वन्येषु मानुषेषु चाज्ञानादिभिर्यच्चकृम नः कृतवतोऽस्मान् त्वमत्र अस्मिन्कर्मणि अनागसः अपापान् सुवतात्[1] अनुजानीहि ।

*Notes* :

1. अचित्ती.[2] Whitney, paras, 336 c and 340 c. Compare प्रभूती in the next line.

2. दैव्ये जने. 'The folk of the gods.' The expression refers to men as well as to gods, the simplest construction being to take the words देवेषु च मानुषेषु च following in the same reference 'whether gods or men'.

3. दीनैर्दक्षैः 'With feeble wit.' It does not much matter whether we take this as exactly parallel with the singular instrumentals, or connect it more closely with the verb 'whatever we have done, with our feeble wit, through,' &c. For the substantive use of दक्ष Roth quotes the following passages among others : vii, 60, 6 अचेतसं चिच्चितयन्ति दक्षैः— Sāyaṇa, दक्षैः=सामर्थ्यैः ( M. M. from his MS. B. ; so also my MS. ). ix, 67, 26, अग्ने दक्षैः पुनीहि नः— Sāyaṇa, दक्षैः= सामर्थ्यवद्भिः ( &c. धामभिः ). Ludwig completely misunderstands Sāyaṇa's explanation here. Sāyaṇa explains literally 'whatever we have done with the weak ( children, priests ! ) out of ignorance, or with the mighty out of insolence ( ऐश्वर्यमदेन ), in sport, in human wise, &c.' Sāyaṇa takes अचित्ती, प्रभूती and पुरुषत्वता as three strictly co-ordinate words, all three going with दीनैः and with दक्षैः alike. Compare the word अज्ञानादिभिः in his commentary below. दीनैर्दक्षैः in his view does not mean 'with the weak or the strong,' but 'through the weak and the strong.' The guilt-

1 M's V. G. S. pp. 125–428.

2 L's N. I. V. p. 380 ; M's V. G. p. 281 ; Pāṇ. vii, 1, 39.

of the son is the guilt of the father. Priests, at whom Ludwig stumbles, are suggested because the guilt of the needy priest, who makes a mistake in the sacrifice, falls on his patron. Ludwig's idea that the difficulty, which is largely of his own making, is to be got rid of by taking our words to be old nominative plurals, on the analogy of certain old Greek and Latin nominatives in ais and is, looks like a joke. Yet it duly appears in his translation, ' whatever we have done against the folk of the gods, as weak ones out of ignorance, or as strong ones out of insolence. '

4. पुरुषत्वता. This word occurs in only one other passage, v, 48, 5, where Sāyaṇa's note is पुरुषत्वता। पुरुषत्वेन कामानां पुरकत्वेन वा युक्तम्. Roth calls it an adverb. In form it is probably a third case of the same kind as अचित्ती and प्रभूती above. See Whitney, paras 363d, 365a. The lengthening of the vowel of the first syllable in our passage [ in the Saṁhitā pāṭha ] was noted in the Prātiśākhya ( 588, Grassmann,). [ इषितत्वता is another instance of a double abstract suffix. ]

Verse 4

*Padapāṭha* :

न प्रऽमियें सवितुः दैव्यंस्य तत् यथां विश्वंम् भुवंनम् धार-यिष्यातिं । यत् पृथिव्याः वरिंमन् आ सुऽअङ्गुरिः वर्ष्मंन् दिवः सुवातिं सत्यम् अस्य तत् ॥ ४

*Sāyaṇa* :

देवसुवां हविःषु सवितुः सत्यप्रसवस्य न प्रमिय इति याज्या। सूत्रितं च न प्रमिये सवितुर्दैव्यस्य तद् बृहस्पते प्रथमामिति ( Āśval. iv, 11 )।

सवितुः दैव्यस्य देवस्य तत्कर्म न प्रमिये न प्रमीयेत प्रहिंस्येत। हिंसार्हं न भवतीत्यर्थः। कृत्यार्थे केन्प्रत्ययः। यद्वा दैव्यस्येति व्यधिकरणे षष्ठी। सा च कर्मार्था। दैव्यं कर्मेत्यर्थः कथमहिंस्यमित्यत आह यथा। विश्वं भुवनं धारयिष्यति धारयति। विश्वधारणरूपं यत्कर्मास्ति तन्न प्रमिये। तथा स्वङ्गुरिः शोभनाङ्गुल्युपलक्षितहस्तो यद् यः पृथिव्या वरिमन्[1] आकारश्चार्थे। भूम्या उरुत्वे च सुवति प्रेरयति। तथा दिवः द्युलोकस्य वर्ष्मन् उरुत्वे च सुवति। अस्य देवस्य तदुक्तं कर्म सत्यमबाध्यमिति॥

---

[1] M's V. G. S., para 90, 2. ( p. 67 ).

*Notes* :

1. प्रमिये. The form occurs only here. In the hymn immediately following ( iv, 55, 7 ) we have प्रमियम्, which Sāyaṇa explains हिंसितुम्. Roth takes both forms to be infinitives.[1] For the construction here see Whitney, para 982c, and compare his example, नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे— Indra is not to be put down, the mighty one is not to be overpowered ( viii, 78, 5 ). Compare also न यो वराय, our No. 4, verse 5.

[ 2. वर्ष्मन् = height, highest place. वर्ष्माणम् = समुच्छ्रितदेशम् — Sāy. on x, 93, 4. ]

3. [ Sāyaṇa apparently takes तत् in the first line and यथा in the second to be correlatives, taking यथा धारयिष्यति = धारणरूपं यत्कर्म. The construction he suggests for the second half of the verse is यत् ( + यः, or = यः, if यः is at all genuine ) स्वङ्गुरिः सुवति अस्य तत् ( *i. e.*, the preceding ) अबाध्यम्. ] ( There is one mistake in Max Müller's text of the commentary. दैवस्येति व्यधिकरणे the reading of his Mss. A. B. C. 2 is the only right reading. The meaning is that the adjective is to be taken with कर्म, as Sāyaṇa goes on to say. )

It seems clear that यत् is the accusative after सुवति, answering to the following तत्. But what does तत् in the first line refer to ? And is Sāyaṇa right in taking धारयिष्यति as simply equal to धारयति ? Grassmann translates ' not to be injured is this work of the God Savitar, by which ( यथा ) he will always support the whole world. ' Delbrück takes यथा in the sense of ' so that, nay rather will he, ' which gives a better, but a more doubtful meaning. Roth takes यथा in the ordinary sense of ' so that ' which is probably right.

Is it possible that the words न प्रमिये सवितुर्दैव्यस्य तत् refer not to Savitṛ's works in general but to his work of pardoning sin ( verse 3 ), which none can hinder, so that he will always hold up the world, inasmuch as what he does on earth or in heaven stands sure ?

4. सत्यमस्य तत्. A good example of a kind of difficulty not peculiar to the Veda. Do the words mean ' Surely that is his ' or ' that ( work ) of his stands sure ' ? The context shows that the latter interpretation is the right one. Roth, who takes the passage so ( dabei bleibt es ), quotes under the same meaning of सत्यम्, विश्वं सत्यं मघवाना युवोरित् ii, 24, 12, where

[1] M's V. G. S., para 167. 1 a ( p. 191 ).

Sāyaṇa construes as he does here, युवयोरेव विश्वं सर्वं स्तोत्रं सत्यं यथार्थम्. Also, iv, 1, 18 ; 22, 6 ; 28, 5 ; viii, 82 5 ; ix, 92, 5 ; x, 22, 13. Grassmann, 'Das its recht sein Werk= That is truly his work.'

Verse 5

*Padapāṭha* :

इन्द्रंऽज्येष्ठान् बृहत्ऽभ्यंः पर्वंतेभ्यः क्षयांन् एभ्यः सुवसि पस्त्यंऽवतः । यथांऽयथा पतयंन्तः विऽयेमिरे एव एव तस्थुः सवितरिति सवायं ते ॥ ५

*Sāyaṇa :*

हे सवितः इन्द्रज्येष्ठान् इन्द्रः परमैश्वर्ययुक्तस्त्वमेव इन्द्रो वा ज्येष्ठः ज्यायान् पूज्यो येषां ते तादृशाः । तानस्मान् बृहद्भ्यः महद्भ्यः पर्वतेभ्योऽप्यधिकान्सुवसि प्रेरयसि । किं च एभ्यः यजमानेभ्यः पस्त्यावतः गृहवतः क्षयान्निवासान् ग्रामनगरादीन् सुवसि प्रेरयसि । यथायथा[1] पतयन्तः गच्छन्तः प्राणिनस्त्वया वियेमिरे विनियम्यन्ते त्वया ते तव सवाय अनुज्ञायै एवैव एवमेव नियमनमनतिक्रम्य तस्थुः तिष्ठन्ति ॥

*Notes :*

1. The difficulties in connection with this verse are very great, and perhaps insuperable. Sāyaṇa's explanation is ingenious, but not convincing. He makes separate clauses out of the first and second lines, reading सुवसि with each. This gives him a contrast between इन्द्रज्येष्ठान् and एभ्यः. By the first word he understands 'us who are Indra-led,' and by second 'these men here, our patrons.' But the way in which Sāyaṇa takes the two clauses is not clear. Ludwig construes अधिकान् with अस्मान् and translates 'thou makest us higher than the high mountains,' I think that अधिकान् goes with क्षयान्, and that Sāyaṇa takes the two clauses to mean 'thou bringest us to dwellings that are higher than the hills, and for them thou bringest dwellings rich in houses.'

The text of Sāyaṇa's explanation of the remainder of the verse is uncertain. If Max Müller's reading पतयन्तो गच्छन्तस्त्वां

---

[1] M's V. G. S., para 189 C. e ( p. 282 ).

वियेमिरे विनियम्यन्ते त्वया be right, Sāyaṇa must be understood as referring the whole clause to the patrons ( यजमानाः ). But it is not easy to see what त्वाम् means here. I prefer the reading पतयन्तः गच्छन्तः प्राणिनस्त्वया &c., and believe that Sāyaṇa, in spite of the grammatical difficulty which his explanation of इन्द्रज्येष्ठान् has raised, is trying to refer this clause to priests and patrons alike, or to all that breathe.

I am unable to arrive at any conviction as to the meaning of the verse. Grassmann translates इन्द्रज्येष्ठान्...पस्त्यावतः 'the high hills thou dost assign to Indra's hosts, and dost make for them these seats full of houses.'

He does not, so far as I know, explain how he gets that meaning. I presume the suggestion is that the construction is anacoluthic : 'Indra and the gods to the high mountains—there thou dost make for them.' Similarly Ludwig, except that he takes एभ्यः as Sāyaṇa does.

Everywhere else in the Ṛgveda — i, 23, 8 ( इन्द्रज्येष्ठा मरुद्गणा देवासः— Sāyaṇa, इन्द्रो ज्येष्ठो मुख्यो येषु ते ) ; ii, 41, 15, viii, 63, 12 ; x, 70, 4— इन्द्रज्येष्ठ is accompanied by a substantive, which makes it clear that it refers to the gods. But there is no reason why here it should not refer to men 'led by Indra,' even though we reject Sāyaṇa's gloss '*us*, led by Indra.' Compare the meaning given above to the phrase दैव्ये जने.

That the gods dwell on the hills is of course a common thought in the Ṛgveda ; compare गिरिष्ठा and गिरिक्षित of Viṣṇu, ii, 12 ( No. 5 ) verses 2 and 3. Also, with Ludwig i, 155, 1 या ( Indra and Viṣṇu ) सानुनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना.

[ At pp. 173-4 of the Ved. St., ii, Pischel has a note on this passage. From पक्षा वयो यथोपरि व्यस्मे शर्म यच्छत and व्यस्मे अधि शर्म तत्पक्षा वयो न यन्तन ( viii, 47, 2 and 3 ) it will be seen, he says, that पक्षा त्वि यम is used of birds and means spreading out the wings. The expression वियतावस्य पक्षौ also occurs in A. V., 10, 8, 18 ; 13, 3, 14. In the present passage too Pischel would take वि यम्, though by itself, to mean the same thing and would translate पतयन्तो वियेमिरे by 'they spread out their wings while they flew.' He takes this to refer to the legend about the hills having once had wings, referred to in the passage from the MS. cited in note 1 on ii, 12, 2 ( No. 5 ), and in many other places besides in Sk. literature. ]

2. पस्त्यावतः. ' Rich in dwellings. ' Compare पस्त्यास्वा, No. 2, verse 10. That this word was written here पस्त्यवतः in the Pada text is duly noted in the Prātiśākhya ( 548, Grassmann).[1]

Verse 6

*Padapāṭha :*

ये ते त्रिः अहंन् सवितरिति सवासः दिवेऽदिवे सौभंगम् आऽसुवन्ति । इन्द्रः द्यावापृथिवीइति सिन्धुः अत्ऽभिः आदित्यैः नः अदितिः शर्म यंसत् ॥ ६

*Sāyaṇa :*

ये यजमानाः हे सवितस्ते त्वदर्थं सवासः सवाः सोमाः । द्वितीयार्थे प्रथमा । सोमान् । यद्वा सवासः सवनानि प्रातरादीनि प्रति त्रिरहन् अभिषुण्वन्ति । न केवलमेकस्मिन्नेवाहनि सवनत्रयेषु अपि तु दिवेदिवे[2] प्रतिदिनं सौभगं सौभाग्यजनकमासुवन्ति अभिषुण्वन्ति । तेभ्यो नोऽस्मभ्यमिन्द्रः शर्म यंसत[3] यच्छतु । द्यावापृथिव्यौ च अद्भिर्विशिष्टा सिन्धुः सिन्ध्वभिमानिदेवता आदित्यैः सहितादितिश्च शर्म यंसत् । सावित्रे सूक्त इन्द्रादीनां निपातमुक्त्वा तेषां प्रार्थना न विरुध्यते ॥

[ *Note :*

1. Instead of taking सवासः as द्वितीयार्थे प्रथमा, as Sāyaṇa does, it would be better to supply the demonstrative pronoun ते to correspond to ये, and as subject either of आसुवन्ति or of ( शर्म ) यंसत्, understood and changed into the plural. In the former case the सौभग would be that of the worshippers; and in the latter it may be that of Savitar even.

2. अहन्त्सवितः etc. Note the insertion of a transitional त् between the final न् and the following स. ]

---

## No. 11

*Maṇḍata* V *Sukta* 26

*Sāyaṇa :*

अग्ने पावकेति नवर्चं द्वादशं सूक्तम् वसूयव ऋषयः । गायत्री छन्दः । अग्निर्देवता । तथा चानुक्रान्तम् । अग्ने गायत्रमिति । प्रातरनुवाक आग्नेये क्रतौ गायत्रे

---

[1] Pastya–Naigh, iii, 4; see Pastya–sad, Pastyā ( fem. pl. ), and Pastyāvant ( explained in the pada tezt as Pastyavant ) in M. and K's Ved. Ind., Vol. I, pp. 511, 512.

[2] M's V. G. S., para 189 C a ( p. 282 ).

[3] M's V. G. S., p. 409 √ yam.

छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च । अग्ने पावक दूतं व इति सूक्त इति ( Āśval. iv, 13 ) । आधाने द्वितीयायामिष्टौ प्रथमस्य हविषोऽग्ने पावकेत्येषा याज्या । सूत्रितं च । स नः पावक दीदिवोऽग्ने पावक रोचिषेति ( Āśval. ii, 1 ) ॥
[ *Notes* :

Translated in ' Vedic Hymns, ' Part ii ( S. B. E. ) p. 418. ]

Varse 1

*Padapāṭha* :

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान् वक्षि यक्षि च ॥ १

*Sāyaṇa* :

हे पावक शोधक रोचिषा स्वदीप्त्या मन्द्रया देवानां मादयित्र्या जिह्वया च हे देव द्योतमान अग्ने देवानां वक्षि यज्ञार्थमावह यक्षि च तान्यज ॥

*Notes* : -

1. अग्ने. For the accent, see note 1 on No. 8, verse 1. अग्नि itself takes the accent on the last syllable.

2. पावकः is always explained as here by Sāyaṇa. Roth makes it mean ' pure, ' not ' purifying. ' From its metrical position, especially at the end of a pāda with the value ⏑ — ⏑, Roth conjectures that the Vedic poets pronounced the word पवाक.[1]

3. आ देवान्वक्षि यक्षि च. यक्षि is accented because it stands at the head of its own clause.[2] See Whitney, paras, 593 and 594b. For the forms वक्षि and यक्षि see Whitney, 624. ' In the Veda ( but hardly outside of the RV. ) are found certain second singular forms, having an imperative value, made by adding the ending *si* to the ( accented and strengthened ) root. ... Their formal character, is somewhat disputed ; but they are probably indicative persons of the root-class ( *ad* class ), used imperatively. ' Whitney gives a list which includes our examples here, and also सत्सि, a form which occurs in this hymn, v. 5. Delbrück ( Das Altindische Verbum, pp. 31 and 34 ) also holds that a form like सत्सि is made directly by adding *si* to the simple root. ' That such a form, ' he adds, ' should take an imperative signification is not surprising. We also say ' du gehst ' ( thou goest ), in the same sense as ' geh ' ( go thou ). '

---

1 ' pavāka is everywhere to be restored ' — Arnold's Vedic Metre p. 143.

2 M's V. G. S., App. III, para 8 B a, b ( p. 452 ).

### Verse 2

*Padapāṭha* :

तम् त्वा घृतस्नोइतिघृतऽस्नो ईमहे चित्रभानोइतिचित्रऽभानो स्वःऽदृशम् । देवान् आ वीतये वह ॥ २

*Sāyaṇa* :

हे घृतस्नो घृतस्य प्रेरक यद्वा घृतेन जनित हे चित्रभानो । चित्रा नानाविधा भानवो रश्मयो यस्यासौ चित्रभानुः । तस्य संबोधनम् । स्वर्दृशं सर्वद्रष्टारं तं त्वा त्वामीमहे याचामहे । अतो वीतये हविषां भक्षणाय देवाना वह ॥

*Notes* :

1. तं त्वा. See Whitney, para. 498.

2. घृतस्नो. The form घृतस्नूः ( ace. pl. fem. ) occurs as an epithet of गिरः in a verse, ii, 27, 1, which is commented on in the Nirukta, xii, 36, where the note on घृतस्नूः is घृतप्रस्नाविन्यो घृतप्रस्नाविण्यो घृतसानिन्यो घृतसारिण्य इति वा. Sāyaṇa's explanation of the word in that passage is घृतप्रस्नाविणीः घृतं क्षरन्तीः. It would seem that Yāska and Sāyaṇa identified our word with the ( oxytone ) घृतस्नु which occurs, for example, in i, 16, 2, where Sāyaṇa explains घृतस्नुवः by घृतस्नाविणीः. Roth distinguishes between the two words, accepting for the [ latter ] the [ first ] explanation and etymology offered by Yāska, and deriving the [ former ] word from घृत + स्नु = सानु, the whole compound being taken as equivalent to घृतपृष्ठ, an epithet of Agni which frequently occurs. See for example, v, 4, 3, where Sāyaṇa's note is घृतपृष्ठं प्रदीप्तपृष्ठोपलक्षितशरीरम्. So also on i, 164, 1, he gives प्रदीप्तपृष्ठः as an alternative explanation of the word. The word स्नु occurs, for example, in viii, 46, 18, गिरीणां स्नुभिः. [ Oldenberg takes घृतस्नु to be 'a compound of घृत with a noun स्नु which seems to be different from सानु and connected with the root स्ना.'— Ved. Hymns, ii, p. 319. He translates the expression here by 'who swimmest in घृत.' ]

3. स्वर्दृशम्. [ Pronounce su-ardṛśam. ] The explanation in the commentary here is an idle accommodation to the context. On v, 63, 2 स्वर्दृशा ( voc. du. ) is explained by स्वर्गस्य द्रष्टारौ. [ 'of sunlike aspect'— Oldenberg. ]

Verse 3

*Padapāṭha* :

वीतिऽहोत्रम् त्वा कवे द्युऽमन्तम् सम् इधीमहि । अग्ने बृहन्तम् अध्वरे ॥ ३

*Sāyaṇa* :

हे कवे क्रान्तदर्शिन्नग्ने वीतिहोत्रं कान्तयज्ञं द्युमन्तं दीप्तिमन्तं बृहन्तं महान्तं त्वा त्वामध्वरे यज्ञे समिधीमहि[1] समिद्भिः संदीपयामः ॥

*Note* :

वीतिहोत्रम्. In his note on ii, 38, 1 also Sāyaṇa explains वीतिहोत्र by कान्तयज्ञ. Compare his explanation of the nom. वीतिहोत्रः, iii, 24, 2 : वीतिः प्रीतिविषयं होत्रं अग्निहोत्रादिकं यस्य असौ वीतिहोत्रः. On i, 84, 18 he has another explanation, प्राप्तयज्ञः. On viii, 31, 9, the only other passage in which the word occurs, his note is वीतिहोत्रा वीतिहोत्रौ । वीतिः प्रियकरो होत्रो यज्ञो ययोस्तौ. Roth takes the word to mean 'he who invites to the sacrifice.' [ Pronounce त्वा as tu-ā. ]

Verse 4

*Padapāṭha* :

अग्ने विश्वेभिः आ गहि देवेभिः हव्यऽदातये । होतारम् त्वा वृणीमहे ॥ ४

*Sāyaṇa* :

हे अग्ने विश्वेभिः सर्वैः देवेभिः देवैः सह त्वं हव्यदातये हविषां दात्रे यजमानाय तदर्थमा गहि यज्ञं प्रत्यागच्छ । यतो होतारं देवानामाह्वातारं त्वा त्वां वृणीमहे प्रार्थयामहे ॥

*Note* :

हव्यदातये. On v, 51, 1, where the same formula occurs, Sāyaṇa's note is हव्यदातये अस्माकं हविर्दानाय । तद्दात्रे यजमानाय वा. And at verse 5 of the same hymn he, as here, gives the latter only of the two interpretations.

Verse 5

*Padapāṭha* :

यजमानाय सुन्वते आ अग्ने सुऽवीर्यम् वह । देवैः आ सत्सि बर्हिषि ॥ ५

---

[1] M's V. G. S., p. 371.

*Sāyaṇa* :

हे अग्ने सुन्वते अभिषवं कुर्वते यजमानाय सुवीर्यं शोभनं बलम् आ वह प्रापय। किं च देवैः सह बर्हिषि [1] यज्ञे आ सत्सि आसीदेति ॥

*Note* :

सत्सि. See note 3 on verse 1 above. [ Pronounce a'gne su-vīri-am. ]

Verse 6

*Padapāṭha* :

**सम्ऽइधानः सहस्रऽजित् अग्ने धर्माणि पुष्यसि । देवानाम् दूतः उक्थ्यः ॥ ६**

*Sāyaṇa* :

सहस्रजित्सहस्रस्य जेतरग्ने समिधानः हविर्भिः समिध्यमानः उक्थ्यः प्रशस्यस्त्वं देवानां दूतः सन् धर्माणि नः कर्माणि यज्ञादिक्रियाः पुष्यसि पोषयसि ॥

[ *Note* :

धर्माणि. The stem is धर्मन्.[2] Pronounce ukthi-aḥ. ]

Verse 7

*Padapāṭha* :

**नि अग्निम् जातऽवेदसम् होत्रऽवाहम् यविष्ठ्यम् । दधात देवम् ऋत्विजम् ॥ ७**

*Sāyaṇa* :

हे यजमानाः जातवेदसम् । जातानि भूतानि वेत्तीति जातवेदाः । तं होत्रवाहं होत्रस्य यज्ञस्य वोढारं यविष्ठ्यं युवतमं देवं द्योतमानमृत्विजमृतौ यष्टारमग्निं नि दधात निधत्त ॥

*Notes* :

1. जातवेदसम्. In his explanation of iv,58,8 Yāska has the following note on this word, जातवेदाः कस्मात् । जातानि वेद । जातानि

---

[1] "The Avestan Baresman is cognate with barezis̆, cushion, Skt. barhis, the carpet of grass..." Moulton ( Early Zoroastrianism, pp. 68, 69, 190 ).

[2] "Just as the Skt. *dharma* usurps the place of the Vedic *dhárman*, so *vṛṣa* supplants *vṛ'ṣan*" -Lanman ( N. I. V., pp. 526-527 ).

वैनं विदुः। जाते जाते विद्यत इति वा। जातवित्तो वा जातधनः। जातविद्यो वा जातप्रज्ञानः।[1] The first of these interpretations seems the best, and is the one generally followed by Sāyaṇa. [ Pronounce yaviṣṭhi-am. ]

2. दधातः ( दधात in Pada text ). 'The older language has irregularities [ in inflection of धा and दा ][2] as follows : 1. the usual strong forms in 2nd plural, *dadhāta* and *adadhāta*, *dadāta* and *adadāta* ; 2. the usual *tana* endings in the same person, *dhattana*, *dadātana*, &c. ; 3. the 3rd singular indicative active *dadhe* ( like 1st sing. ) ; 4. the 2nd singular imperative active *daddhi* ( for both *dehi* and *dhehi* ). And R. has *dadmi*.' Whitney, para 669.

Verse 8

*Padapāṭha* :

**प्र यज्ञः एतु आनुषक् अद्य देवव्यंचःऽतमः। स्तृणीत बर्हिः आऽसदे ॥ ८**

*Sāyaṇa* :

अद्य अस्मिन्नहनि देवव्यचस्तमः देवैः प्रकाशमानैः स्तोतृभिर्व्याप्ततमः यज्ञः यज्ञसाधनं हविः आनुषगनुषक्तं यथा भवति तथा प्र एतु देवान् गच्छतु। हे ऋत्विज आसने अग्नेरासदनार्थं बर्हिः स्तृणीत ॥

*Note* :

देववचस्तमः. On i, 142, 5, स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे। वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः, Sāyaṇa explains this word by अतिशयेन देवगामिनम् ; on iii, 4, 4, ( देवव्यचाः sc. बर्हिः ) by देवैर्व्याप्तम्; on v, 22, 2, where our phrase recurs, by देवानामाप्ततमः. Roth takes the word to mean 'affording space for the gods.' Our verse is almost a repetition of v. 22, 2.

Verse 9

*Padapāṭha :*

**आ इदम् मरुतः अश्विना मित्रः सीदन्तु वरुणः देवासः सर्वया विशा ॥ ९**

*Sāyaṇa* :

मरुतः मरुद्गणा अश्विना अश्विनौ देवानां भिषजौ मित्रः सूर्यः वरुणश्च देवासः एते सर्वे देवाः सर्वया विशा समस्तेन स्वीयेन परिजनेन सार्धमिदं बर्हिः आ सीदन्तु ॥

---

1 Nir., vii, 19 ; Ait. Br., iii, 3, 12. 2 M's V. G. S. pp. 388, 392.

## No. 12

*Maṇḍala* V *Sūkta* 83

*Sāyaṇa* :

अच्छा वदेति दशर्चमेकादशं सूक्तं भौमस्यात्रेरार्षम्। अत्रेयमनुक्रमणिका। अच्छ दशात्रिः पार्जन्यमुपाद्यास्तिस्रो जगत्य उपान्त्यानुष्टुबिति। यत्पर्जन्येत्येषा नवम्यनुष्टुप् वि वृक्षानित्याद्यास्तिस्रो जगत्यः। शिष्टाः षट् त्रिष्टुभः। पर्जन्यो देवता। अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेयाः। सूत्रितं च। संस्थितायां सर्वा दिश उपतिष्ठेताच्छा वद तवसं गीर्भिराभिरिति चतसृभिः प्रत्यृचं सूक्तेन वेति ( Āśval. ii, 13 )॥

*Note* :

Consult for this hymn[1] Bühler's paper and translation in Benfey's Orient and Occident, i, 216, and Muir, Sanskrit Texts, v, 140.[2]

Verse 1

*Padapāṭha* :

**अच्छं वद तवसंम् गीःऽभिः आभिः स्तुहि पर्जन्यंम् नमंसा आ विवास। कनिंक्रदत् वृषभः जीरऽदांनुः रेतः दधाति ओषंधीषु गर्भंम् ॥ १**

*Sāyaṇa* :

हे स्तोतस्तवसं बलवन्तं पर्जन्यम्[3] अच्छाभिप्राप्य वद[4] प्रार्थय। पर्जन्यशब्दो यास्केन बहुधा निरुक्तः। पर्जन्यस्तृपेराद्यन्तविपरीतस्य तर्पयिता जन्यः परो जेता वा जनयिता वा प्रार्जयिता वा रसानामिति[5] (Nir. x, 10)। आभिर्गीर्भिः स्तुतिवाग्भिः स्तुहि नमसा अन्नेन हविर्लक्षणेन आ विवास सर्वतः परिचर। यः पर्जन्यो वृषभः

---

[1] Classed by Arnold as one of the "doubtful hymns."–Arnold's Vedic Metre, p. 43.

[2] where the whole hymn is translated.

[3] Parjanya. Muir's S. T., Vol., V, sec. vii; Max Müller's 'India: What can it teach us?', pp. 183–194; for the derivation of the name, M's Ved. Myth., p. 84; Bloomfield's Rel. Ved., p. 111. Skt. Parjanya = Lith. Perkunos ( Max Müller, Bloomfield etc. ).

[4] vadā–Arnold's Vedic Metre, p. 304.

[5] To these and Bloomfield's *pari*-(about) and *jana*- (folk), guarding the folk, though 'the original etymology is doubtful.' ( B's Rel. Vedic, p. 111 ).

अपां वर्षिता जीरदानुः क्षिप्रदानः कनिक्रदत् गर्जनशब्दं कुर्वन्नोषधीषु गर्भं गर्भस्थानीयं रेतः उदकं दधाति स्थापयति तं स्तुहि ॥

*Notes* :

1. विवास.[1] विवासति is one of ten verbs given in the Nighaṇṭu, iii, 5, with the meaning of परिचरण 'worship.' The word generally occurs, as here, along with आ. Sāyaṇa follows the Nighaṇṭu, except in vi, 51, 8, कृतं चिदेनो नमसा विवासे, where he has विवासो वर्जनं वर्जयामि विनाशयामि (The clause नम आ विवासे occurring in the same verse is explained by नमस्कारं परिचरामि). In the form विवास is a desiderative of वन् or वा (see Whitney, para 1028 g). Roth makes it mean 'seek to win, seek to bring, do homage to, entice.' In vi, 51, 8, the passage referred to above, he would translate 'seek to propitiate.'

2. कनिक्रदत्.[2] Participle of a Vedic intensive of क्रन्दति. Roth refers to Pāṇini, vii, 4, 65. Another form is कनिक्रत् which occurs in ix, 63, 20, but nowhere else. कनिक्रदत् is more frequent: e. g. iv, 50, 5d.

3. जीरदानुः. 'Quick-dropping.' Compare ix, 97, 17, where it is an epithet of वृष्टि. Sāyaṇa, क्षिप्रदानोपेताम्.

Verse 2

*Padapāṭha* :

वि वृक्षान् हन्ति उत हन्ति रक्षसः विश्वम् बिभाय भुवनम् महाऽवधात् । उत अनागाः ईषते वृष्ण्यऽवतः यत् पर्जन्यः स्तनयन् हन्ति दुःऽकृतः ॥ २

*Sāyaṇa* :

अयं मन्त्रो निरुक्ते स्पष्ट व्याख्यातः । तदेवात्र लिख्यते । विहन्ति वृक्षान्विहन्ति च रक्षांसि सर्वाणि चास्माद् भूतानि बिभ्यति महावधात् । महान् ह्यस्य वधः ।

[1] M's V. G. S., p. 200.

[2] M's V. G. S., para, 173.3, p 202.

अल्पनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हन्ति दुष्कृतः पापकृत इति ( Nir. x, 11 ) ॥

*Notes* :

1. महावधात्. Occurs only here and in v, 34, 2, where Sāyaṇa explains महावधः by महावज्रः. It is a बहुव्रीहि as the accent shows.

2. वृष्ण्यावतः. Occurs only here and in vi, 22, 1, where, as here, the vowel of the second ( or third, pronounce vṛ-ṣṇi-ā-va-to ) syllable is long in the Saṁhitā text and short in the Pada text. Sāyaṇa's note there is वृष्ण्यावान् बलवान् (इन्द्रः).

3. दुष्कृतः. 'There does not seem to be any sufficient reason to understand evil-doers here, and in verse 9, of the cloud-demons, who withold rain, or simply of the malignant clouds, as Sāyaṇa in his explanation of verse 9 ( पापकृतो मेघान् ) does. The poet may naturally have supposed that it was exclusively or principally the wicked who were struck down by thunderbolts.[1] Dr. Bühler thinks the cloud-demons are meant.' Muir, S. T., V, p. 141, note.

## Verse 3

*Padapāṭha* :

रथीऽइव कशया अश्वान् अभिऽक्षिपन् आविः दूतान् कृणुते वर्ष्यान् अह । दूरात् सिंहस्य स्तनथाः उत् ईरते यत् पर्जन्यः कृणुते वर्ष्यम् नभः ॥ ३

*Sāyaṇa* :

रथीव[2] रथस्वामीव । स यथा कशया अश्वानभिक्षिपन् दूतान् भटानाविष्करोति तद्वदसौ पर्जन्योऽपि कशयाश्वानभिक्षिपन्नभिप्रेरयन् वर्ष्यान् वर्षकान् दूतान्

[1] [ Cf. *Ottima*. Buried in woods we lay, &c. ( Browning's Pippa Passes, Sc. i ) ].

[2] M's V. G. S., pp. 86-87. 'Probably rathīr iva, ( Lanman ) ' Arnold's Vedic Metre, p. 304.

दूतवद् वृष्टिप्रेरकान्मेघान् मरुतो वा आविः कृणुते प्रकटयति । अहेति पूरणः । एवं सति सिंहस्य । सहतेर्हिंसतेर्वा शब्दकर्मणः सिंहशब्दः । अवर्षणेनाभिभवितुः शब्दयितुर्वा मेघस्य स्तनथा गर्जनशब्दा दूरात् उत् ईरते उद्गच्छन्ति । कदा । यत् यदा पर्जन्यो नभोऽन्तरिक्षं वर्ष्यं वर्षोपेतं कृणुते करोति तदा ॥

Verse 4

*Padapāṭha* :

प्र वाताः वान्ति पतयन्ति विऽद्युतः उत् ओषधीः जिहते पिन्वते स्व१रिति स्वः । इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीम् रेतसा अवति ॥ ४

*Sāyaṇa* :

प्र वाता इति चतुर्थी पर्जन्यस्य चरोर्याज्या । सूत्रितं च प्र वाता वान्ति पतयन्ति विद्युत इत्यग्न्याधेयप्रभृतीति ( Āśval. ii, 15 )

प्र वान्ति वाता वृष्ट्यर्थं पतयन्ति गच्छन्ति समन्तात्संचरन्ति विद्युतः ओषधीः ओषधयः उत् जिहते उद्गच्छन्ति प्रवर्धन्ते स्वरन्तरिक्षं पिन्वते क्षरति । इरा भूमिर्विश्वस्मै सर्वस्मै भुवनाय सर्वजगद्धिताय जायते समर्था भवति । कदेवमिति । यत् यदा पर्जन्यो देवः पृथिवीं रेतसा उदकेन अवति रक्षति अभिगच्छति वा तदैवं भवति ॥

*Notes* :

[ 1. ओषधीः. See Whitney, paras, 338 a, 340 k, and 365 b. ][1]

2. इरा. Occurs nowhere else. In v, 63, 6 we have इरावतीं standing in a similar context ( वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम् ), where Sāyaṇa explains it by अन्नवतीं अन्नसाधिकां. On v, 69, 2 his note on इरावतीः ( sc. धेनवः ) is इरा क्षीरलक्षणा तद्वत्यः. On vii, 40, 5, he explains इरावत् ( sc. वर्तिः ) by हविर्लक्षणान्नयुक्तं, and on vii, 67, 10, where the same phrase occurs, हविर्युक्तं. The word is another form of इळा ( इडा ).

3. Note that the preceding triplet ( Tṛca ) of vss. 2, 3 and 4 contains a burden beginning with यत्पर्जन्यः ].

Verse 5

*Padapāṭha* :

यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफऽवत् जर्भुरीति । यस्य व्रते ओषधीः विश्वऽरूपाः सः नः पर्जन्य महि शर्म यच्छ ॥ ५

---

[1] See *supra* foot-note on इच्छन्तीः ( p. 77. ).

यस्य पर्जन्यस्य व्रते कर्मणि पृथिवी नंनमीति अत्यर्थं नमति सर्वेषामधो भवति। यस्य शफवत् पादोपेतं गवादिकं जर्भुरीति भ्रियते पूर्यते गच्छतीति वा यस्य व्रते कर्मणि ओषधीरोषध्यो विश्वरूपा नानारूपा भवन्ति हे पर्जन्य स महांस्त्वं नोऽस्मभ्यं महि शर्म महत्सुखं यच्छ प्रयच्छ ॥

*Notes* :

1. नंनमीति[1] and जर्भुरीति[2] are intensives inserting ई between the stem and ending. See Whitney para.1004. The root भुरति[3] भुरते is not in the Dhātupāṭha. Sāyaṇa explains it in more than one way. On i, 119, 4 युवं भुज्युं भुरमाणं विभिर्गतम्, he paraphrases भुरमाणम् by भ्रियमाणम् and further on in the note, identifies the root with भृ taking the change of vowel to be a Vedic peculiarity ( डुभृञ् धारणपोषणयोः । कर्मणि लटः शानच् । व्यत्ययेन शः । बहुलं छन्दसीत्युत्वम् ). On v, 6, 7 ये ( sc. अर्चयः) पत्वभिः शफानां व्रजा भुरन्त he renders भुरन्त by इच्छन्ति, adding आयता ज्वाला होमाय काङ्क्षन्त इत्यर्थः. The only other form of the simple verb which occurs is भुरन्तु in x, 76, 6, भुरन्तु नो यशसः सोत्वन्धसो ग्रावाणः, where Sāyaṇa's note is यशसो यशस्विनो ग्रावाणो नोस्मभ्यं सोतु सुतमन्धसः सोमस्य रसं भुरन्तु भरन्तु संपादयन्तु । उकारश्छान्दसः. On ii, 2, 5, हिरिशिप्रो वृधसानासु जर्भुरत् । Sāyaṇa has a note which shows to what straits this obscure word could drive him : हिरिशिप्रो हरणशीलहनुर्दीप्तोष्णीषो वा शिप्राः शीर्षसु वितता हिरण्ययीरित्यादिमन्त्रान्तरात् ( ṚV. v, 54, 11 ) । वृधसानासु प्रवर्धमानास्वोषधीषु ज्वालासु वा जर्भुरत् पूयमाणो यज्ञं गन्ता । शत्रन्तं पदम् । यद्वा द्वितीयार्थे सप्तमी । वर्धमाना ओषधीर्जर्भुरत्पुनः पुनर्दहन्नित्यर्थः. On x, 92, 1 शोचञ्छुष्कासु हरिणीषु जर्भुरत् we have the note जर्भुरद्भक्षयन् कुटिलं गच्छन्वा.

जर्भुराण occurs thrice. On i, 163, 11, तव शृङ्गाणि विष्ठिता पुरुत्रारण्येषु जर्भुराणा चरन्ति, it is explained by मनोहराणि पूर्यमाणानि वा. On ii, 10, 5, तन्वा जर्भुराणः ( sc. अग्निः ) by पूर्यमाणः. And on ii, 39, 3 शफाविव जर्भुराणा तरोभिः ( sc. अश्विनौ ) the note is शफाविव अश्वादेः खुराविव । तरोभिः वेगैः । जर्भुराणा भृशं गच्छन्तौ.

The epithet भुरणौ ( भुरणा ) is thrice applied to the two Aśvins. On i, 117, 11 Sāyaṇa renders it by भर्तारौ पोषकौ ( भुरण धारणपोषणयोः ). On vii, 67, 8 he has सर्वस्य भर्तारौ. On x, 29, 1, where the Aśvins are not mentioned by name, the note is हे भुरणौ भर्तारावश्विनौ । शीघ्रौ वा । भुरण्युरिति क्षिप्रनामेति.

[1] M's V. G. S., p. 395.

[2] M's V. G. S., p. 402.

[3] M's V. G. S., p. 203.

This brings us to the words भुरण्यति ( i, 50, 6 ; 155, 5 ; iv, 27, 3 ; v, 73, 6 ; viii, 9, 6 ; 59, 1 ; x, 35, 9 ) and भुरण्यु ( i, 68, 1 ; 121, 5 ; vi, 62, 7 ; x, 46, 7 ; 123, 6 ), which are consistently explained by Sāyaṇa in accordance with the Nighaṇṭu, where ( ii, 15 ) भुरण्यु is given among the क्षिप्रनामानि, and भुरण्यति ( ii, 14 ) among the गतिकर्माणः.

Careful examination of the passages in which the words occur will show that the meaning of motion recognized by Sāyaṇa himself in some of his notes, is the only one which will suit the contexts. Curtius has identified the root भरति with the Greek πορφύρω

2. महि. This form of the adjective occurs only in the nominative and accusative singular. The word is frequently used also as an adverb.

Verse 6

*Padapāṭha* :

दिवः नः वृष्टिम् मरुतः ररीध्वम् प्र पिन्वत वृष्णः अश्वस्य धाराः । अर्वाङ् एतेन स्तनयित्नुना आ इहि अपः निऽसिञ्चन् असुरः पिता नः ॥ ६

*Sāyaṇa :*

हे मरुतः यूयं दिवोऽन्तरिक्षसकाशात नोऽस्मदर्थं वृष्टिं ररीध्वं[1] दत्त । वृष्णः वर्षकस्य अश्वस्य व्यापकस्य मेघस्य संबन्धिन्यो धाराः उदकधाराः प्र पिन्वत[2] प्रक्षरत । हे पर्जन्य त्वमेतेन स्तनयित्नुना गर्जता मेघेन सह अर्वाङ् अस्मादभिमुखमा इहि आगच्छ । किं कुर्वन् अपः अम्भांसि निषिञ्चन् स देवः असुर[3] उदकानां निरसितापि सन् नोऽस्माकं पिता पालकश्च ॥

Verse 7

*Padapāṭha* :

अभि क्रन्द स्तनय गर्भम् आ धाः उदन्ऽवता परि दीय रथेन । दृतिम् सु कर्ष विऽसितम् न्यञ्चम् समाः भवन्तु उत्ऽवतः निऽपादाः ॥ ७

---

[1] M's V. G. S., App., I, √ rā, p. 412; Av. rā-rāh-grant, bestow ( Jackson ).   [2] pinvatā—Arnold's Vedic Metre, p. 304.

[3] Ved. Asura = Av. Ahura. For the later change of meaning and the theory of a feud between the two branches of the Aryan race ( Haug ) see Moulton's Early Zoroastrianism ( p. 61 ).

*Sāyaṇa* :

अभि[1] भूम्यभिमुखं क्रन्द शब्दय । तदेव पुनरुच्यते दार्ढ्याय । स्तनय गर्ज । गर्भं गर्भस्थानीयमुदकमोषधीषु आ धाः आधेहि । तदर्थमुदन्वता उदकवता रथेन परि दीय परितो गच्छ । दृतिं दृतिवदुदकधारकं मेघं विषितं विशेषण सितं बद्धं न्यञ्चं न्यक् अधोमुखं सु सुष्ठु कर्ष आकर्ष वृष्ट्यर्थम् । यद्वा । विषितं विमुक्तबन्धनमेवं कर्ष । एवं कृते उद्वतः ऊर्ध्ववन्तं उन्नतप्रदेशा निपादाः न्यग्भूतपादाः निकृष्टपादा वा निम्नोन्नतप्रदेशाः समाः एकस्था भवन्तु । उदकपूर्णा भवन्त्वित्यर्थः ॥

[ *Note* :

'निपादाः. पद् is the Ved. stem for 'foot.' Undoubtedly its strong Acc. Sing. पाद्-अम् was the point of departure for the transition to the *a*-declension. As if the Acc. Sing. were पाद्-म्, the N. Sing. पाद-स् was formed and the N. pl. पादास्. These are the only transition forms which the Ṛk shows, and—what is more important – they occur in the latest part of the whole संहिता'- Lanman, Noun-Inflection in the Veda. ]

Verse 8

*Padapāṭha* :

**महान्तम् कोशम् उत् अच नि सिञ्च स्यन्दन्ताम् कुल्याः विऽसिताः पुरस्तात् । घृतेन द्यावापृथिवीइति वि उन्धि सुऽप्रपानम् भवतु अघ्न्याभ्यः ॥ ८**

*Sāyaṇa* :

हे[2] पर्जन्य त्वं महान्तं प्रवृद्धं कोशं कोशस्थानीयं मेघमुत् अच[3] उद्गच्छ उद्गमय वा । तथा कृत्वा नि षिञ्च नीचैः क्षारय । कुल्या नद्यो विषिता विष्यूताः सत्यः स्यन्दन्तां प्रवहन्तु पुरस्तात् पूर्वाभिमुखम् । प्रायेण नद्यः प्राच्यः स्यन्दन्ते । घृतेन उदकेन द्यावापृथिवी दिवं च पृथिवीं च वि उन्धि[4] क्लेदयात्यधिकम् । अघ्न्याभ्यः गोभ्यः सुप्रपाणं सुष्ठु प्रकर्षेण पातव्यमुदकं भवतु ॥

[ *Note* :

Pronounce vi-undhi ( I. 3 ) and bhavatu-aghni ābhyaḥ ( I. 4 ) ].

Verse 9

*Padapāṭha* :

**यत् पर्जन्य कनिक्रदत् स्तनयन् हंसि दुःऽकृतः । प्रति इदम् विश्वम् मोदते यत् किम् च पृथिव्याम् अधि ॥ ९**

---

[1] 'Verse 7a repeated AV. iv, 15, 6a : [2] ( V 83 ) stanza 8 ( ? 8 a ) AV. iv, 15, 16 ( ? 16a ) ' Arnold's Ved. Metre p. 43.

[3] M's V. G. S., App. I, √ ac p. 369. [4] M's V. G. S., App. I, √ ud, p. 373.

*Sāyaṇa* :

हे पर्जन्य यत् यदा त्वं कनिक्रदत् अत्यर्थं शब्दयन् स्तनयन् दुष्कृतः पापकृतो मेघान् हंसि विदारयसि तदानीमिदं विश्वं जगत् प्रति मोदते । विश्वं विशेष्यते । यत्किंच पृथिव्या[1] मधि भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं विश्वं मोदते हृष्यति । वृष्टेः सर्वजगत्प्रीतिकारणत्वं प्रसिद्धम् ॥

Verse 10

*Padapāṭha* :

**अवर्षीः वर्षम् उत् ऊंइति सु गृभाय अकः धन्वानि अतिऽएतवै ऊंइति । अजीजनः ओषधीः भोजनाय कम् उत प्रऽजाभ्यः अविदः मनीषाम् ॥ १०**

*Sāyaṇa* :

इयमतिवृष्टिविमोचनी । हे पर्जन्य त्वमवर्षीः वृष्टवानसि वर्षमुत् उ[2] षू[3] गृभाय उत्कृष्टं सु सुष्ठु गृभाय[4] गृहाण परिहरेत्यर्थः । धन्वानि निरुदकप्रदेशान् अकः जलवतः कृतवानसि । किमर्थम् । अत्येतवा[5] उ अतिक्रम्य गन्तुम् । ओषधीरजीजनः उदपादयः । किमर्थम् । भोजनाय धनाय भोगाय वा । कमित्ययं शिशिरं जीवनाय कमिति पादपूरणः ( Nir. i. 10 ) । उत अपि च प्रजाभ्यः सकाशात् मनीषां स्तुतिमविदः प्राप्तवानसि ॥

*Notes* :

1. अकर्धन्वान्यत्येतवा उ. Thou hast made the swamps fit to be traversed.' The reference seems to be to such places as, for example, the beds of rivers, which in India in the dry season present great obstacles to the wayfarer. When full of water he is ferried across easily. The translation in the Siebenzig Lieder is not clear to me. 'Du setzest unsre Fluren unter Wasser— Thou layest our fields under water.'[6]

---

1 'probably pṛthviām § 151 iii.' —Arnold's Ved. Met., pp. 304 and 101.

2 M's V. G. S., para, 180 u., pp. 220-21.

3 M's V. G. S., para, 180 *sub voce* ( pp. 249-50 ); ibid. para, 67c ( p. 46. ).

4 M's. V. G. S., para, 569d ( p. 402 ) ; Kāt. Vārt. cited in the S. K. under Pāṇ. iii, 1, 84. M. distinguishes between √ grabh and √ grab.

5 M's V. G. S., para, 167, 1, b4 ( p. 192 ).

6 '10 c extended Triṣṭubh verse.' — Arnold's Ved. Met., p. 403.

2. कमुत प्रजाभ्योविदो मनीषाम्. Muir translates 'And thou hast fulfilled the desires of living creatures.' He adds the following note— 'This last clause is translated according to Professor Roth's explanation *s. v.* मनीषा. Wilson, following Sāyaṇa, renders "verily thou hast obtained laudation from the people," and Dr. Bühler gives the same sense: "thou hast received praise from the creatures". प्रजाभ्य: may of course be either a dative or ablative.' ( Sk. T., V, p. 141, note. )

Roth refers to vi, 47, 3, अयं मनीषामुशतीमजीगः as another passage in which मनीषा has the meaning he attributes to it here. ( Sāyaṇa, अयमेव सोम उशतीं कान्तां मनीषां बुद्धिमुदजीगः उद्गारयति प्रकाशयति ). Grassmann and Delbrück follow Roth.

---

## No. 13

*Maṇḍala* VI *Sūkta* 53

*Sāyaṇa* :

वयमुत्वेति दशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं पौष्णम् । यां पूषन्नित्यनुष्टुप् । शिष्टा गायत्र्यः । तथा चानुक्रान्तम् । वयं दश पौष्णं तद्गायत्रं वै यां पूषन्ननुष्टुबिति । अर्थार्थिभिः प्रवसद्भिरेतज्जप्यम् । सूत्रितं च वयमु त्वा पथस्पत इत्यर्थचर्यां चरिष्य-न्निति ( Āśv. Gṛh. Sū. iii, 7, 8 ) । जपेदिति शेषः ॥

*Note* :

For this and the following hymns to Pūṣan compare Muir's chapter on that god, Sanskrit Texts v, 171—180.[1]

Verse 1

*Padapāṭha* :

**वयम् ऊंइतिं त्वा पथः पते रथंम् न वाजंऽसातये । धिये पूषन् अयुज्महि ॥ १**

*Sāyaṇa* :

हे पथस्पते मार्गस्य पालयितः पूषन् धिये कर्मार्थं वाजसातये अन्नस्य लाभाय च वयं रथं न युद्धे रथमिव त्वा त्वामयुज्महि युञ्ज्महि अस्मदभिमुखं कुर्मः । उ इति पूरकः ॥

---

[1] **Pūsan.** Muir's S. T., Vol., V, sec. xii; M's Ved. Myth., § 16 ( pp. 36–37. ); Bergaigne quoted in Ragozin's Vedic India, pp. 235–236.

*Notes* :

पथस्पते. 'A word qualifying a vocative— usually an adjective but not seldom also a noun in the genitive ( very rarely in any other case )— constitutes, so far as accent is concerned, a unity with it : thus *sakhe vaso* or *vaso sakhe*, 'excellent friend' ; *sūno sahasaḥ* or *sahasaḥ sūno*, 'oh son of might' ; and *sudītī sūno sahaso didīhi* ( ṚV. ), " with excellent brightness, son of might, shine forth'. Whitney ( Ist ed. ), para, 314. In the first two examples the vocative stands at the beginning of a pāda and is therefore accented, the accent being laid on the first syllable of whichever of the two words comes first. In the third example the vocative stands in the middle of a pāda, and both it and the word dependent on it lose their accents, as in our verse, the two words पथस्पते do.[1]

Verse 2

*Padapāṭha* :

अभि नः नर्यम् वसु वीरम् प्रयतऽदक्षिणम् । वामम् गृह-ऽपतिम् नय ॥ २

*Sāyaṇa* :

हे पूषन् नर्यं नृभ्यो हितं वसु धनमभि प्राप्तुं वीरं दारिद्र्यस्य विशेषेण ईरयितारं गमयितारं प्रयतदक्षिणं पूर्वमन्येभ्योऽपि दत्तधनम् । यद्वा प्रयतं शुद्धं दक्षिणं धनं यस्य तादृशम् । वामं वननीयम् । एवंविधं गृहपतिं गृहस्थं नोऽस्मान्नय प्रापय ॥

*Note* :

नर्य[2] वसु. 'Wealth such as becomes a man.' Compare नृवत् in verse 9. Grassmann apparently construes 'Bring riches and a liberal patron to us'. So also Muir : 'Bring to us wealth,' &c. But the singers ask Pūṣan's guidance for themselves. Compare i, 42, 8 ( Roth ) अभि सूयवसं नय, where Sāyaṇa's note is हे पूषन् सुयवसं शोभनतृणोपलक्षितं सर्वौषधियुक्तं देशमभि नय अस्मानाभितः प्रापय.

Verse 3

*Padapāṭha* :

अदित्सन्तं चित् आघृणे पूषन् दानाय चोदय । पणेः चित् वि म्रद मनः ॥ ३

---

[1] M's V. G. S., App. III, para 18. [2] AV. Nairya-manly, human.

*Sāyaṇa* :

हे आघृणे आगतदीप्ते पूषन् अदित्सन्तं चित् दातुमनिच्छन्तमपि पुरुषं दानाय अस्मद्दानार्थं चोदय प्रेरय । पणेः[1] चित् वणिजोपि वार्धुषिकस्य लुब्धस्यापि मनः हृदयं वि म्रदा दानार्थं मृदूकुरु ॥

*Notes* :

1. आघृणे. 'Glowing.' The word only occurs as an epithet of Pūṣan.

2. म्रदा ( म्रद in the Pada text ). The root म्रद्=मृद् is given in the Dhātupāṭha, but has been found only here and in a passage cited by Roth from the Śatapathabrāhmaṇa.

## Verse 4

*Padapāṭha* :

**वि पथः वाजंऽसातये चिनुहि वि मृधंः जहि । साधंन्ताम् उग्र नः धियंः ॥ ४**

*Sāyaṇa* :

हे उग्र उद्गूर्णबल पूषन् पथः मार्गान् वाजसातये अन्नलाभाय वि चिनुहि शोधितान्कुरु । यैः पथिभिर्गता धनं लभेमहि तादृशान्पथः पृथक्कुर्वित्यर्थः । मृधः बाधकांस्तस्करादींश्च वि जहि बाधस्व । नोऽस्माकं धियः कर्माणि अन्नलाभार्थं क्रियमाणानि साधन्तां सिध्यन्तु सफलानि भवन्तु ॥

*Note* :

वि पथः चिनुहि.[3] Roth compares वि नः पथः सुविताय चियन्तु i, 90, 4 (Sāyaṇa नोऽस्माकं पथो मार्गान् वि चियन्तु वि चिन्वन्तु । अशोभनेभ्यो मार्गेभ्यः सकाशात्पृथक्कुर्वन्तु । ) and वि नः ... पथश्चितन यष्टवे iv, 37, 7 ( Sāyaṇa, वि चितन विचेतयत प्रज्ञापयतेत्यर्थः ). He makes the word mean 'clear away,' make roads for us by putting aside everything lying in our way.'

[ For चिनुहि see Whitney, para. 704 ].[4]

---

[1] M's Ved. Myth. ( p. 157 ) ; M. and K's Ved. Ind. Vol. I *sub voce* ( pp. 471–73 ).

[2] M's V. G. S., App. I *sub voce* ( p. 408 ).

[3] ' 4b, cinuhī '—Arnold's Ved. Met., p. 307.

[4] M's V. G. S., p. 125 note 9 ; App. I, p. 381.

Verse 5

*Padapāṭha* :

परिं तृन्धि पणीनाम् आरया हृदया कवे । अर्थ ईम् अस्म-
भ्यम् रन्धय ॥ ५

*Sāyaṇa* :

हे कवे प्राज्ञ पूषन् पणीनां वणिजां लुब्धानां हृदया हृदयानि कठिनानि आरया सूक्ष्मलोहाग्रो दण्डः प्रतोद इत्यारेति चाख्यायते । तया परि तृन्धि परिविध्य हृद्गतं काठिन्यमपनयेत्यर्थः । अथ अनन्तरम् ईमेनान् पणीनस्मभ्यं[1] रन्धय वशीकुरु ॥

*Notes* :

1. आरया. The word occurs only in this hymn. Elsewhere Pūṣan's weapon is called अष्ट्रा[2] So in verse 9 of this hymn.

[ 2. Note this following Tṛca ( vss. 5, 6, 7 ) has the burden अथमस्मभ्यं रन्धय ].

Verse 6

*Padapāṭha* :

वि पूषन् आरया तुद पणेः इच्छ हृदि प्रियम् । अर्थ ईम्
अस्मभ्यम् रन्धय ॥ ६

*Sāyaṇa* :

हे पूषन् आरया प्रतोदेन पणेर्वणिजो हृदयं वि तुद विविध्य । तस्य पणेर्हृदि हृदये प्रियमस्मभ्यमनुकूलं धनमिच्छ[3] दातव्यमितीच्छां जनय । अथ अनन्तरमस्मभ्यमीमेनान् रन्धय वशीकुरु ॥

Verse 7

*Padapāṭha* :

आ रिख किकिरा कृणु पणीनाम् हृदया कवे । अर्थ ईम्
अस्मभ्यम् रन्धय ॥ ७

*Sāyaṇa* :

हे कवे प्राज्ञ पूषन् पणीनां वणिजां हृदया हृदयानि आ रिख आलिख । आलिख्य च किकिरा कीर्णानि प्रशिथिलानि कृणु कुरु मृदूनि कुर्वित्यर्थः । अन्यद्गतम् ॥

---

1 ' 5c, 6c, 7c, asmābhya '—Arnold's Ved. Met., p. 307.

2 Av. aštrā ( from √ az-to drive ) goad, whip. ( Jackson ).

3 ' 6b icchā ' —Arnold's V. M. p. 307.

*Notes* :

1. रिख. This word, which occurs only here, is merely another form of the common root लिख्. Compare अङ्गुलिः and अङ्गुरिः, रुच् and Latin luc-eo, &c.

2. किकिरा. This word occurs only here and in verse 8. Roth holds that it is onomatopoetic, and compares कक्जाकृत AV. xi, 10, 25.

Verse 8

*Padapāṭha* :

याम् पूषन् ब्रह्मऽचोदनीम् आराम् बिभर्षि आघृणे । तया समस्य हृदयम् आ रिख किकिरा कृणु ॥ ८

*Sāyaṇa* :

हे आघृणे आगतदीप्ते पूषन् ब्रह्मचोदनीं ब्रह्मणः अन्नस्य प्रेरयित्रीं यामारां बिभर्षि हस्ते धारयसि तया समस्य सर्वस्य लुब्धजनस्य हृदयमा रिख[1] आलिख किकिरा किकिराणि कीर्णानि प्रशिथिलानि च कृणु कुरु ॥[2]

*Notes* :

1. ब्रह्मचोदनीम्. This word does not occur again in the Ṛgveda. Roth notes that ब्रह्मचोदन, VS. iv, 33, is by Mahīdhara explained as meaning urging on the Brahmans. Our word he takes to mean urging on Brahman ( masc. or neut. ).

2. The pronoun सम is an enclitic ( Whitney, para. 513 c ).[3]

Verse 9

*Padapāṭha* :

या ते अष्ट्रा गोऽओपशा आघृणे पशुऽसाधनी । तस्याः ते सुम्नम् ईमहे ॥९

*Sāyaṇa* :

हे आघृणे आगतदीप्ते पूषन् ते त्वदीया या अष्ट्रा आरा गोओपशा । उपशेरत इत्योपशाः । गावः ओपशा यस्यास्तादृशी । अत एव पशुसाधनी पशूनां साधयित्री भवति ते त्वदीयायाः तस्याः संबन्धि सुम्नं सुखमीमहे याचामहे ॥

---

[1] ' 7a rikhā '—Arnold's Vedic Metre, p. 307.

[2] ' 8d extra verse '—Arnold's. Vedic Metre, p. 307.

[3] M's V. G. S., App. III, para 8 Aa.

*Notes :*

गोओपशा. This word occurs only here. ओपश itself occurs four times. On i, 173, 6, भर्ति स्वधावाँ ओपशामिव द्याम्, Sāyaṇa's note is ओपशामिव। ईषदुपशेत इत्योपशं शृङ्गम्। तद्वृषभ इव। यद्वा परस्परं समीपे वर्तमानं क्षित्यन्तरिक्षाख्यं लोकद्वयमोपशम्। तदिव द्यां बिभर्ति। लोकत्रयमपि बिभर्तीत्यर्थः. Note that the parallel to ओपशामिव in this verse is वृजनं न. On viii, 14, 5, यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि, Sāyaṇa has किं कुर्वन्। दिवि अन्तरिक्षे मेघमोपशमुपेत्य शयानं चक्राणः कुर्वन्। यद्वा आत्मनि समवेतो वीर्यविशेष ओपशः। तमन्तरिक्षे कुर्वन्. On ix, 71, 1, हरिरोपशं कृणुते नभः, the note is हरिर्हरितवर्णः सोमः ओपशम्। आ समन्तादुपशेत इत्योपशः। सर्वस्य धारकं नभो नभस आदित्यस्य स्वभूतमुदकं कृणुते सर्वत्र करोति. On x, 85, 8, कुरीरं छन्द ओपशः, the note is कुरीरं छन्दः कुरीरनामकं छन्दः अनसः ओपशोभवत्। येनोपशेरते स ओपशः.

It is clear that the word was obscure to Sāyaṇa. Roth who takes it to mean an ornament of some kind for the head, suggests that it is perhaps a contraction for अवपश, formed from पश् 'to bind' with अव. गोओपशा as an epithet of the goad would appear to mean 'furnished with a leather tuft or ornament,' or, as Muir translates, 'furnished with leathern thongs.' For the meaning of गो in the compound compare Max Müller's note, Vedic Hymns, part i, p. 232 : 'Yet the suggestion of Professor Roth that एताः, deer, stands here (i, 166, 10 ) for the skins of fallow deer is certainly more poetical, and quite in accordance with the Vedic idiom, which uses, for instance, गो, cow, not only in the sense of milk [ गोपीथाय our No. 1, verse 1 ],—that is done even in more homely English,—but also for leather and thong.'

Varse 10

*Padapāṭha :*

उत नः गोऽसनिंम् धियंम् अश्वऽसाम् वाजऽसाम् उत ।
नृऽवत् कृणुहि वीतयें ॥ १०

*Sāyaṇa :*

उत अपि च हे पूषन् गोषणिं[1] गवां सनित्रीमश्वसामश्वानां सनित्रीं वाजसां वाजानामन्नानां सनित्रीमुत अपि च नृवत् नृवतीं नृणां वनित्रीं दात्रीमेवंभूतां धियं बुद्धिं कर्म वा नोऽस्माकं वीतये खादनायोपभोगार्थं कृणुहि कुरु ॥

[ *Note :*

नृवत्. 'Richly, abundantly' ( Gr. and Muir ); 'after the manner of men' ( Lud. ). ]

---

[1] M's V. G. S., para 77. 5 ( p. 52 ).

## No. 14

*Maṇḍala* VI — *Sūkta* 54

*Sāyaṇa* :

सं पूषन्निति दशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं पौष्णं गायत्रम् । सं पूषन्नित्यनुक्रान्तम् । नष्टधनमन्विच्छता पुरुषेणैतज्जप्यम् । सूत्रितं च । सं पूषन्विदुषेति नष्टमधिजिगमिषन्मूळ्हो वेति ( Āśv. Gṛhya Sūtra iii, 7, 9 ) ॥

### Verse 1

*Padapāṭha* :

सं पूषन् विदुषा नय यः अञ्जसा अनुऽशासति । यः एव इदम् इति ब्रवत् ॥ १

*Sāyaṇa* :

हे पूषन् पोषक देव विदुषा जानता तेन जनेन सं नय अस्मान्संगमय । यो विद्वान् अञ्जसा ऋजुमार्गेण अनुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपादिशति । यश्चैव एवमिदं नष्टं भवदीयं धनमिति ब्रवत् ब्रवीति नष्टं धनं दर्शयतीत्यर्थः । तेन विदुषेत्यन्वयः ॥

### Verse 2

*Padapāṭha* :

सम् ऊं इति पूष्णा गमेमहि यः गृहान् अभिऽशासति इमे एव इति च ब्रवत् ॥ २

*Sāyaṇa* :

पूष्णा अनुगृहीता वयं सं गमेमहि तेन जनेन संगच्छेमहि यो जनो गृहान् येषु गृहेष्वस्मदीया नष्टाः पशवस्तिष्ठन्ति तान् गृहानभि शासति अभिशास्ति आभिमुख्येन बोधयति यश्चेमे त्वदीया नष्टाः पशव एवं तिष्ठन्तीति च ब्रवत् ब्रूयात् ॥

[ *Note* :

पूष्णा. Construe with सं गमेमहि. ]

### Verse 3

*Padapāṭha* :

पूष्णः चक्रम् न रिष्यति न कोशः अव पद्यते नो इति अस्य व्यथते पविः ॥ ३

*Sāyaṇa :*

पूष्णः पोषकस्य देवस्य चक्रमायुधं न रिष्यति न विनश्यति । अस्य चक्रस्य कोशश्च न अत्र पद्यते न हीयते । अस्य पविः धारा च नो[1] नैव व्यथते कुण्टीभवति । तेन चक्रेण चोरान्हत्वास्मदीयं धनं प्रकाशयेति भावः ॥

*Notes :*

1. चक्रम्. The three things referred to in the verse are evidently parts of the chariot of the god, and चक्रम् must therefore be taken in the sense of wheel.

2. कोशः. Roth cites four passages besides this in which this word is to be taken as meaning the box of a carriage. i, 87, 2, श्चोतन्ति कोशा उप वो रथेष्वा— Sāyaṇa, कोशाः मेघनामैतत् । वो युष्माकं रथेष्वासक्ता मेघाः श्चोतन्ति जलं मुञ्चन्ति. viii, 20, 8, रथे कोशे हिरण्यये— Sāyaṇa, रथे कोशे कोशवद्वेष्टिते मध्यदेशे. viii, 22, 9, रथे कोशे हिरण्यये— Sāyaṇa, कोश आयुधादीनां कोशस्थाने रमणशीले रथे. x, 85, 7, द्यौर्भूमिः कोश आसीत्— Sāyaṇa, कोशस्थानीये अभूताम्.

Verse 4

*Padapāṭha :*

यः अस्मै हविषा अविधत् न तम् पूषा अपि मृष्यते । प्रथमः विन्दते वसु ॥ ४

*Sāyaṇa :*

यो यजमानः अस्मै पूष्णे हविषा चरुपुरोडाशादिना अविधत् परिचरति तं यजमानं पूषा न अपि मृष्यते । अपिशब्द ईषदर्थे । ईषदपि न हिनस्ति । स च प्रथमो मुख्यः सन् वसु धनं विन्दते लभते ॥

*Note :*

न मृष्यते. 'Does not forget.' Compare (Roth) vii, 18, 21, न ते भोजस्य सख्यं मृषन्त, where Sāyaṇa renders the verb by विस्मरन्ति.

Verse 5

*Padapāṭha :*

पूषा गाः अनु एतु नः पूषा रक्षतु अर्वतः । पूषा वाजम् सनोतु नः ॥ ५

---

[1] 'na' Arnold's Ved, Met., p. 307.

*Sāyaṇa :*

पूषा पोषको देवः नोऽस्मदीया गाः अन्वेतु रक्षणार्थमनुगच्छतु । स च पूषा अर्वतः अश्वान्रक्षतु चोरेभ्यः । तथा वाजमन्नं च नोऽस्मभ्यं पूषा सनोतु[1] प्रयच्छतु ॥

Verse 6

*Padapāṭha :*

पूषन् अनु प्र गाः इहि यजमानस्य सुन्वतः । अस्माकम् स्तुवताम् उत ॥ ६

*Sāyaṇa :*

हे पूषन् सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य गाः पशून् अनु प्र इहि रक्षणार्थमनुगच्छ । उत अपि च स्तुवतां त्वद्विषयं स्तोत्रं कुर्वतामस्माकं गाश्चानुगच्छ ॥

Verse 7

*Padapāṭha :*

माकिः नेशत् माकीम् रिषत् माकीम् सम् शारि केवटे । अथ अरिष्टाभिः आ गहि ॥ ७

*Sāyaṇa :*

हे पूषन् अस्मदीयं गोधनं माकिः नेशत मा नश्यतु । माकिर्माकीमित्येतौ प्रतिषेधमात्रे वर्तेते । माकीं रिषत् मा व्याघ्रादिभिर्हिंस्यताम् । माकीं मा च केवटे कूपे सं शारि संशीर्णं भूत् कूपपातेनापि हिंसितं मा भवतु । अथ एवं सति अरिष्टाभिरहिंसिताभिर्गोभिः सह आ गहि सायंकाले आगच्छ ॥

*Notes :*

1. माकिः and माकीम्[2] are only used in prohibitive sentences, and with the subjunctive. For the form, compare नकिः &c.

[ 2. नेशत. Perf. Subj. ][3]

Verse 8

*Padapāṭha :*

शृण्वन्तम् पूषणम् वयम् इर्यम् अनष्टऽवेदसम् । ईशानम् रायः ईमहे ॥ ८

---

[1] M's V. G. S., App. 1, √ san ( p. 426 ).

[2] M's V. G. S., p. 240. [3] M's V. G. S., p. 395.

*Sāyaṇa* :

अस्मत्स्तोत्राणि शृण्वन्तम् इर्यं दारिद्र्यस्य प्रेरकमनष्टवेदसमविनष्टधनमीशानं सर्वस्यैश्वरमेवंविधं पूषणं देवं वयं रायः धनानि ईमहे याचामहे ॥

*Notes* :

1. इर्यम्. The word occurs in four other passages. v, 58, 4, राजानमिर्यम् —Sāyaṇa, शत्रूणां प्रेरकम्. vii, 13, 3, an epithet of Agni. Sāyaṇa, स्वामी प्रेरयन्वा. vii, 41, 4, an epithet of Varuṇa. Sāyaṇa, ईश्वरः ( in this and in the last example part of a comparison to a cowherd ). x, 100, 4 इर्येव पुष्ट्यै ( of the Aśvins )— Sāyaṇa, इर्येव इर्याविव । इरा अन्नम् । तत्र भवौ । अन्नवन्ता-वाढ्यौ । स्वजनपरितोषणाय भवतः.

2. अनष्टवेदसम्. 'Who keeps what he has.' The word may have given rise to the idea that the hymn had reference to a search for lost property.

3. रायः. Is better taken as the genitive singular dependent on ईशानम्. [ Cf. ईशानं राधसः in No. 15, v. 2. ]

Verse 9

*Padapāṭha* :

पूर्षन् तर्व व्रते वयम् न रिष्येम कदा चन । स्तोतारः ते इह स्मसि ॥ ९

*Sāyaṇa* :

चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः पूषन् तव व्रत इत्येषानुवाक्या । सूत्रितं च । वाममद्य सवितर्वाममु श्वः पूषन् तव व्रते वयमिति ( Āśval. ii 16 ) । सैषा सूक्ते नवमी ॥

हे पूषन् पोषक तव त्वदीये व्रते कर्मणि वर्तमाना वयं कदाचन कदाचिदपि न रिष्येम हिंसिता न भवेम । तादृशाश्च वयमिह अस्मिन्कर्मणि ते तव स्तोतारः स्मसि स्मः भवामः ॥

[ *Note* :

व्रते तव. 'Under thy protection.' ( M. M. ) ]

Verse 10

*Padapāṭha* :

परिं पूषा परस्तात् हस्तम् दधातु दक्षिणम् । पुनः नः नष्टम् आ अजतु ॥ १०

*Sāyaṇa* :

पूषा पोषको देवः परस्तात् परस्मिन्देशे सुसंचारादन्यस्मिन् चोरव्याघ्रादिभिरूषिते देशे गच्छतो गोधनस्य निवारणाय स्वकीयं दक्षिणं हस्तं परि दधातु परिधानं निवारकं करोतु । नोऽस्मदीयं नष्टं च गोधनं पुनराजतु आगच्छतु । आगमयतु ।

*Notes* :

1. परस्तात्. Pronounce pa-ra-sta-at.[1]

2. अजतु.[2] 'Drive hither.' But Sāyaṇa takes it as equivalent to आगच्छतु. Compare his obviously wrong explanation of अज् 'drive' in i, 23, 14. The meaning 'go' is assigned to the root in the Dhātupāṭha. M. M. reads in commentary आगच्छतु आगमयतु, but the latter word is perhaps a gloss. It is not in the Ulwar MS. [ Cf. Sāyaṇa on उदाजत. No. 6, v, 3. ]

---

## No. 15

*Maṇḍala* VI. *Sūkta* 55

*Sāyaṇa* :

एहि वामिति षड्टचं षष्ठं सूक्तं भरद्वाजस्यार्षं गायत्रं पौष्णम् । अनुक्रम्यते च । एहि वां षडिति । गतो विनियोगः ॥

Verse 1

*Padapāṭha* :

आ इहि वाम् विऽमुचः नपात् आघृणे सम् सचावहै ।
रथीः ऋतस्य नः भव ॥ १

*Sāyaṇa* :

हे विमुचो नपात् । विमुञ्चति सृष्टिकाले स्वसकाशात्सर्वाः प्रजा विसृजतीति विमुक्प्रजापतिः । तस्य पुत्र आघृणे आगतदीप्ते पूषन् । वाम् । वाति गच्छति स्तुतिं प्राप्नोतीति वाः स्तोता । वा गतिगन्धनयोरित्यस्माद्धातो मनिन्निति विच् ( Pāṇ. iii, 2, 74 ) । वां गन्तारं स्तोतारं मामेहि आगच्छ । आवां च सं सचावहै समयाव संगच्छावहै । यद्वा आवामित्यस्याद्याक्षरलोपे वामिति भवति । आवां सचावहै इति संबन्धः । यावत्संगच्छावहै । तादृशस्त्वं नोऽस्माकमृतस्य यज्ञस्य रथी रंहिता नेता भव । तथा सति तत्रत्यं हविस्त्वयापि लभ्यत इत्यर्थः ॥

---

[1] See Arnold's Ved. Met., p. 307; also § 151 i. ( p. 99. ), and § 14 (p.5.)

[2] Av. az-to drive.

*Notes* :

1. वाम्. An accented form वाम् occurs only here. The ordinary pronominal form is an enclitic.[1] Sāyaṇa's explanation of the word [ as गन्तारम् or स्तोतारम् ] is a counsel of despair. Roth[2] suggests that वाम् here stands, as an isolated case, for आवाम् ' we two. ' Delbrück thinks वाम् may be a corruption for माम्, and points out that we have मम in verses 5 here.

2. विमुचो नपात. For the accent see note on No. 13, verse 1. The phrase occurs also in i, 42, 1, where too it is an epithet of Pūṣan. Sāyaṇa there, विमुचो नपात् । जलविमोचकहेतोर्मेघस्य पुत्र । नपादिति पुत्रनाम । नपात्प्रजा इति तन्नामसु पाठात् ( Nighaṇṭu, ii, 2 ). Further on in the same note Sāyaṇa gives विमुचो नपात । उदकं विमुञ्चतीति विमुङ् मेघः क्विप् चेति क्विप् । न पातयति कुलमिति नपात् पुत्रः.

Muir, who translates 'son of the deliverer,' has the following note :— *Vimuco napāt*. Professor Benfey follows Sāyaṇa *in loco* in taking this to mean " offspring of the cloud " ( *jala-vimocakahetor meghasya putra* ). The Indian commentator, however, assigns another sense to the phrase in vi, 55, 1, where it recurs, and where he explains it as " the son of Prajāpati, who at the creation sends forth from himself all creatures " ( *vimuñcati sṛṣṭi-kāle svasakāśāt sarvāḥ prajāḥ visṛjati-iti vimuk Prajāpatiḥ* । *tasya putra* ). In ṚV. viii, 4, 15f. Pūṣan is called *vimocana*, the " deliverer, " which Sāyaṇa interprets " deliverer from sin, " ( *pāpād vimocayitaḥ* ). Perhaps *vimuco napāt* means the same thing. Compare the words *vi te muñcantām vimuco hi santi* AV. viii, 112, 3 ; and *śavaso napāt*, and the other similar phrases quoted above in p. 52. ( Sk. T. V, p. 175 note ).

Roth explains विमुच् in the phrase as the ' unyoking ' at the end of a journey. Pūṣan gives a safe home-coming, and is ' son of return. ' He compares the use of विमोचन in viii, 4, 15. Grassmann adopts Muir's suggestion, and takes the phrase to mean ' son of deliverance, *i. e.*, deliverer. '[3]

For the word नपात see note 1 on No. 4, verse 1.

---

1 M's V. G. S., App. III., 8 Aa ( p. 452 ).

2 Also Sāyaṇa in his last explanation.

3 See M's Ved. Myth., p. 35, last line, and p. 36, II. 1–3.

Verse 2

*Padapāṭha* :

रथिऽतमम् कपर्दिनम् ईशानम् राधसः महः । रायः सखायम् ईमहे ॥ २

*Sāyaṇa* :

रथीतमम् अतिशयेन रथिनम् । यद्वातिशयेन रंहितारं नेतारम् कपर्दिनम् । कपर्दश्चूडा तद्वन्तम् । राध्नोत्यनेनेति राधो धनम् । महो महतो राधसो धनस्येशानं स्वामिनं सखायमस्माकं मित्रमेवंविधं पूषणं रायो धनानीमहे याचामहे ॥

*Note* :

रायः. Gen. sing. dependent upon ईमहे.

Verse 3

*Padapāṭha* :

रायः धारा असि आघृणे वसोः राशिः अजऽअश्व । धीवतःऽधीवतः सखा ॥ ३

*Sāyaṇa* :

हे आघृणे आगतदीप्ते पूषन् रायो धनस्य धारासि प्रवाहो भवसि । स्तोतृभ्यो बहु धनं नैरन्तर्येण प्रयच्छसीत्यर्थः । अजाश्व[1] अजाश्छागा एवाश्वा अश्वकार्यापन्ना यस्य तादृश पूषन् वसोर्वसुनो धनस्य राशिः संघश्च भवसि । धनसंघश्च त्वय्येव निवसतीत्यर्थः । धीवतोधीवतः सर्वस्य स्तोत्रवतः पुरुषस्य सखा मित्रभूतश्च भवसि ॥

*Note* :

धीवतोधीवतः. See Whitney, para, 1260[2].

Verse 4

*Padapāṭha* :

पूषणम् नु अजऽअश्वम् उप स्तोषाम वाजिनम् । स्वसुः यः जारः उच्यते ॥ ४

*Sāyaṇa* :

अजाश्वं छागवाहनं वाजिनमन्नवन्तं बलवन्तं वा पूषणं पोषकं देवं नु अद्योप स्तोषाम उपस्तवाम । यः पूषा स्वसुरुषसो जार उपपतिरित्युच्यते तं पूषणमित्यन्वयः ॥

---

[1] '3b, 4a ajāśua'—Arnold's Ved. Met., p. 307.

[2] M's V. G. S., para 189 C.

*Note* :

स्तोषाम. Aor. Subj[1].

Verse 5

*Padapāṭha* :

मातुः दिधिषुम् अब्रवम् स्वसुः जारः शृणोतु नः । भ्राता इन्द्रस्य सखा मम ॥ ५

*Sāyaṇa* :

मातुर्निर्मात्र्या रात्रेर्दिधिषुं पतिं पूषणमब्रवम् स्तौमि । स्वसुरुषसो जारश्च पूषा नोऽस्माकं स्तोत्राणि शृणोतु । इन्द्रस्य भ्राता सहजातः पूषा मम स्तोतुः सखा मित्र· भूतोऽस्तु ॥

[ *Notes* :

1. मातुर्दिधिषुम्[2] Sūryā chose Aśvins for her husbands and Pūṣan, the son, chose the Aśvins for his fathers—Pischel, Ved. St. i., pp. 20-1. ]

[3] [ The gods had given Pūṣan to Sūryā as a son and he had sought Sūryā's hand on the occasion of her svayaṁvara.

2. स्वसुर्जारः.[4] The only goddess, who in the ṚV. is spoken of as having a jāra, is Uṣas and Pūṣan is a form of Sūrya. See note 2 on vii, 75, 5 ( p. 223. ) ]

Verse 6

*Padapāṭha* :

आ अजासः पूषणम् रथे निऽशृम्भाः ते जनऽश्रियम् । देवम् वहन्तु बिभ्रतः ॥ ६

---

[1] M's V. G. S., para 143, 2. ( p. 162 ).

[2] For the meaning of the word see *sub voce* M and K's Vedic Index, Vol. I, p. 359.

[3] Inserted here from the Supplementary Notes.

[4] See Nir. iii, 16 and comp. the Babylonian Istar, 'both mother and sister of the Sun-god ( Tammuz ).' the Egyptian Osiris, 'brother and husband of Isis.' — ( Sayce's Gifford Lectures on the Religions of Ancient Egypt and Babylonia, Lecture vii, Menzie's History of Religions, pp. 128, 97 ).

*Sāyaṇa* :

अजासोऽजाश्छागा निशृम्भा निश्रथ्य संबध्य हर्तारस्ते पूष्णा वाहनतया प्रसिद्धाश्छागा जनश्रियम् । जनं स्तोतृसंघं श्रयति गच्छतीति जनश्रीः । तं पूषणं देवं रथं बिभ्रतो धारयन्त आ वहन्तु आ नयन्तु ॥

*Notes* :

1. निशृम्भाः The word occurs only here. Yāska, vi, 3, explains it by निश्रथ्य हारिणः, an explanation which Sāyaṇa follows. Roth suggests 'stepping firmly,' deriving the word from श्रम्भ् with नि. Compare विश्रब्ध.

2. जनश्रियम्. This word also occurs nowhere else. Yāska explains it by जातश्रियम्. Roth suggested ( Nirukta, Illustrations, p. 73 ) that the meaning was 'gladdener of men,' but in the P. W. B. he follows Sāyaṇa. Grassmann in his dictionary, 'gladdening men'; in his translation, 'shepherd of men.' Delbrück follows Sāyaṇa.

---

## No. 16

*Maṇḍala* VI *Sūkta* 56

*Sāyaṇa* :

य एनामिति षड्टचं सप्तमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । अन्त्यानुष्टुप् । आदौ पञ्च गायत्र्यः । तथा चानुक्रान्तम् । य एनमन्त्यानुष्टुबिति । गतो विनियोगः ॥

Verse 1

*Padapāṭha* :

**यः एनम् आऽदिदेशति करम्भऽअत् इति पूषणम् । न तेन देवः आऽदिशे ॥ १**

*Sāyaṇa* :

यः स्तोता एनं पूषणं पोषकं करम्भात करम्भाणां घृतमिश्राणां यवसक्तूनामत्तेति आदिदेशति अभिष्टौति । तेन पुरुषेण अन्यो देवः न आदिशे आदेष्टव्यः स्तोतव्यो न भवति । पूष्ण एव सर्वस्याभिमतस्य धनस्य लाभाद्देवतान्तरं न स्तौतीत्यर्थः ।

*Notes* :

1. आदिदेशति.[1] A present form. The meannig is uncertain. Regard must be had to the hymn i, 42, where so many of the expressions in our hymn recur ( compare Aufrecht's remarks in the preface to his second edition ). Verse 2.

यो नः पूषन्नघो वृको दुःशेव आदिदेशति ।
अप स्म तं पथो जहि ॥

Sāyaṇa, आदिदेशति अनेन मार्गेण गन्तव्यमित्येवमाज्ञापयति.

2. करम्भात्. This word occurs only here. But compare iii, 52, 7, पूषण्वते ते चकृमा करम्भम्— Sāyaṇa, हे इन्द्र पूषण्वते । पूषा नाम कश्चिद्देवोऽदन्तकः तद्वते ते तुभ्यं करम्भं दधिमिश्रं सक्तुं चकृम भक्षणार्थे कुर्मः । तथा च श्रुतिः । पूषा प्रपिष्टभागोऽदन्तको हीति. Compare the third verse of the hymn here :

3. न तेन देव आदिशे. The construction is that noted on No. 4, verse 5.

4. Sāyaṇa's interpretation seems forced. Translate perhaps ' He who calls on Pūṣan by his name Karambhāt— not by him is the god called on ( not to him will the god listen ).' The meaning seems to be that Karambhāt is a very inadequate name for the god, not necessarily, as Roth ( Nir. vi, 31 ) and Grassmann take it, that it is applied to him in scorn. In verse 2 the poet goes on to tell how Pūṣan should be worshipped. Muir : ' By him who designates Pūṣan by saying " this is the eater of meal and butter." the god cannot be described." Ludwig follows Sāyaṇa in his translation. In his commentary he explains ' He who thinks on Pūṣan as the Karambha-eater need not think of the god ( or, on a god ),' that is in putting before Pūṣan the food he loves the worshipper has done all that is necessary to secure the god's help.

Verse 2

*Padapāṭha* :

उत घ सः रथिऽतमः सख्या सत्ऽपतिः युजा । इन्द्रः वृत्राणि जिघ्नते ॥ २

[1] M's V. G. S. p 389.

*Sāyaṇa* :

उत घ अपि च स यः शत्रूणां हन्तृत्वेन प्रसिद्धस्तादृशः रथीतमः अतिशयेन रथी महारथः सत्पतिः सतां पालयिता एवंगुण इन्द्रः सख्या मित्रभूतेन पूष्णा युजा सहायभूतेन युक्तः सन्वृत्राणि शत्रून् जिघ्नते[1] हन्ति । इन्द्रस्याप्ययमेव साहाय्यकारीत्यर्थः ॥

*Note* :

In his translation Ludwig follows Sāyaṇa here. In his commentary he claims to be the first to have found out the real meaning of the verse. 'By Indra', he says, 'is certainly not meant the common Indra, but स is the man described in the preceding verse : " he need no more think on a god ; for as a good charioteer, as a true king, as an Indra, he, with Pūṣan for his friend and ally, smites down his foes. ". रथीतमः seems to me to refer to Pūṣan as in No. 15, verse 2. Compare also the next verse here. It conveys the desired supplement to कस्मात. If we refer it to Indra the hymn loses to a great extent the character of a hymn in praise of Pūṣan. 'Nay, is he not the best of charioteers ? With him for a friend and ally, &c.' But compare Delbrück's note given under the next verse.

Verse 3

*Padapaṭha* :

उत अदः परुषे गविं सूरः चक्रम् हिरण्ययंम् । नि ऐरयत् रथिऽतंमः ॥ ३

*Sāyaṇa* :

उत अपि च सूरः प्रेरकः रथीतमः अतिशयेन रथी नेतृतमो वा पूषा परुषे परुष्मति पर्ववति भास्वति वा गवि । गच्छतीति गौरादित्यः । तस्मिन्हिरण्यय हिरणमयं सुवर्णनिर्मितं अदस्तद्रथस्य चक्रं न्यैरयत नितरां प्रेरयति स्म ॥

*Notes* :

1. परुषे गवि. 'In the brindled bull.' What is meant is quite uncertain. Muir translates ' through the speckled cloud, ' following Roth, 'Prof. Roth translates this verse as follows in his illustrations of the Nirukta, p. 19. : Er hat dort durch den krausen Wolkenzug der Sonne goldenes Rad hindurchgelenkt,

---

[1] Av. Verethraghna ( Moulton's E. Z, p. 103; ete. ).

der treffliche Fuhrmann ( Pūṣan ) = He has guided there the golden wheel of the sun through the curled train of clouds, the excellent driver ( Pūṣan ). In his Lexicon he renders the word *paruṣa* by variegated, &c.

Sāyaṇa's interpretation is from Yāska, Nirukta, ii, 6, आदित्योऽपि गौरुच्यते । उताद: परुषे गवि । पर्ववति भास्वतीत्यौपमन्यव:. Delbrück has a note which I translate :—

' The god referred to in verse 3 is again Indra, who here too is called रथीतम:. [ That is, according to Delbrück, as in the preceding verse. ] That Pūṣan was his companion in the exploit mentioned is left to be inferred. The exploit is this : Indra depressed the wheel of the sun. The sun was at the time *paruṣe gavī* " beside the brindled bull, " that is, it may be conjectured, the speckled clouds. Kuhn takes this myth, which is often referred to, to mean that Indra presses the sun's wheel down from the mountain of clouds, slays the demon, and brings the light of heaven back to mortals. ( Herabkunft des Feuers, 65. ) Some of the parallel passages would admit of the explanation that the sun is lost in the clouds of evening. '

2. सूरश्चक्रं. ' The sun's wheel. ' Compare ( Roth ) iv, 16, 12, प्र सूरश्चक्रं वृहतादभीके— Sāyaṇa. सूर: प्रेरकस्य सूर्यस्य चक्रमायुधम् अभीके समीपे सग्रामे वा प्र वृहतात् प्रकर्षेण छिन्नवानसि.

Verse 4

*Padapāṭha :*

**यत् अद्य त्वा पुरुऽस्तुत ब्रवाम दस्र मन्तुऽमः । तत् सु नः मन्म साधय ॥ ४**

*Sāyaṇa :*

हे पुरुष्टुत बहुभिर्यजमानैः स्तुत दस्र दर्शनीय मन्तुमः ज्ञानवन्पूषन् अद्य इदानीं यदुद्दिश्य त्वा त्वां ब्रवाम स्तवाम नोऽस्माकं मन्म मननीयं तद्धनं साधय उत्पादय ॥

*Notes :*

[1][ दस्र. ' Wonder-worker, ' ' helping by wondrous deeds. ' From the same root as सुदंसस्. See note 5 on iii, 61,4.

मन्तुम:[2] A Vedic vocative. See Whitney, para. 454 b.

---

1 Inserted here from the Supplementary Notes.

2 Lanman's N-I. V., p. 520.

Verse 5

*Padapāṭha* :

इमम् च नः गोऽएषणम् सातये सीसधः गणम् । आरात् पूषन् असि श्रुतः ॥ ५

*Sāyaṇa* :

हे पूषन् नः अस्माकं सातये लाभाय इमं च गणं मनुष्यसंघं गवेषणं गवामेषयितारं सीषधः साधय । हे पूषन् आरात् दूरदेशेपि त्वं श्रुतः विश्रुतः प्रख्यातोसि भवसि ॥

Verse 6

*Padapāṭha* :

आ ते स्वस्तिम् ईमहे आरेऽअघाम् उपऽवसुम् । अद्य च सर्वऽतातये श्वः च सर्वऽतातये ॥ ६

*Sāyaṇa* :

हे पूषन् ते त्वदीयां त्वया देयां स्वस्तिं कल्याणीं रक्षां आरेअघाम् आरे दूरे अघं पापं यस्यास्तादृशीम् उपावसुम् उपगतधनाम् ईदृशीं स्वस्तिम् अद्य च अस्मिश्च काले सर्वतातये । सर्वैर्ऋत्विग्भिस्तातय इति सर्वतातिर्यज्ञः । तदर्थम् । यद्वा सर्वेषां भोगानां विस्ताराय । श्वश्च परस्मिन्नपि दिने सर्वतातये सर्वदा सर्वतात्यर्थम् आ ईमहे अभियाचामहे ॥

*Notes* :

1. उपावसुम्[1] Occurs again, ix, 84, 3 and 86, 33. Sāyaṇa, शत्रुभ्यः सकाशात्प्राप्तधनः and उपागच्छद्धनः. In both cases the Pada text has the short vowel, as here.

2. सर्वतातये. The word सर्वताति is explained by Yāska, xi, 24, on Ṛgveda, i, 94, 15, यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता, where he renders सर्वताता ( loc. sing. See Whitney 336f ) by सर्वासु कर्मततिषु. ( But read perhaps सर्वकर्मततिषु. Compare Sāyaṇa's reference to Yāska's interpretation to be given immediately. ) Pāṇini, iv. 4, 142 सर्वदेवात्तातिल् explains ताति in the words सर्वताति and देवताति as a mere suffix, which does not alter the meaning. Sāyaṇa's account of the word on i, 94, 15, the first place in which it occurs, cannot be correctly given in Ed.

---

[1] 'upāvasu is probable § 166, vi a'; "6d, extra vesse" — Arnold's Ved. Met., p. 307"; '—vasu. The preceding vowel is regularly long, often with other contributory causes.' — Arnold's Ved. Met., p. 125.

Sāyaṇa gives two interpretations. First that of Yāska सर्वासु कर्मतातिषु ( ? सर्वकर्मतातिषु ). Then that which, if we may judge from the grammatical note which is given further on, he himself prefers, यद्वा सर्वेषु, that is, he adds, यज्ञेषु. In examining the word grammatically he inverts the order of the two translations, and also shows that, if Yāska be followed, the word must be taken as a bahuvrihi. सर्वताता सर्वदेवात्तातिलिति स्वार्थे तातिल्प्रत्ययः । यास्कपक्षे तु सर्वास्ततयः येषु यागेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वर्णव्यापत्त्यात्वम् । उभयत्रापि सुपां सुलुगिति सप्तम्या डादेशः. For सर्वास्ततयः as I have given above, Max Müller सर्वाः स्तुतयः. In accordance with this Sāyaṇa generally takes सर्वताता as = सर्वत्र.

Our form सर्वतातये occurs in two other passages. On i, 106, 2, त आदित्या आ गता सर्वतातये, Sāyaṇa's note is सर्वतातये सर्वैर्गिरुपुरुषैस्तताय विस्तारिताय युद्धाय. On ix, 96, 4, अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते, he explains सर्वतातये by सर्वैरिन्द्रादिभिर्देवैः स्तूयमानाय यज्ञाय.

सर्वतातिम् occurs thrice. On iii, 54, 11, आदस्मभ्यमा सुव सर्वतातिम्, the note is सर्वतातिं सर्वमपेक्षितं फलम् &c. ( सर्वदेवात्तातिल् स्वार्थिकः । लित्स्वरः ). On. x, 36, 14, सविता नः सुवतु सर्वतातिम्, the note is सर्वमभिलषितं धनादिकम्. On x, 100, 1, आ सर्वतातिमदितिं वृणीमहे, the note is किंच सर्वतातिम् । स्वार्थिकस्तातिल् । सर्वां सर्वात्मिकाम् । यद्वा सर्वे तायन्तेऽस्यामिति सर्वतातिः । छान्दसो दीर्घः । तादृशीमदितिम्.

Roth takes सर्वतातये here to mean 'for all that belongs to us.' It seems more in accordance with the ancient authorities cited and with the passages given above to translate 'for ever.'

---

## No. 17

*Maṇḍala* VI  *Sūkta* 57

*Sāyaṇa* :

इन्द्रा नु पूषणेति षड्चमष्टमं सूक्तं भरद्वाजस्यार्षं गायत्रमैन्द्रापौष्णम् । अनुक्रान्तं च । इन्द्रा न्वैन्द्रं चेति । गतो विनियोगः ॥

Verse 1

*Padapatha* :

इन्द्रा नु पूषणा वयम् सख्याय स्वस्तये । हुवेम वाजऽसातये ॥ १

*Sāyaṇa* :

इतरेतरयोगादिन्द्रपूषञ्छब्दयोरुभयत्र द्विवचनम्[1] । इन्द्रापूषणौ देवौ नु अद्य च वयं स्वस्तये सख्याय शोभनाय सखित्वाय वाजसातये वाजस्यान्नस्य बलस्य वा सातये संभजनाय च हुवेम आह्वयाम स्तवाम वा ॥

Verse 2

*Padapāṭha* :

**सोमम् अन्यः उप असदत् पातवे चम्वोः सुतम् । करम्भम् अन्यः इच्छति ॥ २**

*Sāyaṇa* :

चम्वोः अभिषवणफलकयोः सुतमभिषुतं सोममन्यः[2] अनयोरेकतर इन्द्रः पातवे[3] पातुमुप असदत् उपसीदति उपगच्छति । अन्य एकतरः पूषा करम्भं घृतसिक्तं सक्त्वात्मकं हविर्भक्षयितुमिच्छति ॥

Verse 3

*Padapāṭha* :

**अजाः अन्यस्य वह्नयः हरीइति अन्यस्य संऽभृता । ताभ्याम् वृत्राणि जिघ्नते ॥ ३**

*Sāyaṇa* :

अनयोरिन्द्रापूष्णोः अन्यस्य एकस्य पूष्णः अजाः छागाः वह्नयो वाहकाः[4] अश्वाः । अन्यस्यापरस्य इन्द्रस्य संभृता संभृतौ सम्यक्पुष्टौ हरी एतत्संज्ञावश्वौ वाहकौ । स चेन्द्रस्ताभ्यां वृत्राणि शत्रून् जिघ्नते हन्ति ॥

*Notes* :

1. वह्नयः. In later Sk. वह्नि means fire. It may be like अग्नि from अज्, from वह् probably expressing originally the idea of moving about. Or it may be, according to scholastic interpreters, from Agni being constantly represented as the carrier of the sacrificial oblation. The word 'in the Veda is distinctly applied to the bright fire or light.' ... ... Besides this meaning there are two others, 'first that of a carrier, vehicle, and, it may be, horse; secondly that of minister or priest.' ( See No. 22, v. 5 ). With regard to the latter it may be mentioned

---

[1] M's V. G. S., para. 168 A 1.

[2] Av. anya-another, else, ( Jackson ).

[3] M's V. G. S., para. 167. 1 b 4. ( p. 192 ).

[4] Av. √ vaz-to carry ; Lat. veho.

that 'वह् was used in Sk. in the sense of carrying out ( उद्वह् ), or performing a rite, particularly as applied to the reciting of hymns.' Hence such compounds as उक्थवाहः, स्तोमवाहः and यज्ञवाहः. 'The fact that वह्नि is followed in several passages by उक्थैः would seem to show that the office of the वह्नि was chiefly that of recitation, or of addressing prayers to the gods.'— Max Müller's Vedic Hymns, Part i, pp. 37-43 ][1]

2. संभृता May be taken predicatively to correspond to वह्नयः of the first clause and to mean 'are ready, yoked or harnessed.' ]

Verse 4

*Padapāṭha* :

**यत् इन्द्रः अनयत् रितः महीः अपः वृषन्ऽतमः । तत्र पूषा अभवत् सचा ॥ ४**

*Sāyaṇa* :

यद्यदा वृषन्तमः अतिशयेन वर्षिता इन्द्रः रितो गन्त्रीः महीः महतीः अपः वृष्ट्युदकानि अनयत् इमं लोकं प्रापयति तत्र तदानीं पूषा पोषको देवः सचा अभवत् अस्येन्द्रस्य सहायो भवति ॥

*Notes* :

1. रितः. The word occurs nowhere else in the Ṛgveda, and has not been found elsewhere.

2. सचा[2]. An adverb meaning 'at hand.' In the Nirukta, v, 5, it is explained as equal to सह. सचा सहेत्यर्थः । वसुभिः सचाभुवा ( ṚV. ii, 31, 1 ) वसुभिः सहभवौ. Sāyaṇa on the same, सह भवन्तौ सह वर्तमानौ. In form the word is an instrumental singular from सच्.

Verse 5

*Padapāṭha* :

**ताम् पूष्णः सुऽमतिम् वयम् वृक्षस्य प्र वयाम्ऽइव । इन्द्रस्य च आ रभामहे ॥ ५**

---

[1] Inserted here from the Supplementary Notes.

[2] M's V. G. S., para. 177, 5, ( p. 210 ).

*Sāyaṇa* :

पूष्णः पोषकस्य देवस्येन्द्रस्य च तां प्रसिद्धां सुमतिं कल्याणीं मतिमनुग्रहबुद्धिं वृक्षस्य महीरुहस्य प्र वयां प्रकृष्टां दृढां शाखामिव वयम् आ रभामहे अवलम्बामहे आश्रयामह इत्यर्थः ॥

*Note* :

Take प्र with the following आ रभामहे.

Verse 6

*Padapāṭha* :

**उत् पूषणम् युवामहे अभीशूनूऽइव सारथिः । मह्यै इन्द्रम् स्वस्तये ॥ ६**

*Sāyaṇa* :

पूषणं पोषकं देवमिन्द्रं च मह्यै महत्यै स्वस्तये रक्षार्थम् उद्युवामहे उद्योजयामः । उद्योजनमाकर्षणम् । तत्र दृष्टान्तः सारथिः सूतोऽभीशूनिव अभीशूनश्मीनश्वबन्धनार्थान्यथाकर्षति तद्वत् ॥

*Note* :

अभीशूँरिव. For this sandhi compare note 4 on No. 2 verse 11. Whitney, para. 209 b.[1]

---

## No. 18

*Maṇḍala* VII *Sūkta* 28

*Sāyaṇa* :

ब्रह्मा ण इन्द्रेति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । ब्रह्मा ण इत्यनुक्रान्तम् । महाव्रते निष्केवल्ये पञ्चमत्वेनास्य सूक्तस्य विनियोग उक्तः । अष्टमेऽहनि प्रउगशस्त्रे आद्यस्तृच ऐन्द्रः ( Āśva. viii., 10 ) ।

Verse 1

*Padapāṭha* :

**ब्रह्म नः इन्द्र उप याहि विद्वान् अर्वाञ्चः ते हरयः सन्तु युक्ताः । विश्वे चित् हि त्वा विऽहवन्त मर्ताः अस्माकम् इत् शृणुहि विश्वम्ऽइन्व ॥ १**

---

[1] M's V. G. S., para. 39.

*Sāyaṇa* :

हे इन्द्र त्वं विद्वान् जानन् नोऽस्माकम् ब्रह्म स्तोत्रम् उप याहि । ते तव हरयः अश्वाश्च अर्वाञ्चः अस्मदभिमुखाः युक्ताः सन्तु । हे विश्वमिन्व विश्वप्रीणयितरिन्द्र त्वा त्वां विश्वे सर्वे मर्ता मनुष्याः चिद्धि यद्यपि विहवन्ते पृथक् हवन्ते तथाप्यस्माकमित् अस्माकमेव हवं शृणुहि शृणु ।

*Notes* :

1. ब्रह्मा णः.[1] For the long vowel see note 1 on No. 2, verse 7. For णः see Whitney, para. 194. 'Finally in the Veda a *n* ( usually initial ) is occasionally lingualized even by an altering sound in another word.'

2. उप याहि विद्वान्. 'Listen and come.' Compare the use of शृण्वन्तं in vi, 54, 8, above.

3. अर्वाञ्चस्ते हरयः सन्तु युक्ताः. 'Let thy horses be harnessed to usward.' This is Sāyaṇa's way of construing the passage. Grassmann takes अर्वाञ्चः as the predicate at the clause, and युक्ताः as an adjective. So also in the Siebenzig Lieder. Indra is asked to yoke his horses and come.

[ °यः सन्तु was printed as °यो सन्तु in the previous editions of this Selection and in Max Müller's first edition of the text with commentary and edition of the text only. For such a sandhi see the last portion of Whitney, para 176c. In the second edition, however, of Max Müller's ṚV. with Bhāṣya, the text reads °यः सन्तु, and the Bhau Daji MS. and several others agree. ][2]

4. विश्वे · · · अस्माकम् &c. Compare No. 21, verse 2.

[ 5. विश्वमिन्व. इन्वन्=प्रेरयन् ( Sāyaṇa on v, 30, 7 ). इन्वसि=व्याप्नोषि ( Sāyaṇa on i, 141, 10 ). ]

Verse 2

*Padapāṭha* :

हर्वम् ते इन्द्र महिमा वि आनट् ब्रह्म यत् पासि शवसिन् ऋषीणाम् । आ यत् वज्रम् दधिषे हस्ते उग्र घोरः सन् क्रत्वा जनिष्ठाः अषाळ्हः ॥ २

---

1 M's V. G. S., para. 65c ( p. 43 ).

2 The text has been accordingly corrected in this edition.

*Sāyaṇa* :

हे शवसिन् बलवन्निन्द्र यद्यदा ऋषीणां ब्रह्म स्तोत्रं पासि । रक्षसि । स्तोत्रस्य रक्षणं नाम फलप्रदानम् । तदा ते तव महिमा हवम् । हवः स्तोता । तं वि आनट् व्याप्नोतु । हे उग्र ओजस्विन्निन्द्र यद्यदा हस्ते पाणौ वज्रमा दाधषे धारयसि तदा क्रत्वा शत्रुवधादिना कर्मणा घोरः सन् अषाळ्हः शत्रुभिरनभिभूता जनिष्ठाः अजनिष्ठाः अभवः ॥

*Note* :

हवं ते &c. The meaning is not clear. आनट् is the aorist of अश्.[1] 'Thy greatness, Indra, reached our call.' Ludwig takes the thought to be 'It is not from want of power on thy part if thou dost not come to our call.' Grassmann adopts a suggestion made in the St. Petersburg Dictionary that पासि in the next line is a mistake for यासि. He translates : 'Indra, thy greatness reached our call, since thou dost hasten, &c.' Roth in the Siebenzig Lieder abandons the proposed correction, पासि to यासि, and takes ते with हवम् instead of with महिमा — : 'The cry to thee, O Indra, finds emphasis, because, O strong one, thou dost inspirit the words of the singer.'

## Verse 3

*Padapāṭha* :

**तवं प्रऽनीती इन्द्र जोहुवानान् सम् यत् नॄन् न रोदसी-**
**इति निनेथ । महे क्षत्राय शवसे हि जज्ञे अतूतुजिम् चित्**
**तूतुजिः अशिश्नत् ॥ ३**

*Sāyaṇa* :

हे इन्द्र यद्यस्त्वं तव प्रणीती प्रणीत्या प्रणयनेन जोहुवानान् भृशं स्तुवतो नॄन् रोदसी द्यावापृथिव्यो सं निनेथ संगमयासि । दिवि पृथिव्यां च स्तोतॄन्प्रतिष्ठापयसीत्यर्थः । स त्वं महे महते क्षत्राय धनाय । रयिः क्षत्रमिति धननामसु पाठात । शवसे बलाय च । यजमानेभ्यो महद्धनं बलं च दातुमित्यर्थः । जज्ञे जज्ञिषे । हीति हेत्वर्थे ।

[1] M's V. G. S., para, 148, 1d ( p. 170 ).

यत एवमतः कारणात् अतूतुजिम् अदातारम् अयजमानं तूतुजिः दाता यजमानः अशिश्नत । श्नथतिर्हिंसाकर्मा । तस्माल्लुडर्थे लुङ् । हिनस्ति । चिदित्येवकारार्थे ॥ [1]

*Notes* :

1. It seems clear from Sāyaṇa's paraphrase, दिवि पृथिव्यां च स्तोतॄन्प्रतिष्ठापयसीत्यर्थः, that he either thought the न of the text might be treated as an expletive, or overlooked it. Compare a similar case at x, 160, 4 ( though the manuscripts, or a failure to apprehend his real meaning, may be at fault. )

Roth, followed by Grassmann and Ludwig, holds that it is the battle of the elements that is referred to, and that नृन्न जोहुवानान् furnishes a simile, 'like men who shout defiance to each other' ( Roth ) or 'like men who invoke thy aid' ( Grassmann ).

2. जज्ञे.[2] Roth adopts Sāyaṇa's view that this is equal to जज्ञिषे. Grassmann takes it to be a third person. Ludwig asks if वज्रम्, verse 2, may not be the subject of the clause.

3. अतूतुजि चित्तूतुजिः [3] It seems better to take this of Indra and his foe than as Sāyaṇa here does. The word ( तूतुजिः ) occurs as an epithet of Indra at iv, 32, 2, where Sāyaṇa takes it to mean अस्मदभीष्टप्रदाता. In x, 22, 3 Indra is called महो नृम्णस्य तूतुजिः ( with a different accent ) : according to Sāyaṇa — महतो धनस्य स्तोतृभ्यः प्रेरकः. In x, 35, 6, the word is an epithet of the chariot ( रथ ) of the Aśvins, and Sāyaṇa renders it by क्षिप्रगामिनम्. On vi, 20, 8, स वेतसुं दशमायं दशोणिं तूतुजिं &c.— Sāyaṇa is fain to take the word as a proper name, though it probably is there an adjective qualifying दशोणिं, as दशमायं qualifies वेतसुं. These are all the passages in which the word occurs. In the Nighaṇṭu, ii, 15, it is given as one of the synonyms of क्षिप्र.

4. अशिश्नत्. 'Forms of the reduplicated aorist without union vowel are occasionally met with : namely, from roots ending in consonants सिष्वप् ( 2nd sing. augmentless ) from स्वप् and अशिश्नत from श्नथ् ; from roots in ऋ दीधर् ( 2nd sing. ), and अजीगर् ( 2nd and 3rd sing. )' Whitney, para. 867.[4]

---

1 '3b Virāṭsthānā verse, probably requiring correction.'— Arnold's Ved. Met., p. 309.

2 M's. V. G. S., pp. 383, 385.

3 Pāṇ. vi, 1. 7.

4 M's V. G. S., para 149, 1 ( p. 174 ).

Verse 4

*Padapāṭha* :

एभिः नः इन्द्र अहऽभिः दशस्य दुःऽमित्रासः हि क्षितयः पवन्ते । प्रति यत् चष्टे अनृतम् अनेनाः अव द्विता वरुणः मायी नः सात् ॥ ४

*Sāyaṇa* :

हे इन्द्र दुर्मित्रासो दुष्टमित्रभूता बाधकाः क्षितयः जनाः पवन्ते अभिगच्छन्ति पवतिर्गतिकर्मा । तेभ्यो धनमाच्छिद्य नोऽस्मभ्यम् एभिः सात्त्विकैः अहभिरहोभिर्दशस्य[1] देहि । किं च अनेनाः एनसां निहन्ता मायी[2] प्रज्ञावान् यदनृतं नोऽस्मासु प्रति चष्ट अभिपश्यति तदनृतं हे इन्द्र त्वत्प्रसादात् द्विता द्विधा अव सात् अवस्यतु विमोचयतु । तथा च यास्कः स्यतिरुपसृष्टो विमोचन इति ( Nir. i, 17 ) ।

*Notes* :

1. अहभिः. See Whitney, para. 430 b, 'In the oldest language the middle cases *ahabhis, ahabhyas, ahasu* [ of अहन् ] also occur.'[3]

[ 2. दुर्मित्रासः. 'The N. p. f. [ of stems in आ ] has two forms, the ending-*asas* being also found as N. p. f. some twenty times, more or less.' —Lanman. Cf. याः पार्थिवासः··· ता देवीः ( Sāyaṇa, पृथिवीसंबन्धिन्यः ) v, 46, 7 ; पावकासा देवीः ( Sāyaṇa, शोधयित्र्यः ) i, 142, 6, &c. See Whitney, paras. 363g and 365a. ][4]

3. पवन्ते. The difficulty of the verse lies in this word. Roth ( Supplement of Dictionary and in the Siebenzig Lieder ) takes it to mean 'are being purified,' that is, are suffering expiatory punishment. If that is right, दुर्मित्रासः must mean the wicked. He translates. 'The wicked have now to suffer for their sins ; on such days ( at such a time ) be gracious to us, O Indra.' This, of course, agrees well with what follows. But it seems to do violence to two expressions in the clause itself ( एभिरहभिः and दुर्मित्रासः ), while to a third ( पवन्ते ) it attaches a meaning which cannot be shown to belong to it.

Grassmann follows Sāyaṇa for पवन्ते and translates 'help us in these days, Indra : for the hosts of the foe stream clear

---

1 M's V. G. para. p. 569 d ( p. 402. )

2 '4d, the metre requires māyinah.' — Arnold, Ved. Met., p. 309.

3 Lanman's N-I. V. p. 486.

4 Ibid, p. 361.

toward us.' He points out that the word is often used of the flame blazing up 'as also of the soma streaming brightly out of the vessel in which it is prepared.' पवते, as Sāyaṇa says, is given in the Nighaṇṭu ii, 14, as one of the verbs meaning to go.

[ 4. द्विता. 'All Indian authorities hold fast by Yāska's derivation from द्वि. Mostly द्विता is considered equivalent to द्विधा, and this general sense is variously interpreted by Sāyaṇa to refer to the heaven and earth, gods and men, day and night &c., or to mean नानाविध or पुनः पुनः. In some places such a sense will do, but not in most. The phrase अध द्विता suggests the phrases अध त्मना and उत त्मना. And the द्विता in iii, 43, 6 ( आ त्वा बृहन्तो हरयो युजाना अर्वागिन्द्र सधमादो वहन्तु । प्र ये द्विता दिव ऋञ्जन्ति. . ) corresponds to त्मना in the parallel passage in i, 69, 10 ( or 5 ) ( त्मना वहन्तो दुरो व्यृण्वन् । ); and that in viii, 70, 2 ( इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ) with स्वयम् in the strophe, ix 47, 4 which reads similarly ( स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति ). त्मना ( by oneself ) is variously taken by Sāyaṇa to mean अप्रयत्नेन, अन्यनैरपेक्ष्येण, स्वबुद्ध्या, असहायेन, &c. The explanation असहायेन is most important. And that is also the principal meaning of द्विता. Starting from it the senses might be arranged as follows:— 1. By oneself, all alone ; 2. ( *a* ) in one's own person oneself, not to be sharply distinguished from the next one ( *b* ), ( *b* ) of one's own impulse, by one's own free artifice. 3. Really, actually, plainly, accurately, rightly. In the present passage it means 2 *b*.—' Geldner in Ved. St., iii, 1-10. ]

5. अवसात. See Whitney, para. 830.[1] 'In the Veda these same roots [ a few roots in आ, and the root भू ] are decidedly the most frequent and conspicuous representatives of the Root-aorist : especially the roots गा, दा, धा, पा 'drink,' स्था, भू ; while sporadic forms are made from ज्ञा, प्रा, सा, हा.

Verse 5

*Padapāṭha* :

वोचेम इत् इन्द्रम् मघऽवानम् एनम् महः रायः राधसः यत् ददत् नः । यः अर्चतः ब्रह्मऽकृतिम् अविष्ठः यूयम् पात स्वस्तिऽभिः सदा नः ॥ ५

1 M's V. G. S., p. 447√ 8ff.

*Sāyaṇa :*

यत् य इन्द्रो महो महतो राधसः संराधकस्य रायो धनस्य । द्वितीयार्थे षष्ठी । संराधकं महद्धनं नोऽस्मभ्यं ददत् प्रायच्छत् । यश्चेन्द्रोऽर्चतः स्तुवतो ब्रह्मकृतिं क्रियमाणं ब्रह्म स्तोत्रम् अविष्ठोऽतिशयेन रक्षिता गन्ता भवति तमेनं मघवानं धनवन्तमिन्द्रं वोचेम[1] इत स्तुषेमैव । स्पष्टमन्यत् ॥ ५ ॥

*Note :*

यद्ददत्[2]. 'That he may give.'

---

## No. 19

*Maṇḍala* VII. *Sūkta* 49

*Sāyaṇa :*

समुद्रज्येष्ठा इति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकम्[3] । तथा चानुक्रान्तं समुद्रज्येष्ठा आप्यमिति । गतो विनियोगः ॥

### Verse 1

*Padapāṭha :*

**समुद्रऽज्येष्ठाः सलिलस्य मध्यात् पुनानाः यन्ति अनिऽविशमानाः । इन्द्रः याः वज्री वृषभः ररादं ताः आपः देवीः इह माम् अवन्तु ॥ १**

*Sāyaṇa :*

समुद्रज्येष्ठा समुद्रोऽर्णवो ज्येष्ठः प्रशस्ततमो यासामपां ताः । सलिलस्य । अन्तरिक्षनामैतत् । अन्तरिक्षस्य मध्यात् माध्यमिकात्स्थानात् यन्ति गच्छन्ति । कीदृश्यः । पुनाना विश्वं शोधयन्त्यः अनिविशमानाः सर्वदा गच्छन्त्यः । वज्री वज्रभृत् वृषभो कामानां वर्षितेन्द्रो याः निरुद्धा अपः ररादं लिखति देवीर्देव्यस्ता आप इहास्मिन्प्रदेशे स्थितं मामवन्तु रक्षन्तु अभिगच्छन्तु वा ॥

*Notes :*

1. सलिलस्य. 'The store of water in Heaven, the ocean of heaven which is the source of all moisture.' Roth in Siebenzig Lieder.

2. पुनानाः. 'Pure' rather than 'purifying' as Sāyaṇa takes it. Or the two, which are not easily separable, may

---

[1] M's V. G. S., para. 149, 4 ( p. 174 ).

[2] M's V. G. S., App. I. √ dā ( p. 388 ).

[3] **Āpah** : M's Ved. Myth. ( p. 85 ). Av. ap-āp-water ; Old P. ap-; Phl āp ; New P. āb ( Jackson ).

both be glanced at in the word. Compare a similar difficulty as to पावक, note 2 on No. 11, verse 1 ( p. 158[1] ); and compare use of that word in next verse.

3. अनिविशमानाः. 'Not turning back.' The word occurs only here.

4. रराद.[2] Roth compares x, 89, 7 अरदन्न सिन्धून ( said of Indra : Sāyaṇa, सिन्धून नदीः अरदत् वृष्ट्युदकेनालिखत नेति संप्रत्यर्थे ) and iii, 33, 6 इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ( Sāyaṇa, नदीरस्मानरदत । रदतिः खनतिकर्मा । अखनत । कथमखनत । उच्यते । नदीनां शब्दकारिणीनामपां परिधिं परितो निहितमुदकमन्तः कृत्वा । परितो वर्तमानमित्यर्थः । तादृशं वृत्रम् । वृणोत्याकाशमिति वृत्रो मेघः । तं मेघमपाहन् जघान । तस्मिन्हत आपः पतिताः । ताभिर्गच्छन्तीभिर्वयं खाताः । एवं मेघहननद्वारेणाखनत । ).

Verse 2

*Padapāṭha* :

या: आप॑: दि॒व्या: उ॒त वा॒ स्रव॑न्ति ख॒नित्रि॑मा: उ॒त वा॒ या: स्व॒यं॒ऽजा: । स॒मु॒द्रऽअ॑र्था: या: शुच॑य: पा॒व॒का: ता: आप॑: दे॒वी: इ॒ह माम् अ॒व॒न्तु ॥ २

*Sāyaṇa* :

याः आपः दिव्याः अन्तरिक्षभवाः सन्ति । उत वा अपि च या आपः नद्यादिगताः सत्यः स्रवन्ति गच्छन्ति याश्च खनित्रिमाः खननेन निर्वृत्ताः । उत वा अपि च याः स्वयंजाः स्वयमेव प्रादुर्भवन्त्यः । समुद्रार्थाः समुद्र एवार्थो गन्तव्यो यासां ताः समुद्रार्थाः शुचयो दीप्तियुक्ताः पावकाः शोधयितव्यश्च भवन्ति ता आपो मामवन्त्विति ॥

*Notes* :

स्रवन्ति खनित्रिमाः. 'Water-courses ( कुल्या ), which may or may not have been artificial, are alluded to in iii, 45, 3, and— x, 43, 7 समक्षरन्सोमास इन्द्रं कुल्या इव ह्रदं-- as leading to ponds or lakes ; and waters which are expressly referred to as flowing in channels which had been dug for them are mentioned in vii, 49, 2 [ our passage ] ; and from this it is not unreasonable to infer that the irrigation of lands under cultivation may have been practised.' Muir, Sanskrit Texts, V, p. 465.

2. समुद्रार्थाः. 'Whose goal is the sea'.[3] Compare समानमर्थं चरणीयमाना, No. 8, verse 3.

---

[1] p. 160 in this ed.

[2] M's V. G. S., App. I, √ rad ( p. 411 ).

[3] Max Müller's note on Samudra in Ṛgveda Hymns Pt. I. ( S. B. E. XXXII ), i, 19, 7 ( pp. 57 ff. ).

3. शुचयः पावकाः. 'Pure and clear.' But Sāyaṇa's way of taking it may be right. See note 2 on last verse. Notice again that the metre seems to require the pronunciation पवाकाः. So also in next verse. Compare note 2 on No. 11, verse 1.

### Verse 3

*Padapāṭha* :

यासाम् राजा वरुणः याति मध्ये सत्यानृतेइति अवऽपश्यन् जनानाम् । मधुश्चुतः शुचयः याः पावकाः ताः आपः देवीः इह माम् अवन्तु ॥ ३

*Sāyaṇa* :

वरुणो यासामपां राजा स्वामी मध्ये मध्यमलोके याति गच्छति । किं कुर्वन् । जनानां प्रजानां सत्यानृते सत्यं चानृतं च अवपश्यन् जानन्नित्यर्थः । या आपः मधुश्चुतः रसं क्षरन्त्यः शुचयो दीप्तियुक्ताः पावकाः शोधयित्र्यः ता आपो देव्यो मां रक्षन्त्विति ॥

[ *Notes* :

1. यासां राजा. It would be better to construe यासां with मध्ये than with राजा as Sāyaṇa does. Cf. यासु राजा in the next verse.

2. 'Though Varuṇa is not generally regarded in the ṚV. as the god of the ocean, he is yet in the following passages connected with the element of water,[1] both in the atmosphere and on the earth, in such a way as may have led to the conception of his character and functions which is fully established in the later mythology: — i, 161, 4; vii, 49, 3, 4; vii, 64, 2.' ( Muir. V, p. 72 ). To these may be added i, 25, 10. ]

### Verse 4

*Padapāṭha :*

यासु राजा वरुणः यासु सोमः विश्वे देवाः यासु ऊर्जम् मदन्ति । वैश्वानरः यासु अग्निः प्रऽविष्टः ताः आपः देवीः इह माम् अवन्तु ॥ ४

---

[1] Hopkin's Rel. Ind., pp. 66–68.

*Sāyaṇa :*

अपां राजा वरुणो यास्वप्सु वर्तते । सोमः यास्वप्सु वर्तते । यास्वप्सु स्थिताः विश्वे सर्वे देवा ऊर्जमन्नं मदन्ति । वैश्वानरः अग्निर्यासु प्रविष्टः ता आपो देव्य इह स्थितं मामवन्तु ॥

[ *Note :*

ऊर्जं मदन्ति. It would be better to connect this with वरुणः and सोमः also, than to supply वर्तते. ]

---

## No. 20

*Maṇḍala* VII *Sūkta* 54

*Sāyaṇa :*

वास्तोष्पत इति तृचात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यम् । तथा चानुक्रम्यते । वास्तोष्पते वास्तोष्पत्यमिति । स्मार्ते गृहनिर्माणे वास्तोष्पत इति चतसृभिः प्रत्यृचं जुहुयात् । सूत्रितं च । वास्तोष्पते प्रति जानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वेति ( Āśval. Gṛhya-sūtra, ii, 9 ) ॥

[ *Note :*

'The name of Vāstoṣpati occurs only seven times in the ṚV. and one hymn of three stanzas ( vii, 54 ) is devoted to his praise ...... Though identified with various deities in several passages ( *e. g.*, with Soma in vii, 54, 2 ) there seems no sufficient reason to suppose the name was originally attached to any one particular greater deity as an epithet ( like *Gṛhapati* to Agni ). The Gṛhyasūtras prescribe that Vāstoṣpati is to be propitiated when a new house is to be entered. This, together with the contents of the hymn devoted to his praise ( vii, 54 ), points to his having been simply a tutelary deity of the house, as the name itself 'Lord of the dwelling' implies. He thus seems to be one of the lower order of deities which in primitive beliefs animate, inhabit, or preside over natural objects, such as trees and mountains.' MacDonell's Vedic Mythology, p. 138. ]

Verse 1

*Padapāṭha :*

वास्तोः पते प्रति जानीहि अस्मान् सुऽआवेशः अनमीवः भव नः। यत् त्वा ईमहे प्रति तत् नः जुषस्व शम् नः भव द्विऽपदे शम् चतुःऽपदे ॥ १

*Sāyaṇa :*

हे वास्तोष्पते गृहस्य पालयितर्देव त्वमस्मान् त्वदीयान् स्तोतॄनिति प्रति जानीहि प्रबुध्यस्व । तदनन्तरं नोऽस्माकं स्वावेशः शोभननिवेशः अनमीव अरोगकृच्च भव । किं च वयं त्वा त्वां यद्धनमीमहे याचामहे त्वमपि तद्धन नोऽस्मभ्यं प्रति जुषस्व प्रयच्छ । अपि च नोऽस्माकं द्विपदे पुत्रपौत्रादिजनाय शं सुखकरो भव[1] । चतुष्पदे गवाश्वादिवर्गाय च शं सुखकरो भव ॥

*Notes :*

1. प्रति जानीहि. For the meaning here Roth compares iii, 45, 4 आ नप्तुजं रयिं भरांशं न प्रतिजानते ( 'as his share of the heritage to all that claim it.' But Sāyaṇa, यथा पिता प्रतिजानत व्यवहारज्ञाय पुत्राय स्वकीयस्य धनस्य भागं ददाति तद्वत् ), and Atharvav. xviii, 4, 51, and 52 प्रति त्वा जानन्तु पितरः परेतम्.

2. स्वावेशः ( भव नः ) 'Bless our going in.' In the Siebenzig Lieder the line is translated 'Bless the entrance : make it free from sickness.' Grassmann, 'Give us good entrance.' In the P. W. B. Roth takes the word to mean ( easy of access ) in all the three places in which the word occurs in the Ṛgveda. The passages should be carefully compared. vii, 97, 7 बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः— Sāyaṇa, स एव बृहस्पतिः स्वावेशः सुनिवासः ऋष्वः दर्शनीय : ईदृशो देवः सखिभ्यः स्तोतृभ्यः पुरु बहुलम् आसुतिमन्नं करिष्ठः कर्तृतमः दातृतमः भवति. x, 63, 16

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥

'May she ( sc. Svasti ) protect us at home and abroad : may she, whom the gods guard, bless our going in.' Sāyaṇa, who supplies पृथिवी as the subject, taking स्वस्तिः as an adjective, renders the last line सा पृथिवी नोऽस्माकं अमा । गृहनामैतत् । गृहं रक्षतु तथा सो सा उ ( Pada सो इति ) मेव अरणे गन्तव्ये देशे अरणे अरमणे अरण्यादिके देशे वा नोऽस्मान् नि पातु नितरां रक्षतु । तथा देवगोपा देवा गोपायितारो यस्याः सन्ति सा पृथिवी अस्माकं स्वावेशा शोभननिवासा भवतु.

[1] 'Id. bhavā : extended Triṣṭubh verse' — Arnold's Ved. Met., p. 309.

Yāska ( Nirukta xi, 46 ) explains this verse, but leaves our word unnoticed :

स्वस्तिरेव हि प्रपथे श्रेष्ठा रेक्णस्वती धनवती अभ्येति या वसूनि वननीयानि सा नः अमा गृहे सा निरमणे सा निर्गमने पातु स्वावेशा भवतु देवी गोप्त्री देवान्गोपायत्विति देवा एनां गोपायन्त्विति वा.

The word is everywhere pronounced su-ā-ve-śa.

3. अनमीवो भवा नः. 'Keep sickness far from us.' The नः seems to show that both this and the previous epithet refer to the beneficent activity of the god, not to mere attributes.

4. शम्. The student will find an exhaustive note on this word in Max Müller's Vedic Hymns, pt. i, pp. 190-4. I make the following extract :—

'*Ś*am, which I have here [ i, 165, 4 ] translated by sweet, is a difficult word to render. It is used as a substantive, as an adjective and as an adverb ; and in several instances it must remain doubtful whether it was meant for one or the other. The adverbial character is almost always, if not always, applicable, though in English there is no adverb of such general import as *ś*am, and we must therefore render it differently, although we are able to perceive that in the mind of the poet it might still have been conceived as an adverb, in the sense of 'well.' I shall arrange the principal passages in which *ś*am occurs according to the verbs with which it is construed.

1. With bhū ;

viii, 79, 7. bhava na*ḥ* soma *ś*am hṛde,

Be thou, Soma, well ( pleasant ) to our heart. Cf. viii, 82, 3.

viii. 48, 4. *ś*am na*ḥ* bhava *h*ṛda ā pīta*ḥ* indo ( iti ).

Be thou well ( sweet ) to our heart, when drunk, O Soma ! Cf., x, 9, 4.

i, 90, 9. *ś*am na*ḥ* bhavatu aryamā.

May Aryaman be well ( kind ) to us !

vi, 74, 1. *ś*am na*ḥ* bhūtam dvi-pade *ś*am *c*atu*ḥ*-pade.

May Soma and Rudra be well (kind) to our men and cattle.

Here *ś*am might be rendered as an adverb, or as an adjective, or even as a substantive, in the sense of health or blessing.

Cf. vii, 54, 1 ; ix, 69, 7. The expression dvipad and *C*atu*ḥ*-pad is curiously like what occurs in the prayers of the Eugubian tables, Fisovie San*s*ie, ditu ocre Fisi, tote Jovine, ocrer Fisie, totar Jovinar dupursus peturpursus fato fito ( Umbrische Sprach-denkmäler, ed. Aufrecht, p. 198. )'

## Verse 2

*Padapāṭha* :

वास्तोः पते प्रऽतरणः नः एधि गयऽस्फानः गोभिः अश्वेभिः इन्दोइति । अजरासः ते सख्ये स्याम पिताऽइव पुत्रान् प्रति नः जुषस्व ॥ २

*Sāyaṇa* :

हे वास्तोष्पते गृहस्य पालयितर्देव त्वं नोऽस्माकं प्रतरणः प्रवर्धकः गयस्फानः गयस्य अस्मदीयस्य धनस्य स्फाययिता प्रवर्धकः एधि[1] भव । हे इन्दो सोमवदाह्लादक ते त्वया सह सख्ये सति वयं गोभिः पशुभिः अश्वेभिरश्वैश्च सहिता अजरासः जरारहिताः स्याम भवेम विनाशरहिता इत्यर्थः । पितेव पुत्रान् यथा पिता पुत्रान् रक्षकत्वेन सेवते तथा त्वमपि नोऽस्मान्प्रति जुषस्व सेवस्व ॥

*Notes* :

1. गयस्फानः. Occurs only in two other passages, i, 91, 12, and 19. In both verses as an epithet of Soma, and in conjunction with epithets corresponding to those applied here to Vāstoṣpati. v, 12 गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव. Sāyaṇa, गयस्फानः । गय इति धननाम । धनस्य वर्धयिता अमीवहा अमीवानां रोगाणां हन्ता &c. v, 19. गयस्फानः प्रतरणः Sāyaṇa, गयस्फानः गयस्य गृहस्य धनस्य वा वर्धयिता प्रतरणः प्रकर्षेण दुरितात्तारयिता.

The word गय stands in the Nighaṇṭu among the synonyms of गृह iii, 4, धन ii, 10 and अपत्य ii, 2 ( Roth ). Grassmann attempts to derive it from a root गि corresponding to the later form जि, in the sense of the possessions a man has won for himself. शंगयः ( Sāyaṇa सुखस्य गृहरूप आवासभूतः ) is an epithet of Agni in ii, 1, 6.

2. इन्दो. 'This word is elsewhere a name of the moon. Perhaps the duty of watching the house was at the same time transferred to the moon as the guardian of the night.' Roth in the Siebenzig Lieder.

[ Soma is very often called a drop, '*indu.*' ]

---

1 M's V. G. S., App. I, √ as, ( p. 371 ).

## Verse 3

*Padapāṭha :*

**वास्तोः॑ पते शग्मया॑ सं॒ऽसदा॑ ते सक्षी॒महि॑ र॒ण्वया॑ गा॒तु॒ऽमत्या॑ । पा॒हि क्षेमे॑ उ॒त योगे॑ वर॑म् नः॒ यू॒यम् पा॒त स्व॒स्तिऽभिः॑ सदा॑ नः॒ ॥ ३**

*Sāyaṇa :*

हे वास्तोष्पते देव शग्मया सुखकर्या रण्वया रमणीयया गातुमत्या धनवत्या ते त्वया देयया संसदा स्थानेन सक्षीमहि वयं संगच्छेमहि । त्वमपि क्षेमे प्राप्तस्य रक्षणे उत अपि च योगे अप्राप्तस्य प्रापणे वरं वरणीयं नोऽस्मदीयं धनं पाहि रक्ष । हे वास्तोष्पते यूयं त्वं नोऽस्मान् सर्वदा कल्याणैः पात पाहि ॥

*Notes :*

1. शग्मया. Roth derives शग्म in the sense of 'helpful' from a root शक् ( शग्धि &c. ) which he distinguishes from the common शक् ( शक्नोति ). He quotes vii, 67, 5 ता नः शक्तं शचीपती शचीभिः—Sāyaṇa, शक्तं प्रयच्छतं धनमिति शेषः ; vii, 68, 8 वृकाय चिज्जसमानाय शक्तं ( Sāyaṇa वृकाय धनादात्रे अभिलषत इत्यर्थः । चिदिति पूरणः । अथवा परेभ्यः धनानि प्रयच्छते । यद्वा वृकाय वृकवद्धिंसकाय एतन्नामकाय जसमानाय कर्मभिरुपक्षीयमाणाय ऋषये शक्तम् अभिमतं धनमदत्तम् । शकेर्दानार्थस्य लुङ्येतद्रूपम् । अडभावश्छान्दसः ) ; viii, 3, 11 and 12 ( Sāyaṇa, v. 11 शग्धि देहि, v. 12 शग्धि प्रदेहि or शक्तं कुरु ) : viii, 24, 11 मघवञ्छग्धि तव तन्न ऊतिभिः ( Sāyaṇa हे मघवन् धनवन्निन्द्र तव त्वदीयं तच्छत्रुपुरविदारणलब्धं धनम् ऊतिभिः त्वद्रक्षणैः नोऽस्मभ्यं शग्धि देहि । शग्धीति दानकर्मा । शक्नोतेर्लोटि छान्दसो विकरणस्य लुक् ) ; viii, 50, 5, 13; 69, 3; 80, 4 : x, 40, 5, &c. Roth suggests that the one root may be looked on as the transitive of the other ( compare Sāyaṇa's शक्तं कुरु above ). Grassmann identifies the two roots, getting the meaning of 'to help' out of that of 'being strong for another's good ( with the dative ).' The word शग्म itself occurs ten times in the Ṛgveda. i, 130, 10 पायुभिः पाहि शग्मैः—Sāyaṇa, पायुभिः पालनप्रकारैः शग्मैः सुखैश्चैहिकामुष्मिकरूपैः पाहि पालय. Compare above i, 143, 8, where the same phrase occurs, and is taken by Sāyaṇa somewhat differently : v, 43, 11 शग्मां नो वाचमुशती शृणोतु- Sāyaṇa, शग्मां सुखकरीम्. vi, 44, 2 यः शग्मस्तुविशग्म ते- Sāyaṇa, हे तुविशग्म बहुसुखेन्द्र यः शग्मः सुखकरः &c. vi, 75, 8 तत्रा रथमुप शग्मं सदेम—Sāyaṇa, शग्मं सुखकरम्, vii, 60, 5 शग्मासः पुत्रा अदितेरदब्धाः—Sāyaṇa,

शग्मासः सुखकराः. vii, 97, 6 तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति— Sāyaṇa, शग्मासः शग्माः सुखकराः शक्ता वा. viii, 2, 27 एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम्— Sāyaṇa, शग्मा सुखप्रदौ. ( From Ulwar MS. which has the note given by M. M. in the Varietas Lectionis, p. 21, from his MS. B4. The commentary in Edition is from Sāyaṇa's commentary on the same verse in the Sāmaveda, where he wrote शग्मौ सुखकरौ शक्तौ वा ). x, 31, 5 आ नः शग्मास उप यन्तु वाजाः— Sāyaṇa, शग्ममिति सुखनाम । सुखाः सुखकराः. The word शग्म्य occurs in iii, 31, 1 शग्म्येन मनसा where Sāyaṇa renders it by सुखनिमित्तेन and derives it from शम् and गच्छति ( शग्म्येन शं सुखं गच्छन्ति गमेरौणादिकः कप्रत्ययः । कित्त्वाद्गमहनेत्यादिनोपधालोपः । शग्मे साधुरिति तत्र साधुरिति यत्प्रत्ययः ).

[ 2. संसदा. संसद्=संभजन ( Sāy. on i. 94, 1, अग्नेः संसदि ). ]

3. सक्षीमहि An optative form from सच्.[1]

4. गातुमत्या. Occurs nowhere else. Roth takes it to mean 'roomy,[2] convenient.' Grassmann, 'having a good issue.'

5. क्षेमे उत योगे. Sāyaṇa's explanation of this phrase agrees with the traditional meaning attached to the word योगक्षेम which occurs in x, 166, 5. Roth holds that the use of योगक्षेम in the masc. sing. and plur. precludes this meaning, and he takes the word to be a Tatpuruṣa compound. 'Possession of acquired property, preservation of one's means, wealth, safety, prosperity.' Our phrase he translates 'in work and enjoyment.' Grassmann and Ludwig 'at rest and at work.'

---

## No. 21

*Maṇḍala* VII *Sūkta* 68

*Sāyaṇa* :

आ शुभ्रा यातमिति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षमाश्विनम् । आदितः सप्त विराजः । अष्टमीनवम्यौ त्रिष्टुभौ । अनुक्रम्यते च । आ शुभ्रा नव सप्ताद्या विराज इति । सूक्तविनियोगो लैङ्गिकः ॥

---

[1] M's V. G. S., p. 426. [2] Av. gātu-(1) place, (2) divan (Jackson).

Verse 1

*Padapāṭha* :

आ शुभ्रा यातम् अश्विना सुऽअश्वा गिरः दस्रा जुजुषाणा युवाकोः । हव्यानि च प्रतिऽभृता वीतम् नः ॥ १

*Sāyaṇa* :

हे शुभ्रा दीप्तौ स्वश्वा शोभनाश्वौ हे अश्विना अश्विनौ[1] आ यातमस्मयज्ञमागच्छतम् । दस्रा शत्रूणामुपक्षययितारौ युवां युवाकोः युवां कामयमानस्य मम गिरः स्तुतीः जुजुषाणा सेवमानौ भवतमिति शेषः । न केवलं स्तुतिं किं तु नोऽस्मदीयानि प्रतिभृता संभृतानि हव्यानि हवींषि च वीतं[2] भक्षयतम् ॥

Verse 2

*Padapāṭha* :

प्र वाम् अन्धांसि मद्यानि अस्थुः अरम् गन्तम् हविषः वीतये मे । तिरः अर्यः हवनानि श्रुतम् नः ॥ २

*Sāyaṇa* :

प्र वामन्धांसीत्येषाश्विनशस्त्रयाज्या । सूत्रितं च । प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विनेति ( Āśvalāyana, vi 5 ) ।

हे अश्विनौ वां युवाभ्यां मद्यानि[3] मदजनकानि अन्धांसि सोमलक्षणान्यन्नानि प्रास्थुः प्रास्थिषत गृहीतान्यासन्नित्यर्थः । अतो युवां मे मम हविषो वीतये पानाय अरमत्यर्थं शीघ्रं गन्त[4]मागच्छतम् । अर्यः अरेः अस्माद्विरोधिनः हवनानि तिरः तिरस्कृत्य नोऽस्मदाह्वानमित्यर्थः[5] । तच्छ्रुतं शृणुतम् । श्रुतमित्यस्य वाक्यादित्वादनिघातः[6] ॥

*Note* :

तिरो अर्यो हवनानि श्रुतं नः. Compare विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व vii, 28 ( No. 18 ), 1.

---

[1] Aśvins: Muir's S. T. Vol., V, sec. xv; M's Ved. Myth., pp. 49-54; Bloomfield's Rel. Ved., pp. 110-14; Hopkins' Rel. Ind., pp. 80-86; Nir. xii, 1 & vi, 36; called Nāsatyas = na ša-at-t.-ia in the Boghaz-kōi inscription ( M. and K's Ved., Ind., Vol., I, preface, p. ix ).

[2] M's V. G. S., App. I., √ vi, p. 419.

[3] ' 2a mädia '— Arnold's Ved. Met. ( p. 310 ).

[4] M's V. G. S., p. 379. [5] M's V. G. S., para 148, 5. ( p. 172 ).

[6] M's V. G. S., App. III, 8B, p. 452.

## Verse 3

*Padapāṭha* :

प्र वाम् रथः मनःऽजवाः इयर्ति तिरः रजांसि अश्विना शतऽऊतिः । अस्मभ्यम् सूर्यावसूइति इयानः ॥ ३

*Sāyaṇa* :

हे सूर्यावसू सूर्यायाः सह रथे वसन्तौ अश्विनौ वां युवयोः रथः अस्मभ्यमस्मदर्थमियानः याच्यमानः सन् प्र इयर्ति आगच्छति अस्मद्यज्ञम् । अथवा वां प्रेरयति गमनाय । कीदृशो रथः । मनोजवाः मनोवेगः शतोतिः अपरिमितास्मद्विषयरक्षणः । किं कुर्वन् । रजांसि लोकान् तिरस्तिरस्कृत्य अतिक्रम्य इयर्तीति ॥

*Note*[1] :

सूर्यावसू. ‘Having Sūryā[2] as their possession.’ So Roth. The word occurs only here. [ See note on vi, 55, 5, p. 186. ]

## Verse 4

*Padapāṭha* :

अयम् ह यत् वाम् देवऽयाः ऊंइति अद्रिः ऊर्ध्वः विवक्ति सोमऽसुत् युवऽभ्याम् । आ वल्गूइति विप्रः ववृतीत हव्यैः ॥ ४

*Sāyaṇa* :

यद्यदा वां युवां प्रति देवयाः देवौ युवां कामयमानः । उ इति पूरणः । अयमद्रिरभिषवग्रावा सोमसुत सोममभिषुण्वन् युवभ्याम् । युवाभ्यामर्थाय अभिषुण्वन्निति संबन्धः । एवं कुर्वन् ऊर्ध्वः उन्नतः सन् विवक्ति[3] उच्चैः शब्दयति तदानीं वल्गू सुन्दरौ युवां विप्रः मेधावी यजमानो हव्यैर्हविर्भिः आ ववृतीत आवर्तयति ॥

*Notes* :

1. देवयाः. ‘Holy.’ From देव and या, lit. ‘turning to the gods.’ The word occurs five times in all. i. 168, 1 धियंधियं वो देवया उ दधिध्वे ( said of the Maruts ). Garssmann would take it in the accusative pl. fem. construing with धियंधियं. Sāyaṇa, देवयाः देवान्प्रापयितार एव. i. 177, 4, अयं यज्ञो देवयाः— Sāyaṇa, अयं

---

1 For the cæsura see § 205 iv a-Arnold's Ved. Met., pp. 310, 181.

2 Sūryā = Saulē = Helena = ( Bloomfield's. Rel. Ved., p. 116 ).

3 M's V. G. S., para 212, 4. ( p. 339 ).

यज्ञो देवयाः देवान्गच्छन्भवति. iii, 8, 5 देवया विप्र उदियर्ति वाचम्— Sāyaṇa, देवया देवानां यष्टा देवानां हवींषि प्रापयिता वा. v, 76, 1 उद्विप्राणां देवया वाचो अस्थुः-- Sāyaṇa, देवयाः देवकामाः वाचः स्तोत्राणि. v. 77, 2 प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम्— Sāyaṇa, सायं सायंकाले हविर्देवया देवगामि नास्ति न विधत्त । देवा न स्वीकुर्वन्तीत्यर्थः । अजुष्टम् असेव्यं तद्भवति.

2. युवभ्याम्. A Vedic form. See Whitney, para. 492.[1]

3. ववृतीत. Causal Aor. of वर्तते. [ Altind. Verb, p. 136, ll. 2–5. But see the same further on and also Gr. Dict. and Whitney, para. 812 b. ]

Verse 5

*Padapāṭha* :

चित्रम् ह यत् वाम् भोजनम् नु अस्ति नि अत्रये महिष्वन्तम् युयोतम् । यः वाम् ओमानम् दधते प्रियः सन् ॥ ५

*Sāyaṇa* :

हे अश्विनौ वां युवयोः चित्रं चायनीयं यद्भोजनं धनमस्ति ह अस्ति खलु । न्विति । पूरणः । तदस्मभ्यं दत्तमित्यर्थः । अथ तयोः स्तुतिः । अत्रये एतन्नामकाद्दषेः । पञ्चम्यर्थे चतुर्थी । तस्मान्महिष्वन्तमृचीसं नि युयोतं पृथक्कुरुतम् । योऽत्रिः प्रियः सन् स्तोतृ्वायुवाभ्यां प्रियभूतः सन् युवाभ्यामेव कृतमोमानं रक्षणं सुखं दधते धारयति ॥

*Notes* :

1. [ चित्रम्. It would be better to construe this as predicate of the principal clause. There would then be no need to supply अस्मभ्यं दत्तम् as Sāy. does. ]

2. अत्रये. 'To Atri.' It cannot mean from Atri, as Sāyaṇa would take it.

3. महिष्वन्तम्. Occurs only here. According to Sāyaṇa, it is the name of the cleft in the rock[2] which the Aśvins made tolerable for Atri ( x, 39, 9 ), and from which they delivered him ( i, 116, 12 ). Roth takes the stem to be महिष्वन्त, and would make our word an adjective in the neuter qualifying भोजनं. Grassmann makes it an acc. masc. from महिष्वत् and 'would supply रयिम् or वाजम or some such word, corresponding to भोजनं in the first line.' [ Cf. Oldenberg's note here ( Noten II, p. 51 ). ]

[1] M's V. G. S. p. 105.

[2] [ In the Av. Mazishant is the name of a mountain ].

4. नि युयोतम्. 'You gave.' युयोतम् is one of the forms cited by Delbrück, Altindische Verbum, p. 136, with regard to which it is not easy to say whether the reduplicated stem is a present or a perfect. For the meaning here Roth, who takes it from यु, यौति Dhātup, XXIV, 3 ( मिश्रणे and अमिश्रणे ; cf. यु, युयोति ) युनाति युनीते, Dhātup, XXXI, 9 ( बन्धने ), compares vii, 5, 9 रयिं नि वाजं श्रुत्यं युवस्व ( Sāyaṇa, नि युवस्व नितरां मिश्रयस्व ), vii, 40, 2 वायुश्च यन्नियुवैते भगश्च ( Sāyaṇa नियुवैते अस्मान्नितरां योजयेताम् । तद्धनमिति पूर्वेण संबन्धः ), vii, 92, 3 नि नो रयिं सुभोजसं युवस्व ( Sāyaṇa, नि युवस्व नितरां मिश्रय प्रयच्छ ), x, 42, 5 तस्मै शत्रून्सुतुकान्प्रातरह्नो नि स्वष्ट्रान्युवति हन्ति वृत्रम् ( 'gives his enemies into his hand;' Sāyaṇa, नि युवति स इन्द्रः पृथक्करोति ), viii, 19, 33, विपो न द्युम्ना नि युवे जनानाम् ( Sāyaṇa, नि युवे नितरां प्राप्नोमि त्वत्प्रसादाल्लभेयेत्यर्थः ).

5. ओमानम् Compare i, 118, 7 युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम्— Sāyaṇa, ओमानं सुखकरं रसवदन्नमधत्तं प्रायच्छतम. The other passages in which the word occurs are i, 34, 6 ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ( To the Aśvins )— Sāyaṇa आमानं सुखविशेषम्, vi, 50, 7 ओमानमापो मानुषीरमृक्तं धात— Sāyaṇa, हे आपः मानुषीः मनुष्यहिता यूयं अमृक्तम् अहिंसितम् ओमानम् । अवति रक्षतीत्योमा । रक्षकमन्नम् &c. vii, 69, 4 यद्वेवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात्— Sāyaṇa, ओमना अवनेन रक्षणेन.

यो वामोमानं दधते प्रिय सन्. This clause presents a difficulty. If it stood alone we should have little scruple in following Sāyaṇa, and translating 'who enjoys your protection, being dear to you'. But in i, 118, 7, a verse relating to the same exploit of the Aśvins, we have a similar phrase used, not of Atri, but of his helpers, the Aśvins--युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम्. [ Cf. तद्वृषो दधते स्म परां शोभाम् and दधाति and धेहि, No. 22, vv. 6 and 8. ] Compare also the use of धत्थः with अधि in the next verse of the present hymn. Grassmann takes our clause to refer to the service ( of worship ) done by Atri to the Aśvins, and he may be right. The relation between the gods and their worshippers is that of mutual help. Compare, for example, No. 2, v. 6 & note 2 on No. 29, v. 3.

Verse 6

*Padapatha* :

उत त्यत् वाम् जुरते अश्विना भूत् च्यवानाय प्रतीत्यम् हविःऽदे । अधि यत् वर्पः इतःऽऊति धत्थः ॥ ६

*Sāyaṇa* :

उत अपि च हे अश्विना अश्विनौ वां युवयोः कर्म कुर्वते जुरते जूर्णाय हविर्दे हविर्दात्रे च्यवानाय एतन्नामकाय महर्षये त्यत्तत्प्रतीत्यं प्रतिगमनं तस्य रूपस्य प्रत्यासत्त्यै भूत् अभूत् । किं तदिति यद्दर्शो रूपम् इतऊति इतोगमनाख्यं मृत्योः सकाशादितःप्राप्तिरूपमधि धत्थः अधत्तम् । युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिरित्यादिषु ( Ṛ.V. i, 117, 13 ) च्यवानस्य युवयोर्नवीकरणं प्रसिद्धम् ॥

*Notes* :

1. Compare i, 117, 13, quoted by Sāyaṇa.

2. प्रतीत्यम्. The word occurs only here and iv, 5, 14 अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः — Sāyaṇa, प्रतीत्येन प्रतिगन्तव्येन आरोहणेत्यर्थः... एवंविधेन वचसा अतृपासः अतृप्ता जनाः. Roth ( Supplement ) renders the word in our passage by Bestatigung [ confirmation ], Erfahrung [ experience, knowledge ] and in iv, 5, 14, by Verheissung, Vertröstung [ the giving hope ]. Grassmann takes it as an adjective in the sense of 'notable' in both places. The text of Sāyaṇa is unfortunately not certain. I have followed Max Müller's conjectural emendation. Sāyaṇa renders प्रतीत्यं by प्रतिगमनं, the 'return' *sc.* of the two Aśvins. He adds तस्य रूपस्य प्रत्यासत्त्यै the cause which moved the Aśvins to return. Construe तस्य रूपस्य with the following यद्दर्शः. For the legend of Cyavāna see Muir, Sanskrit Texts, V, p. 250.

[ 3. इतऊति. = प्राप्तरक्षण, ( Sāyaṇa on i, 146, 2 ), इतोरक्षणवत ( on i, 151, 9 ), एतेभ्यो देवेभ्यो रक्षण ययोः ( on x, 31, 7 इतऊती ). It means 'protected henceforward, enduring, lasting.' ]

Verse 7

*Padapāṭha* :

उत त्यम् भुज्युम् अश्विना सखांयः मध्यें जहुः दुःऽएवांसः
समुद्रे । निः ईम् पर्षत् अरांवा यः युवाकुः ॥ ७

*Sāyṇa* :

उत अपि च त्यं तं भुज्युमेतन्नामानं समुद्रे मध्ये समुद्रोदकस्य मध्ये सखायः भुज्युसखिभूताः दुरेवासः दुष्टगमनाः जुहुः त्यक्तवन्तः । ईमेनं समुद्रमध्ये क्षिप्तं हे

अश्विना अश्विनौ युवां निः पर्षत निरपारयतम्। यः भुज्युः युवाकुः युवां कामयिता अरावा अरणवानभिगन्ता च तमेन निरपारयतम् । अत्राश्विनेषु सूक्तेषु कथाः सूच्यन्ते । अत्रिभुज्युप्रभृतीनामग्निजलादिभ्यो रक्षणरूपास्ताः सर्वा महता प्रपञ्चेनास्माभिर्नासत्याभ्यां वर्हिरिवेत्यत्र ( Ṛ V. i. 116, 1 ) प्रपञ्चिताः । तास्तत्र द्रष्टव्याः ॥

*Notes* :

1. Compare i, 116, 1 ( the passage referred to by Sāyaṇa ), &c. See also Muir, V, p. 244.

1. निरीं पर्षदरावा यो युवाकुः. This is a very difficult clause. We must begin by setting Sāyaṇa's device aside absolutely. The 3rd per. sing. पर्षत् ( fr. पृ, पिपर्ति )[1] cannot possibly be equivalent to the 2nd pers. dual, निरपारयतम्. The nominative to पर्षत् is अरावा. This word is, however, of doubtful meaning. It occurs in other four passages. vii, 56, 15, मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा— Sāyaṇa, हे मरुतः यूयं सुवीर्यस्य शोभनपुत्रोपेतस्य रायः राय धनम् । द्वितीयार्थे षष्ठी । मक्षु शीघ्र दात दत्त । अरावा अरातिः शत्रुभूतोन्यो जनो यं रायं नू चिदादभत् नैवाभिहन्यात् । तद्धनमस्मभ्य दत्तेति संबन्धः. viii, 28, 4, यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत् । अरावा चन मर्त्यः-- Sāyaṇa, कथं देवानामभिलषितं तथा भवतीति चेत तदाह । अरावा । यदि देवाः कस्यचिदप्यदातारं मनुष्यं कामयेरन् तदारावा अदाता । चनेत्यप्यर्थे अदातापि मर्त्यः मनुष्यः उशद्भ्यो देवेभ्यो हवींषि प्रयच्छति । तस्मात्तेषां यत्कामनं तत्तथा भवत्येवेत्यर्थः. ix, 21, 5 आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे । यो अस्मभ्यमरावा. The available MSS. of Sāyaṇa are defective or corrupt here. M. M. prints यो यजमानोऽस्मभ्यमरावा... ... प्रयच्छति प्राप्तकाम एव स्वल्पमित्यस्मभ्यः प्रयच्छति. Compare his Varietas Lectionis, p. xxix, where he conjectures that Sāyaṇa probably explained अरावा by अदाता न किंचित्प्रयच्छति प्राप्तकामः स एव &c. x, 37, 12 यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनं । अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन— Sāyaṇa, अस्मच्छत्रुः नोऽस्मान् अभि प्रति अरावा गमनवान्भूत्वा &c. Cf. also ix, 14, 9.

It is clear that the meaning of अरावा is uncertain. It seems to mean 'hostile,' 'unfriendly,' and so Roth would take it everywhere but here. Grassmann in his Dictionary follows Sāyaṇa on viii, 28, 4, and explains it as a compound of अ and रावन् ( for which last word, however, he can only quote अरावन्

---

[1] M's. V. G. S., p. 398.

itself ) in the sense of 'not giving,' out of which the meaning 'hostile' was, he thinks, developed. In his translation Grassmann takes the word differently : 'A mean wight can save himself if he only trust in you, O Aśvins.' Roth ( Supplement ) takes अरावन् here as = अर्वन्. 'Your horse drew him out.' Compare i, 177, 4 युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः and vii, 69, 7, युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः । पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता.

I have followed Roth's brilliant suggestion in my translation. But if अरावा must be taken as meaning 'enemy,' I would ( with Delbrück ? ) construe यो युवाकुः with the foregoing ईम् ( sc. भुज्युम् ). 'An enemy saved him *because he trusted in you.*'

In some cases अरावा is only a metrically suitable way of writing अर्वा ( cf. हरिश्मशारु, x, 96, 8, with श्मश्रु ) ; so in vii, 68, 7 ; and perhaps in x, 40, 7, युवोरराव, text, युवो रराव.--Lanman. ]

Verse 8

*Padapāṭha :*

वृकाय चित् जसमानाय शक्तम् उत श्रुतम् शयवे हूयमाना । यौ अघ्न्याम् अपिन्वतम् अपः न स्तर्यम् चित् शक्ती अश्विना शचीभिः ॥ ८

*Sāyaṇa :*

वृकाय धनादात्रे । अभिलषत इत्यर्थः । चिदिति पूरणः । अथवा परेभ्यो धनानि प्रयच्छते । यद्वा वृकाय वृकवद्धिंसकाय एतन्नामकाय जसमानाय कर्मभिरुपक्षीयमाणाय ऋषये शक्तमभिमतं धनमदत्तम् । शकेर्दानार्थस्य लुङ्येतद्रूपम् । अडभावश्छान्दसः । उत अपि च शयवे एतन्नामकाय ऋषये हूयमाना आहूयमानौ युवां श्रुतम् अशृणुतम् । यौ युवामघ्न्यां गामपिन्वतमपूरयतं क्षीरेण अपो न अद्भिरिव नदीम् । तां यथोदकेन पूरयतस्तद्वत् । कीदृशीमघ्न्याम् । स्तर्यं चित् स्तरीमपि निवृत्तप्रसवां वृद्धामपि शक्ती शक्त्या सामर्थ्येन दोहनलक्षणेन युक्तां कृत्वा शचीभिर्युष्मदीयैः कर्मभिर्हे अश्विनाविति । शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गामित्यादि ह्युक्तम् ( i, 116, 22 ) ॥

*Notes :*

1. जसमानाय. Compare i, 112, 6, याभिरन्तकं जसमानमारणे—Sāyaṇa, जसमानं तैर्हिंस्यमानं ... । जसमानम् जस हिंसायां । यकि प्राप्ते व्यत्ययेन शप् ।

[ 2. शक्मन्. See note 1 on vii, 54, 3.

3. स्तर्यम्.[1] See Whitney, para 356 ].

Verse 9

*Padapāṭha* :

एषः स्यः कारुः जरते सुऽउक्तैः अग्रे बुधानः उषसाम् सुऽमन्मा । इषा तम् वर्धत् अघ्न्या पयःऽभिः यूयम् पात स्वस्तिऽभिः सदा नः ॥ ९

*Sāyaṇa* :

एषः स्तोता स्यः सः प्रसिद्धो वसिष्ठः कारुः स्तोता उषसामग्रे प्रातःसवने बुधानः बुध्यमानः सुमन्मा शोभनमतिः सुष्टुतिर्वा सूक्तैर्जरते[2] स्तौति । तमिषा अन्नेन वर्धत् वर्धयतम् । वचनव्यत्ययः । अघ्न्या अहन्तव्या गौश्च वर्धत् । वर्धयतु । अथवैकमेव वाक्यम् । अघ्न्या गौर्वसिष्ठस्य प्रतिनियताग्निहोत्रार्था गौः इषा अन्नेन घृतादिनेत्यर्थः । पयोभिश्च तं वसिष्ठं वर्धत वर्धयतु । एवामात्मानं परोक्षेण निर्दिदेश । शिष्टं स्पष्टम् ॥

---

## No. 22

*Maṇḍala* VII *Sūkta* 75

*Sāyaṇa* :

व्युषा आव इत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षम् । अत्रानुक्रमणिका । व्युषा अष्टावुषस्यं तु वा इति । तु वा इत्युक्तत्वात्तुह्यादिपरिभाषयेदमादीनि सप्त सूक्तान्युषोदेवत्यानि । प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दसि आश्विनशस्त्रे चेदमादीनि षट् सूक्तानि । तथा च सूत्र्यते । व्युषा आवो दिविजा इति षडिति त्रैष्टुभमिति ( Āśval. iv, 14 ) ऋग्विधान आख्यातो विनियोगोऽत्र लिख्यते ॥

रात्र्या अपरकाले य उत्थाय प्रयतः शुचिः ।
व्युषा इत्युपतिष्ठेत षड्भिः सूक्तैः कृताञ्जलिः ॥
प्राप्नुयात्स हिरण्यादि नानारूपं धनं बहु ।
गा अश्वान् पुरुषान्धान्यं स्त्रियो वासांस्यजाविकमिति (Ṛgvidhāna, ii, 28)॥

---

[1] M's V. G. S., para 100 C; Lanman's N. I. V., pp. 379, 394.

[2] M's V. G. S,, App., √ jṛ p. 384.

*Note* :

The Paribhāṣā quoted is xii, 3 ( Macdonell's Ed. of the Sarvānukramaṇikā, p. 5 ) तुह्विहवैतच्छन्दोविशिष्टान्यृषिदैवतच्छन्दांसि द्वित्रिचतुःपञ्चषट्सूक्तभाञ्जि यथासंख्यम्. गावोऽश्वान् ( Ulwar MS. ) is the reading of all the MSS. of Sāyaṇa, for Ṛgvidhāna, गा अश्वान्, which M. M. prints. Ṛgvidhāna अजाविकान्.

Verse 1

*Padapāṭha* :

वि उषाः आवः दिविऽजाः ऋतेन आविःऽकृण्वाना महिमानम् आ अगात् । अप द्रुहः तमः आवः अजुष्टम् आङ्गिरःऽतमा पथ्याः अजीगरिति ॥ १

*Sāyaṇa* :

इयमुषा दिविजाः दिव्यन्तरिक्षे प्रादुर्भूता सती वि आवः व्यौच्छत् । विभातं कृतवतीत्यर्थः । वसिर्निवासवाच्यत्र विपूर्वो व्युच्छने भवेत् । छन्दस्यपि दृश्यत इत्यत्र दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वादनजादेरप्याडागमः । हल्ङ्याब्भ्य इति लोपः । सैवोषाः ऋतेन तेजसा महिमानं स्वमहत्त्वमाविष्कृण्वाना आ अगात् आगतवती । आगत्य च द्रुहः अस्मद्द्रोग्धृनजुष्टं सर्वेषामप्रियं तमश्च अप आवः अपवृणोति । किं च अङ्गिरस्तमा । अङ्गेर्गत्यर्थादङ्गिराः । गन्तृतमा पथ्याः पदवीः अजीगः[1] उद्गिरति । प्राणिनां व्यवहाराय प्रकाशयतीत्यर्थः ॥

*Notes* :

1. आवः ( वि ) 3rd per. sing. aor. ind. of वृ.[2] It is the same form as आवः ( अप ) in the second line of the verse. For the lengthening of the augment (Whitney, 585 ) and the alternative saṁdhi ( आवो दिविजा and आवरजुष्टम्, Pada text in the both cases आवः ) Roth refers to the Ṛgveda Prātiśākhya, i, 23, and the Atharvaveda Prātiśākhya, ii, 44.

Sāyaṇa was familiar with the proper explanation of the form which occurs frequently. Compare his note on i, 92, 4

---

[1] M's V. G. S., App. I, √gṛ. ( p. 380 ).

[2] M's V. G. S., para 148. 1. d ( p. 170 ) : Appendix I., √vṛ-to cover ( p. 420 ).

गावो न व्रजं व्युषा आवर्तमः. Pada text आवरित्यावः. Sāyaṇa, तमः अन्धकारं व्यावः विवृतमपश्लिष्टमकरोत् ... । आवः । वृञ् वरणे । लुङि मन्त्रे घसेति च्लेर्लुक् । गुणे हल्ङ्याब्भ्य इति लोपः । छन्दस्यपि दृश्यत इत्याडागमः. The difficulty in the first case of the word here is that there is no accusative.

2. अङ्गिरस्तमा. Compare Sāyaṇa on i, 31, 2, where the same epithet is applied to Agni, हे अग्ने त्वं प्रथमः आद्यः अङ्गिरस्तमः अतिशयेनाङ्गिरा भूत्वा. On i, 75, 2 his note is, हे अङ्गिरस्तम अतिशयेनाङ्गनादिगुणयुक्त यद्वा अङ्गिरसां वरिष्ठ.

Verse 2

*Padapāṭha* :

महे नः अद्य सुवितायं बोधि उषंः महे सौभंगाय प्र यन्धि । चित्रम् रयिम् यशसंम् धेहि अस्मेइतिं देवि मर्तेषु मानुषि श्रवस्युम् ॥ २

*Sāyaṇa* :

अद्य नोऽस्माकं महे महते सुविताय सुखप्राप्तये सुखगमनाय वा बोधि भव । किं च हे उषः महते सौभगाय सौभाग्याय प्र यन्धि प्रयच्छ अस्मान् । किं च चित्रं चायनीयं यशसं यशोयुक्तं रयिं धनं धेहि धारय अस्मे अस्मासु । हे मानुषि मनुष्यहिते देवि मर्तेषु अस्मासु श्रवस्युं अन्नवन्तं पुत्रं धेहीत्यनुषङ्गः ॥

*Notes* :

1. बोधि.[1] Sāyaṇa refers this form sometimes to बुध्, sometimes as here, to भू. Roth following Westergaard, is disposed to look on it in all the passages in which it occurs as a form of भू. Even in x, 83, 6, उत बोध्यापेः, where alone the connection with बुध् seems to him to be called for he would like to read a vocative आपे and construe बोधि ( from भू ) as in i, 76, 4. Delbrück, Altindische Verbum, p. 37 derives it from बुध् in nine places in all (i, 131, 6; iii, 14, 7; iv, 3, 4; v, 24, 4; vi, 21, 5; viii, 43, 27; viii, 44, 22; x, 83, 6 — Delbrück suggests a reading आपि :— x, 167, 2 ). Grassmann translates 'Awake' here and ( Dictionary ) compares v, 79, 1 महे नो अद्य बोधयोषो राये दिवित्मती.

2. यन्धि. Pāṇ. vi, 4, 103 schol. ( Roth ). The usual construction of the root with प्र is the accusative of the thing and the dat., gen. or loc. of the person.

---

[1] M's V. G. S., para. 148, 5 and note 1 (p. 172 ); A's Ved. Met. p. 31.

3. श्रवस्युम्. Compare this word as it occurs in other passages of the Ṛgveda. i, 55, 6, स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ( Said of Indra ) — Sāyaṇa, श्रवस्युः अन्नं यशो वात्मन इच्छन् &c. v, 56, 8, रथं नु मारुतं वयं श्रवस्युमा हुवामहे—Sāyaṇa, श्रवस्युं अन्नेच्छुं. viii, 94, 1, गौर्धयति मरुतां श्रवस्युर्माता मघोनाम् । युक्ता वह्नी रथानाम्--Sāyaṇa, श्रवस्युः अन्नं कामयमाना. The only other form is श्रवस्यवः which, however, occurs sixteen times. Compare, for example, i, 48, 3, उवासोषा उच्छाच्च नु देवी जीरा रथानाम् । ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः--Sāyaṇa, रथप्रेरणे दृष्टान्तः श्रवस्यवो धनकामा समुद्रे न यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयन्ति तद्वत । श्रवस्यवः । श्रूयते इति श्रवः धनम्. Roth gives two words श्रवस्यु, one in the sense of ' Praising, ' and the other in that of ' quick moving. ' [ Cf. also वाजासः श्रवस्यवः ( v, 9, 2 )--Sāyaṇa, श्रवस्यवो यजमानस्य प्रभूतां कीर्तिं संपादयन्तो वाजासो हवींषि. Gr. in Dict. explains the word in the present passage and in v, 9, 2, and 56, 8 by ' preisliches Gut enthaltend ' ( holding something good, that is worthy of praise ). ]

Verse 3

*Padapāṭha* :

एते त्ये भानवः दर्शतायाः चित्राः उषसः अमृतासः आ अगुः । जनयन्तः दैव्यानि व्रतानि आऽपृणन्तः अन्तरिक्षा वि अस्थुः ॥ ३

*Sāyaṇa* :

दर्शतायाः दर्शनीयायाः प्रकाशयुक्तायाः उषसः[1] एते पुरो दृश्यमानाः त्ये ते प्रसिद्धाः चित्राः पूज्याः आश्चर्यभूताः वा अमृतासः अमरणाः अनश्वराः भानवः रश्मयः आ अगुः आगच्छन्ति । किं कुर्वन्तः । दैव्यानि देवानां संबन्धीनि व्रतानि कर्माणि जनयन्तः उत्पादयन्तः । तदनुकूलप्रकाशप्रदानात्तदुत्पादकत्वमेषाम् । अन्तरिक्षा अन्तरिक्षाणि आपृणन्तः आपूरयन्तः । एकस्यैवान्तरिक्षस्य वायुमेघपक्षिणामालम्बनोपधिना त्रिविधत्वम् । अतो बहुवचनमुपपन्नम् । एवं कुर्वन्तो भानवः वि अस्थुः विविधं तिष्ठन्ति प्रसरन्ति ॥

*Note* :

1. त्ये. Pronounce ti-e.

[1] ' 3b uṣāsaḥ ' — Arnold's Ved. Met., p. 310; see also § 170 ii a —Arnold's Ved. Met., p. 130.

2. जनयन्तो दैव्यानि व्रतानि. ( Pronounce, daivi-āni vratāni ). 'Bringing to life ( again ) the works of the gods.' Compare स्वर्जनन्ती, No, 8, verse 4. ( Note. )

Verse 4

*Padapāṭha* :

एषा स्या युजाना पराकात् पञ्च क्षितीः परि सद्यः जिगाति । अभिऽपश्यन्ती वयुना जनानाम् दिवः दुहिता भुवनस्य पत्नी ॥ ४

*Sāyaṇa* :

एषा स्या[1] सा उषाः पराकात् दूरदेशात् दूरे स्थितापि युजाना उद्योगं कुर्वाणा प्रकाशाय पञ्च क्षितीः निषादपञ्चमश्चत्वारो वर्णाः तान् सद्यः परि जिगाति परिगच्छति । किं कुर्वती । जनानां प्राणिनां वयुना प्रज्ञानानि अभिपश्यन्ती साक्षित्वेनावलोकयन्ती । कीदृशी सा । दिवो दुहिता दुहितृस्थानीया भुवनस्य भूतजातस्य पत्नी पालयित्री । परि जिगातीत्यन्वयः ॥

*Note* :

1. युजाना. 'Yoking her horses.' Compare verse 6.

2. पञ्च क्षितीः. It is clear from the context that the quick approach of Uṣas to five communities lying apart from each other is intended. Compare परि द्यावापृथिवी यन्ति (sc. अश्वाः सूर्यस्य) सद्यः, No. 3 verse 3. This of itself would negative Sāyaṇa's explanation. For the real meaning of the expression see note on No. 7 verse 8.

3. वयुना. Perhaps 'customs' or 'deeds.' Compare i, 145, 5 व्यब्रवीद्वयुना मर्त्येभ्यः. Sāyaṇa, वयुनानि प्रज्ञानान्यनुष्ठेयज्ञानानि व्यब्रवीत् विशेषेण ब्रवीति उपदिशति. [ Gr. derives वयुन from वे 'to weave' and gives 'web' as the root-meaning. Pischel approves of the etymology and gives the following as the senses of

---

[1] Arnold's Ved. Met., p. 32; 'siā; cataleptic Bhārgavī verse, requiring correction.' —Arnold's Ved. Met., p. 310.–For Bhārgavī verse see Arnold's Vedic Metre p. 213.

the word :-- ( adj. ) moving ; ( s. n. ) that which moves or lives ; way, line or row ; ways and means (corresp. to Sāyaṇa's प्रज्ञानानि ) ; custom, usage or practice ( like the classical Sk. mārga as in mallamārga, yuddhamārga, &c. ), law, ordering ; ( s. f. limit, boundary ). He cites i, 189, 1. अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्, urging that it will be seen that वयुनानि here corresponds to सुपथा. He further compares i, 145, 5 ; i, 72, 7 and the present passage, and says that वयुना मर्त्येभ्यः वयुनानि क्षितीनाम् and वयुना जनानाम् in these passages are identical and what they mean is shown by vii, 79, 1 and v, 80, 2, व्युषा आवः पथ्या जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती and एषा जनं दर्शता बोधयन्ती सुगान्पथः कृण्वती यात्यग्रे. अभिपश्यन्ती वयुना जनानाम् he translates by ' looking down upon the goings on of men ' — Ved. St., i. pp. 295—308. ]

Verse 5

*Padapāṭha* :

**वाजिनीऽवती सूर्यस्य योषा चित्रऽमघा रायः ईशे वसूनाम् । ऋषिऽस्तुता जरयन्ती मघोनी उषाः उच्छति वह्निऽभिः गृणाना ॥ ५**

*Sāyaṇa* :

वाजिनीवती बह्वन्ना । यद्यप्युषो नामैतत्तथापि चित्रामघेत्यस्याप्युषोनामकस्य पृथग्विद्यमानत्वादत्रैको योगरूढोवगन्तव्यः सूर्यस्य योषा योषित् चित्रामघा विचित्रधना विचित्ररश्म्याख्यधना वा रायः धनस्य अविशिष्टस्य तस्य वसूनां देवमनुष्यादिसर्वाश्रयाणां धनानां च ईशे ईष्टे । अथवा वसवः वासकाः रश्मयः तेषामपीष्टे । ऋषिष्टुता ऋषिभिः स्तुता जरयन्ती प्राणिजातानि । उषाः खलु पुनः पुनरावर्तमाना प्राणिनामायुः क्षपयति । मघोनी धनवती उषाः वाह्निभिः कर्मवोढृभिर्यजमानैर्गृणाना स्तूयमाना उच्छति विभानं करोति ॥

*Notes* :

1. वाजिनीवती and चित्रामघा are both given in the list of synonyms for उषस्, Nigh. i, 8. One or the other must be taken here, Sāyaṇa says, in the secondary sense, the other being taken as an adjective.

[ 2. सूर्यस्य योषा.[1] ' A comparison of प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा विभाति, i, 92, 11 with आमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना of the next Ṛk shows that the lover (जार) of Uṣas is Sūrya. So it would not be right to translate our expression here as the wife of Sūrya, but as the loved one of Sūrya. That योषन् and its allied words mean that is shown by ix, 101, 14, ix, 38, 4 ; ix, 32, 5,--Pischel. Ved. St, i, pp. 31-2 and 27.

3. ईशे. Whitney, para. 545 b. ][2]

4. जरयन्ती. Roth compares i, 92, 10, मर्तस्य देवी जरयन्त्यायुः ( said of Uṣas ) ; i, 124, 10 ; i, 179, 1 उषसो जरयन्तीः.

[ 5. वह्निभिः. See supplementary Note. ][3]

Verse 6

*Padapāṭha* :

प्रति द्युतानाम् अरुषासः अश्वाः चित्राः अदृश्रन् उषसम् वहन्तः । याति शुभ्रा विश्वऽपिशा रथेन दधाति रत्नम् विधते जनाय ॥ ६

*Sāyaṇa* :

द्युतानां द्योतमानामुषसं वहन्तः धारयन्तः अरुषासः आरोचमानाः चित्राः चायनीयाः अश्वाः प्रति अदृश्रन् प्रतिदृश्यन्ते । सा च उषा शुभ्रा दीप्यमाना विश्वपिशा बहुरूपेण रथेन याति सर्वत्र गच्छति । विधते परिचरते जनाय रत्नं रमणीयं धनं दधाति ददाति च ॥

*Notes* :

[ 1. अरुषासः. अरुष ( adj. )=red ( Ved. Hymns, Pt. i. pp. 17-8 ].

2. अदृश्रन्. Whitney, 834 b.[4]

3. विश्वपिशा. The word occurs only here and in vii, 57, 3, where it is an epithet of the Maruts. Sāyaṇa, विश्वपिशः व्याप्तदीप्तयः.

---

1 M's V. G. S., para, 90 2 ( p. 67 ).

8 M's V. G. S., para, 134, 4, *ca* ( p. 143 ).

3 Inserted on No. 17, v. 3 above.

4 M's V. G. S., App. I, p. 391.

Verse 7

*Padapāṭha* :

सत्या सत्येभिः महती महत्ऽभिः देवी देवेभिः यजता यजत्रैः । रुजत् दृळ्हानि दुदत् उस्रियाणाम् प्रति गावः उषसम् वावशन्त ॥ ७

*Sāyaṇa* :

सत्या अन्यैरबाध्या महती पूजनीया प्रवृद्धा वा गुणैः देवी द्योतमाना यजता यजनीया उषाः सत्येभिः[1] सत्यैः महद्भिर्देवेभिः देवैः यजत्रैरुक्तलक्षणैः[2] किरणैर्निपातभाग्भिः अन्यैर्देवैर्वा सहिता सती दृळ्हानि अत्यन्तं स्थिराणि तमांसि रुजत् भिनत्ति। उस्रियाणाम् । गोनामैतत् । उस्राविण आसां भोगा इति व्युत्पत्तिः । तासां संचाराय प्रति ददत् प्रति ददाति । सामर्थ्यात्प्रकाशमित्यर्थः अथवा उस्रिया गा ददत् ददाति स्तोतृभ्यः[1] । किं च गावः । उपलक्षणमेतत् । सर्वेऽपि तमोऽवरुद्धाः प्राणिन उषसं वावशन्त उशन्ति कामयन्ते । विशेषेण गवां प्रभाते संचारार्थमुषसोऽपेक्षितत्वात्तासां प्राधान्येनोक्तिः ॥

*Notes* :

1. सत्या सत्येभिः. &c. Compare the note in the double use of धृतव्रत, No. 2 verse 6.

[ 2. ददुस्रियाणाम्. Sāyaṇa's second explanation appears preferable.

3. प्रति. Had rather be construed with उषसम्. ]

Verse 8

*Padapāṭha* :

नु नः गोऽमत् वीरऽवत् धेहि रत्नम् उषः अश्वऽवत् पुरुऽभोजः अस्मे इति । मा नः बर्हिः पुरुषता निदे कः यूयम् पात स्वस्तिऽभिः सदा नः ॥ ८

---

1 M's V. G. S., para. 97 A. 1. pp. 77, 78 ( note 9 ).

2 Ibid ; Av. $\sqrt{}$ yaz-to worship, Av. yazata-divinity, angel, Phl. Ized-( Dr. Dhalla's Zoroastrian Theology, Chs. xiv, xxvii, pp. 96-140, 236-242).

*Sāyaṇa* :

हे उषः नु नोऽस्मभ्यं गोमत् बहुभिर्गोभिर्युक्तं वीरवत् वीरैः पुत्रैरुपेतमश्वावत् अश्वैरुपेतं रत्नं रमणीयं धनं पुरुभोजः बहन्नं च अस्मे अस्मासु धेहि देहि । पादभेदादस्मे इति पुनरभिधानम्[1] । नोऽस्माकं बर्हिर्यज्ञं पुरुषता पुरुषतायां पुरुषसमूहेषु । अस्मत्सदृशेष्वित्यर्थः । निदे निन्दायै मा कः मा कार्षीः । यथा ते निन्दन्ति तथा मा कुर्वित्यर्थः ॥

[ *Note* :

पुरुषता. Scherer and Bollensen speak of locative forms in *ā* from *ā*-stems. I do not think that any such can be proved. Some of the supposed ones are instrumentals.--Lanman, Noun-inflection. ][2]

---

## No. 23

*Maṇḍala* VII *Sūkta* 83

*Sāyaṇa* :

युवां नरेति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतमैन्द्रावरुणम् । युवां नरेत्यनुक्रान्तम् । आभिप्लविकेषूक्थ्येषु स्तोमवृद्धौ प्रशास्तुरिदं सूक्तमावापार्थम् । सूत्रितं च । युवां नरा पुनीषे वामिति ( Āśval. vii, 9 ).

*Note* :

Roth subjoins a note to the translation of this hymn in the Siebenzig Lieder which I translate.

'The hymn is historical and speaks of a victorious contest--often referred to--which was waged by Sudās,[3] King of the Tṛtsus, against ten confederate princes. The Vasiṣṭhas are the family priests of Sudās. In this song of thanksgiving they ascribe the victory of Sudās to their own effectual intercession for him with Indra and Varuṇa, and to the mighty help vouchsafed by these gods. Verse 8 appears to be the original close of the poem. Verse 10 is common to this hymn with vii, 82 ( the preceding one ).'

---

1 'a'śvavat, § 168 ii.'—Arnold's Ved. Met., p. 310; see § 168 on long and short vowels before -van,-mant-vant: Arnold's Vedic Metre p. 127.

2 Lanman's N. I. V., p. 360a.

3 M and K's Ved. Ind., Vol. II, p. 454.

Grassmann would take the hymn somewhat differently. 'As you helped Sudās before' ( verses 4 and 6 to 8 ) so help us now in the fight that is imminent ( verses 1 to 3 and 5 ).

[ Vv. 1—8 are translated in Muir's Sanskrit texts, Vol. 1, pp. 323-4. ]

Verse 1

*Padapāṭha* :

युवाम् नरा पश्यमानासः आप्यम् प्राचा गव्यन्तः पृथुऽपर्शवः ययुः । दासा च वृत्रा हतम् आर्याणि च सुऽदासम् इन्द्रावरुणा अवसा अवतम् ॥ १

*Sāyaṇa* :

हे नरा[1] नेताराविन्द्रावरुणौ युवां । षष्ठ्यर्थे द्वितीया । युवयोः आप्यं बन्धुभावं पश्यमानासः पश्यन्तः युष्मद्बान्धवलाभार्थिनः गव्यन्तः गाः आत्मन इच्छन्तः यजमानाः पृथुपर्शवः पृथुर्विस्तीर्णः पर्शुः पार्श्वास्थि येषां ते तथोक्ताः । विस्तीर्णाश्वपर्शुहस्ताः सन्तः प्राचा प्राचीनं ययुः । बर्हिराहरणार्थं गच्छन्ति । पर्श्वा हि बर्हिराच्छिद्यते । तथा च तैत्तिरीयकम् । अश्वपर्श्वा बर्हिरच्छैतीति ॥ ( T. B. iii, 2, 2 ) । हे इन्द्रावरुणौ युवां दासा दासानि उपक्षपयितॄणि च वृत्रा वृत्राणि आवरकाणि शत्रुजातानि आर्याणि च कर्मानुष्ठानपराणि शत्रुजातानि हतं हिंस्तम् । अपि च सुदासम् अस्मद्याज्यमेतत्संज्ञं राजानमवसा रक्षणेन सार्धमवतमागच्छतम् ॥

*Notes* :

1. युवाम् and आप्यम् are in the same construction after पश्यमानासः, 'To you looking--to your kindness.' Ludwig refers the clause to the enemies of Sudās. 'Though they saw that Sudās had you for his friends, yet they pressed forwards.'

2. प्राचा. 'Forwards.' The inst. sing. of प्राञ्च् used as an adverb. Roth compares ii, 26, 4, यो अस्मै हव्यैर्घृतवद्भिरविधत्प्र तं प्राचा नयति ब्रह्मणस्पतिः--Sāyaṇa, प्राचा प्राचीनेन ऋजुना मार्गेण.

3. गव्यन्तः. Only the participle occurs. I translate Roth's article on the word : गव्य ( denom. from गो ), गव्यति 'to be desirous of getting cattle,' Vopadeva, 21, 2. From this root the participle गव्यन्त्. ( 1 ) 'desirous of getting cattle' : गौरसि वीर गव्यते [ cf. clause which follows, अश्वो अश्वायते भव ] vi, 45,

[1] Av. nar-, nara-'man.' § Av. ago, gava, gāo.

26 ; vii, 32, 23 ; ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम् । ... गवि वव्रुः iv, i, 15 ; गव्यन्तः, अश्वायन्तः, वाजयन्तः, जनीयन्तः iv, 17, 16. ( 2 ) 'ardently desiring,' एतायामोप गव्यन्त इन्द्रम् [ Sāyaṇa, देवाः परस्परमेवं कथयन्ति । हे देवा गव्यन्तः पणिनामकेनासुरेणापहृता अस्मदीया गाः प्राप्तुमिच्छन्तो यूयम् एत आगच्छत । युष्माभिः सहिता वयमिन्द्रं गवानयनक्षमं उपायाम प्राप्नवाम ] i, 33, 1 ; नि गव्यता मनसा सेदुरर्कैः कृण्वानासो अमृतत्वाय गातुम् iii, 31, 9. ( 3 ) 'eager for battle' : गव्यन्ता द्वा जना [ Sāyaṇa गव्यन्ता गामात्मन इच्छन्तौ । गोशब्दात्सुप आत्मनः क्यच् । वान्तो यि प्रत्यय इत्यवादेशः । स्वर्यन्ता स्वर्गं यन्तौ गन्तुमुद्युक्तौ द्वा जना द्वौ जायापतिरूपौ जनौ ] i, 131, 3 ; ये गव्यता मनसा शत्रुमादभुः [Sāyaṇa, गव्यता शत्रूणां गा इच्छता] vi, 46, 10 ; प्राञ्चा गव्यन्तः पृथुपर्शवो ययुः vii, 84, 1 [ our passage ] ; रथं गव्यन्तं [ Sāyaṇa, रथं रंहणं गव्यन्तं गा इच्छन्तं यं स्तोतारम् ] viii, 2, 35 ; प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति [ Sāyaṇa, गव्यन् शत्रूणां गा इच्छन् । यद्वा यजमानानां पश्वादिकमिच्छन् ] ix, 96, 1.[1]

4. पृथुपर्शवः. 'With broad axes.' The word occurs only here. The अश्वपर्शु referred to by Sāyaṇa is an implement in the form of a horse's head which was used for cutting the sacrificial grass. ( Taitt. Brāhm. III, 2, 2, the passage quoted by Sāyaṇa ). Ludwig pronounces the meaning 'with broad axes' to be quite impossible on the ground that the axe does not play in the Ṛgveda the part it does in the Mahābhārata. He takes the word to be a proper name, the Pṛthus and the Parśus.[1]

Verse 2

*Padapāṭha* :

**यत्रं नरंः सम्ऽअयन्ते कृतऽध्वंजः यस्मिन् आजा भवंति किम् चन प्रियम् । यत्रं भयंन्ते भुवंना स्वःऽदृशंः तत्रं नः इन्द्रावरुणा अधिं वोचतम् ॥ २**

*Sāyaṇa* :

यत्र यस्मिन् संग्रामे नरः मनुष्याः कृतध्वजः उच्छ्रितध्वजाः समयन्ते युद्धार्थं संगच्छन्ते । यस्मिंश्चाजा आजौ युद्धे । चनेति निपातद्वयसमुदायो विभज्य योजनीयः । किं च प्रियमनुकूलं न भवति । अपि तु सर्वं दुष्करं भवति । यत्र च युद्धे

[1] See under '4 Parśu', M and K's Ved. Ind., Vol. I, p. 504–5.

भुवनानि भूतजातानि स्वर्दृशः शरीरपातादूर्ध्वं स्वर्गस्य द्रष्टारो वीराश्च भवन्ते बिभ्यति । तत्र तादृशे संग्रामे हे इन्द्रावरुणौ नोऽस्मानधि वोचतम् अस्मत्पक्षपातवचनौ भवतम् ॥

*Not s* :

[ 1. कृतध्वजः. ध्वज् from ध्रु like ध्रुवज्, सनज् &c. ]

2. यस्मिन्नाजा भवति किं चन प्रियम्. Ludwig accepts Sāyaṇa's explanation, 'in the fight where nothing is pleasant.' Grassmann 'where all that is dear is at stake.'

[ Nothing is more difficult in the interpretation of the Veda than to gain an accurate knowledge of the power of particles and conjunctions. The part. चन, we are told, is used both affirmatively and negatively, a statement which shows better than anything else the uncertainty to which every translation of Vedic hymns is as yet exposed. It is prefectly true that in the text of the Ṛ. V. as we now read it, चन means both indeed and no. But this very fact shows that we ought to distinguish where the first collectors of the Vedic hymns have not distinguished, and that while in the former case we read चन we ought in the latter to read च न.' Max Müller, Vedic hymns, Pt. I., p. 264.[1]

M. M. agrees with Sāy. here and translates 'in which struggle there is nothing good whatsoever.'

3. स्वर्दृशः. Those that see the light.' स्वर् is used of the brightness, the light of the fire, the sun, the sky. ]

Verse 3

*Padapāṭha* :

सम् भूम्याः अन्ताः ध्वसिराः अदृक्षत इन्द्रावरुणा दिवि घोषः आ अरुहत् । अस्थुः जनानाम् उप माम् अरातयः अर्वाक् अवसा हवनऽश्रुता आ गतम् ॥ ३

[1] M's. V. G. S. para 180, *sub voce*, pp. 229-30.

*Sāyaṇa* :

हे इन्द्रावरुणौ भूम्या अन्ताः पर्यन्ताः ध्वसिराः सैनिकैर्ध्वस्ताः ममदृक्षत संदृश्यन्ते । तथा दिवि द्युलोके घोषः सैनिकानां शब्दश्चारुहत् आरूढोऽभूत् । जनानामस्मदीयानां भटानाम् अरातयः शत्रवः मामुपास्थुः उपस्थिताः । एवं प्रवर्तमानेऽस्मिन्युद्धे हे हवनश्रुता आह्वानशीलाविन्द्रावरुणौ अर्वागस्मदभिमुखम् अवसा रक्षणेन सह आ गतमागच्छतम् ॥

*Note* :

It seems better to take जनानाम् of the foes of Sudās than, as Sāyaṇa does, of his warriors. जनानामरातयः is either ' the enmity of the peoples ' or ' my enemies among the peoples. '

Verse 4

*Padapātha* :

**इन्द्रावरुणा वधनाभिः अप्रति भेदम् वन्वन्ता प्र सुऽदासम् आवतम् । ब्रह्माणि एषाम् शृणुतम् हवीमनि सत्या तृत्सूनाम् अभवत् पुरःऽहितिः ॥ ४**

*Sāyaṇa* :

हे इन्द्रावरुणा इन्द्रावरुणौ वधनाभिर्वधकैरायुधैः अप्रतिगतम् अप्राप्तं भेदम् एतत्संज्ञं सुदासः शत्रुं वन्वन्ता हिंसन्तौ युवां सुदास । शोभनं ददातीति सुदाः । एतत्संज्ञं मम याज्यं राजानं प्रावतं प्रकर्षेणारक्षतम् । एषां तृत्सूनां मम याज्यानां ब्रह्माणि स्तोत्राणि श्रुणुतमश्रृणुतम् । कदा । हवीमनि । आहूयन्तेऽस्मिन्युद्धार्थं परस्परमिति हवीमा संग्रामः तस्मिन् । यस्मादेवं तस्मात् तृत्सूनामेतत्संज्ञानां मम याज्यानां पुरोहितिः मम पुरोधानं सत्या सत्यफलमभवत् । तेषु यन्मम पौरोहित्यं तत्सफलं जातमित्यर्थः ॥

*Notes* :

1. अप्रति. 'Irresistibly.' An adverb. Compare vii, 99, 5, हथो अप्रत्यसुरस्य वीरान्.

[ 2. तृत्सूनां पुरोहितिः. 'In v. 8 below, it is certain that the Tṛtsus clad in white and with their hair braided are the same as the whiterobed Vasiṣṭhas, with hair-knots on the right, of vii, 33, 1. But in vii, 33, 6 the Bharatas are called subject of the Tṛtsus ( तृत्सूनां विशः ). In vii, 18, 13, Indra makes over to Tṛtsu the possessions of the enemy ( the booty ). It seems that Tṛtsu in the sing. is King Sudās, and the plural, with the exception of v. 8 of the present hymn, signifies his dynasty or gotra.

The next question is as to how the genitive is to be interpreted. Whether the expression means पुरोहिति *possessed by* ( on the part of ) the Tṛtsus ( the priests) or *of* ( on behalf of ) the Tṛtsus ( the king and his gotra ). Comparing T. Br. 2, 7, 1, 2 देवानां पुरोधां गच्छेयम् and Śat. Br. 4, 4, 5 तस्मान्न ब्राह्मणः सर्वस्येव क्षत्रियस्य पुरोधां कामयेत, it seems less likely that तृत्सूनां here is the *possess*. gen.[1]

The vivid description in the hymn puts vv ३ and ५ directly into the mouth of Sudās and his family. These are the ब्रह्माणि referred to.

The close connection of the family of the Purohita with the king's family is indicated by the fact that the name for the one could stand for the other as well. '— Geldner, Ved. St. ii. 136–7. ][2]

Verse 5

*Padapāṭha* :

इन्द्रावरुणौ अभि आ तपन्ति मा अघानि अर्यः वनुषाम् अरातयः । युवम् हि वस्वः उभयस्य राजथः अध स्म नः अवतम् पार्ये दिवि ॥ ५

*Sāyaṇa* :

हे इन्द्रावरुणौ अर्यः अरेः शत्रोः संबन्धीनि अघानि आहन्तॄण्यायुधानि मा मामभ्या तपन्ति अभितो बाधन्ते । अपि च वनुषां हिंसकानां मध्ये अरातयः अभिगमनशीलाः शत्रवश्च मामभितपन्ति । युवं हि युवां खलु उभयस्य पार्थिवस्य दिव्यस्य वस्वः वसुनो धनस्य राजथः ईशाथे । राजतिरैश्वर्यकर्मा । अध स्म अतः कारणात् पार्ये तरणीये दिवि दिवसे युद्धदिने नाऽस्मानवतं रक्षतम् ॥

*Note* :

वस्व उभयस्य. 'The wealth of both sides.' Compare the next verse.

Verse 6

*Padapāṭha* :

युवाम् हवन्ते उभयासः आजिषु इन्द्रम् च वस्वः वरुणम् च सातये । यत्र राजऽभिः दशऽभिः निऽबाधितम् प्र सुऽदासम् आवतम् तृत्सुऽभिः सह ॥ ६

---

1 M and K's Ved. Ind., Vol. I, pp. 331–22.

2 For Tṛtsu see *sub voce*, M and K's Ved. Ind., Vol. I, p. 320.

*Sāyaṇa* :

उभयासः उभयविधाः सुदाः संज्ञो राजा तत्सहायभूतास्तृत्सवश्च एवं द्विप्रकारा जना आजिषु संग्रामेषु इन्द्रं च वरुणं च युवां हवन्ते आह्वयन्ते । किमर्थम् । वस्वः धनस्य सातये सभजनार्थम् । यत्र येष्वाजिषु दशभिर्दशसंख्याकैः राजभिः शत्रुभूतैः नृपैः निबाधितं नितरां हिंसितं सुदासं तृत्सुभिः सह वर्तमानं प्रावतं युवां प्रकर्षेणा-रक्षतम् तेष्वाजिष्वित्यन्वयः ॥

[ *Note* :

उभयासः. 'It might have been supposed that one of the parties meant was the hostile kings; but they are said in the next verse to be अयज्यवः—' Muir, I, p. 324. ]

Verse 7

*Padapāṭha* :

दश राजानः सम्ऽइताः अयज्यवः सुऽदासम् इन्द्रावरुणा न युयुधुः । सत्या नृणाम् अद्मऽसदाम् उपऽस्तुतिः देवाः एषाम् अभवन् देवऽहूतिषु ॥ ७

*Sāyaṇa* :

हे इन्द्रावरुणौ दशसंख्याकाः राजानः सुदासः शत्रवः समिताः परस्परं समवेताः अयज्यवः अयजमानाः एवंभूतास्ते सुदासम् एतत्संज्ञमेकमपि राजानं न युयुधुः[1] न संप्रजह्रुः । युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः । तदानीमद्मसदाम् । अद्मानि अन्नं हवींषि सीदन्तीत्यद्मसद ऋत्विजः । हविर्भिर्युक्तानां नृणां यज्ञस्य नेतॄणामृत्विजामु-पस्तुतिः स्तोत्रं सत्या सफलाभूत । अपि च एषां देवहूतिषु । देवा हूयन्त एष्विति देवहूतयो यज्ञाः । तेषु सर्वे च देवा अभवन् । युष्मदनुग्रहात्प्रादुर्भवन्ति ॥

Verse 8

*Padapāṭha* :

दाशऽराज्ञे परिऽयत्ताय विश्वतः सुऽदासे इन्द्रावरुणौ अशिक्षतम् । श्वित्यञ्चः यत्र नमसा कपर्दिनः धिया धीऽवन्तः असपन्त तृत्सवः ॥ ८

---

[1] 'Perhaps yūyudhuḥ'—Arnold's V. M. p. 31. For a long vowel in reduplication see Arnold's V. M. p. 128 § 169.

*Sayaṇa* :

हे इन्द्रावरुणौ दाशराज्ञे । दशशब्दस्य छान्दसो दीर्घः । विभक्तिव्यत्ययः । दशभी राजभिः शत्रुभूतैः विश्वतः सर्वतः परियत्ताय परिवेष्टिताय सुदासे राज्ञे अशिक्षतं बलं प्रायच्छतम् । यत्र यस्मिन्देशे श्वित्यञ्चः श्वितिं श्वैत्यं नैर्मल्यमञ्चन्तो गच्छन्तः कपर्दिनः जटिला धीवन्तः कर्मभिर्युक्तास्तृत्सवः वसिष्ठशिष्याः एतत्संज्ञा ऋत्विजः नमसा हविर्लक्षणेनान्नेन धिया स्तुत्या च असपन्त पर्यचरन् । तस्मिन्देशे युवां तस्मै बलं प्रायच्छतमित्यर्थः ॥

*Notes* :

[ *1*. दाशराज्ञे. दशभी राजभिः सह युद्धे प्रवृत्ते सति ( Sāyaṇa on दाशराज्ञ in vii, 33, 3 ).]

2. अशिक्षतम्. See not on शग्म, No. 20, verse 3.

## Verse 9

*Padapāṭha* :

वृत्राणि॑ अ॒न्यः स॒म्ऽइ॒थेषु॑ जिघ्न॑ते व्र॒तानि॑ अ॒न्यः अ॒भि र॒क्ष॒ते सदा॑ । हवा॑महे वा॒म् वृ॒ष॒णा सु॒वृ॒क्तिऽभि॑ः अ॒स्मे इति॑ इ॒न्द्रा॒व॒रु॒णा॒ शर्म॑ य॒च्छ॒त॒म् ॥ ९

*Sāyaṇa* :

हे इन्द्रावरुणौ युवयोरन्य एक इन्द्रः वृत्राणि शत्रून् समिथेषु संग्रामेषु जिघ्नते हन्ति । अन्य एको वरुणः सदा सर्वदा व्रतानि अभि रक्षते अभितः सर्वतो रक्षति । हे वृषणा कामानां वर्षिताराविन्द्रावरुणौ तथाविधौ वां युवां सुवृक्तिभिः सुप्रवृत्ताभिः स्तुतिभिः हवामहे आह्वयामहे । आहूतौ च युवामस्मे अस्मभ्यं शर्म सुखं यच्छतं दत्तम् ॥

[ *Notes* :

सुवृक्तिभिः. See note 2 on iii, 61, 5, above. 'This [ something like 'beautiful prayer', 'beautiful song' and then 'a god who is invoked with beautiful songs' ] being the meaning of the word, I cannot think it probable that it stands in connection with the verb वृज् in its well-known use referring to the Barhis. In my opinion सुवृक्ति may be connected with another use of वृज्, with the meaning of this verb 'to draw a god

towards himself, averting him from other sacrificers." Or possibly the word may be derived from ऋक् ( comp. सुवित derived from इ ) '— Oldenberg, Vedic Hymns, ii. pp. 203-4. ]

*Padapāṭha* :

Verse 10

अस्मेइति॑ इन्द्रः॑ वरु॑णः मि॒त्रः अ॒र्य॒मा द्यु॒म्नम् य॒च्छ॒न्तु॒ महि॑ शर्म॑ स॒ऽप्रथः॑ । अ॒व॒ध्रम् ज्योतिः॑ अदि॑तेः ऋ॒त॒ऽवृधः॑ दे॒वस्य॑ श्लोक॑म् स॒वि॒तुः म॒ना॒म॒हे ॥ १०

*Sāyaṇa* :

व्याख्यातेयं अक्षरार्थस्तु । इंद्रादयोऽस्मभ्यं द्योतमानं धनं प्रयच्छन्तु सर्वतो विस्तीर्णं महद्गृहं च । यज्ञस्य वर्धयित्र्या अदीनाया देवमातुस्तेजश्चास्माकमबाधकं भवतु वयं च प्रेरकस्य देवस्य स्तोत्रं मनामहे । कुर्महे ॥

*Note* :

This verse is repeated here from vii, 82, 10.

---

## No. 24

*Maṇḍala* VII *Sūkta* 86

*Sāyaṇa* :

धीरा त्वस्येत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । तथा चानुक्रान्तम् । धीराष्टौ वारुणं हीति । गतो विनियोगः ॥

*Note* :

The whole hymn has been translated in Max Müller's Ancient Sanskrit Literature, pp. 540-1, and vv. 3 ff. in Muir's Sanskrit Texts, v, p. 66. ][1]

---

1 Annotated in Lanman's Sanskrit Reader, pp. 372-73.

Verse 1

*Padapāṭha* :

धीरा॑ तु अ॒स्य म॒हिना॑ ज॒नूंषि॑ वि यः त॒स्तम्भ॑ रोद॑सी॒इति॑ चि॒त् उ॒र्वीइति॑ । प्र नाक॑म् ऋ॒ष्वम् नु॒नु॒दे बृ॒हन्त॑म् द्वि॒ता नक्ष॑त्रम् प॒प्रथ॑त् च॒ भूम॑ ॥ १

*Sāyaṇa* :

अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु क्षिप्रं धीरा धीराणि धैर्यवन्ति भवन्ति । यः वरुणः उर्वी विस्तीर्णे रोदसी चित द्यावापृथिव्यावपि वि तस्तम्भ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत् । यश्च बृहन्तं महान्तं नाकमादित्यं नक्षत्रं च ऋष्वं दर्शनीयं द्विता द्वेधं प्र नुनुदे प्रेरयति स्म । अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः । भूम भूमिं च यः पप्रथत अप्रथयत् विस्तारितवान् । तस्यास्य वरुणस्येत्यन्वयः ।

*Notes* :

धीरा त्वस्य महिना जनूंषि. It is a question whether अस्य goes with जनूंषि as Sāyaṇa takes it, or with the nearer महिना. The latter construction seems preferable. 'The peoples endure by the might of him, who' &c. But Max Müller, Roth and Grassmann all join अस्य जनूंषि and translate 'his works.' Ludwig construes as I do, but he makes धीरा mean wise. For the instrumental महिना see Whitney, 425 e.[1]

2. वि यस्तस्तम्भ रोदसी चिदुर्वी. 'Who stemmed asunder the wide firmaments',– Max Müller; Heaven and Earth, referred to individually in the line which follows.

3. प्र .. नुनुदे. 'Lifted on high,' Max Müller, 'Set in motion,' Grassmann and Ludwig. Perhaps 'beat out' as a goldsmith beats out a piece of metal. [ 'Started the star ( the sun ) on the high and wide path-way of the sky.' In i, 24, 8, Varuṇa is spoken of as having shaped a wide path for the sun to traverse in the untraversable sky, in v, 85, 2 as having set him in the sky, and in vii, 87, 1 as having cut out his path. 'Lifting on high' is an idea opposed to the Indian conception of the sky. Max Müller's explanation, therefore, cannot be correct. So the above is the only construction possible, unless नाक were taken to mean the sun, with Sāyaṇa who in this follows Yāska.— Geldner, Ved. St. iii., p. 4–5. ]

---

[1] L's N. I. V., p. 533.

4. द्विता. This seems to mean 'and also' here. 'Apart,' Max Müller. Roth makes the word a particle of asseveration ( = Gr. $\delta\eta\tau\alpha$ ). Grassmann connects the two meanings. 'A particle of emphasis, in some such sense as that in which we repeat a statement to denote that it is absolutely certain.' [ See note 4 on vii, 28, 4, above. Geld. takes the word here in the first of the senses given by him. ]

5. पप्रथश्च भूम. This is, as Sāyaṇa takes it, a clause by itself as the accent of the verb shows ( Ludwig ).[1]

Verse 2

*Padapāṭha* :

उत स्वयां तन्वां सम् वदे तत् कदा नु अन्तः वरुणे भुवानि । किम् मे हव्यम् अहृणानः जुषेत कदा मृळीकम् सुऽमनाः अभि ख्यम् ॥ २

*Sāyaṇa* :

वरुणं शीघ्रं दिदृक्षमाण ऋषिरनया वितर्कयति । उतेति विचिकित्सायाम् । उत किं स्वया तन्वा स्वीयेनात्मीयेन शरीरेण सं वदे सहवदनं करोमि । आहोस्वित् तत्तेन वरुणेन सह संवदे । कदा नु कदा खलु वरुणे देवेऽन्तर्भुवानि अन्तर्भूतो भवानि । वरुणस्य चित्ते संलग्ना भवानीत्यर्थः । अपि च मे मदीयं हव्यं स्तोत्रं वरुणस्य चित्ते संलग्नो भवानीत्यर्थः । अपि च मे मदीयं हव्यं स्तोत्रं हविर्वा अहृणानः अक्रुध्यन् वरुणः किं केन हेतुना जुषेत सेवेत । सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन्काले मृळीकं सुखयितारं वरुणमभि ख्यम् अभिपश्येयम् ॥

[ *Notes* :

1. उत स्वया तन्वा[2] सं वदे तत. 'And I muse thus with myself.' With तनु in the sense of self we may compare the Homeric use of $\alpha\upsilon\tau o\upsilon\varsigma$ 'themselves' for bodies, Iliad, I. 4.

2. कदा [3]न्वन्त[4]र्वरुणे भुवानि. 'When shall I stand before Varuṇa ?' The words themselves here would, of course, bear

---

[1] M's V. G. S., App. III, 19 A. a. ( p. 466 ).

[2] tanúā–Lanman; Arnold's Ved. Met., 14. iii. ( p. 5 ).

[3] nú antár–Lanman; Arnold's Ved. Met., 14, iii ( p. 5 ). Av. antar–within.

a reference to absorption, with Varuṇa, but the context seems to point clearly to the simpler meaning. 'How can I get unto Varuṇa?' Max Müller. 'How can I get near Varuṇa?' Siebenzig Lieder. 'When shall I be united (in friendship) with Varuṇa?' Ludwig. 'When shall I be united with Varuṇa?' Grassmann.

कदा मृळीकं सुमना अभि ख्यम्. 'When shall I, glad at heart, see him propitiated'. मृळीकं and सुमनाः are the complements of each other (Ludwig). Or मृळीकम् may, as Roth and Grassmann take it, mean his mercy.

Verse 3

*Padapāṭha* :

पृच्छे तत् एनः वरुण दिदृक्षु उपोइति एमि चिकितुषः विऽपृच्छम् । समानम् इत् मे कवयः चित् आहुः अयम् ह तुभ्यम् वरुणः हृणीते ॥ ३

*Sāyaṇa* :

हे वरुण तदेनः पापं त्वां पृच्छे पृच्छामि । दिदृक्षु । छान्दसः सुलोपः । द्रष्टुमिच्छन्नहम् । येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि । पृष्टः सन् तत्पापं कथय । अहं विपृच्छं विविधं प्रष्टुं चिकितुषः विदुषो जनानुपो[1] एमि उपागाम् । ते कवयश्चित् क्रान्तदर्शिनो जनाश्च मे मह्यं समानमित् समानमेव एकरूपमेव आहुः अकथयन् । यदाहुस्तदाह । हे स्तोतः तुभ्यमयं ह अयमेव वरुणो हृणीते क्रुध्यतीति । अतः क्रोधं परित्यज्य अस्मान्पाशेभ्यो मोचय ।

*Notes* :

1. दिदृक्षुर्. A Vedic sandhi preserved in the written text. Below, verse 4, we have in तुर इयाम्, which must be pronounced तुरेयाम्, a similar sandhi, which has been corrected in the written text. Compare notes 1 and 4 on No. 6, verse 5, and the note on verse 9 of No. 6 [ 'But since desiderative adjectives are oxytone (अन्तोदात्त), perhaps दिदृक्षु is an adverb with recessive accent.'— Noun-inflection. Ludwig believes दिदृक्षु here to be a locative plural of an adjective दिदृश् [ seer ] and that it corresponds to चिकितुषः in the following line. Thus case-form,

[1] 'pa (Arnold).

stem-form and construction ( cf. Germ. bei Jemand antragen ) are entirely regular.— Lanman, Sk. Reader, 372 b ].

2. विपृच्छम्. A Vedic infinitive, Whitney, para 970 a.[1]

[ 3. Every illness according to the view of the Vedic people is incurred as punishment for some wrong done. Especially does it owe its origin to sin against Varuṇa and his ordinances. Vasiṣṭha troubled with dropsy implies this plainly in R̥. V. vii, 86, 3— Zimmer Altindisches Leben, p. 394. ]

## Verse 4

*Padapāṭha :*

**किम् आगः आस वरुण ज्येष्ठम् यत् स्तोतारम् जिघांससि सखायम् । प्र तत् मे वोचः दुःऽदभ स्वधाऽवः अव त्वा अनेनाः नमसा तुरः इयाम् ॥ ४**

*Sāyaṇa :*

हे वरुण ज्येष्ठमधिकं किमाग आस । कोऽपराधो मया कृतो बभूव यत् येन आगसा सखायं मित्रभूतं[2] सन्तं स्तोतारं जिघांससि हन्तुमिच्छसि । हे दूळभ दुर्दभ अन्यैर्बाधितुमशक्य स्वधावः तेजस्विन् हे वरुण तदागो मे मह्यं प्रवोचः प्रब्रूहि । एवं सति तस्य प्रायश्चित्तं कृत्वा अनेनाः अपापः सन्नहं तुरः त्वरमाणः शीघ्रः नमसा नमस्कारेण हविषा वा त्वामवेयाम् उपगच्छेयम् ॥

*Notes :*

1. ज्येष्ठम्.[3] The authorities generally follow Sāyaṇa in taking this word with आगः. Ludwig admits that construction, but prefers to take it as accusative after जिघांससि in the next pāda. But Vasiṣṭha is to be understood as asking what sin he had committed, so great that the god is going to slay his praiser and friend.

[ 2. स्वधावः. See Whitney, para. 454 b. ][4]

3. तुर इयाम्. [5] See note 1 on the last verse.[6]

---

[1] M's V. G. S., para 167, 2a ( p. 194 ).

[2] Hopkin's Rel. Ind. p. 72,

[3] jyāyiṣṭham-Arnold's Ved. Met., p. 310; § 14. iv. p. 5.

[4] Lanman's N. L. V., pp. 519-20; M's V. G. S., para 90. 3.

[5] 'Pronounce with elision and combination tureyām'—Lanman.

[6] '4d emendation is required, perhaps tareyam from tar, tu but see §§ 130 i, 151 iii—Arnold's Ved. Met., pp. 310, 79, 101.

Verse 5

*Padapāṭha* :

अव॑ द्रुग्धानि॑ पित्र्या॑ सृज॒ न॒: अव॑ या व॒यम् च॒कृम त॒नूभि॑: । अव॑ रा॒जन् प॒शुऽतृप॑म् न ता॒युम् सृज व॒त्सम् न दाम्न॑: वसि॑ष्ठम् ॥ ५

*Sāyaṇa* :

हे वरुण पित्र्या पितृतः प्राप्तानि नोऽस्मदीयानि द्रुग्धानि द्रोहान् बन्धनहेतुभूतानव सृज विमुञ्च अस्मत्तो विश्लेषय। वयं च या यानि द्रोहजातानि तनूभि: शरीरैश्चकृम कृतवन्तः स्म तानि च अव सृज । हे राजन् राजमान पशुतृपं न तायुं स्तेन्यप्रायश्चित्त कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव दाम्नो रज्जोर्वत्सं न वत्समिव च वसिष्ठं मां बन्धकात्पापादव सृज विमुञ्च ॥

*Notes* :

1. या वयं चकृमा तनूभिः. 'Which we *ourselves* have done.' Compare above note on स्वया तन्वा, verse 2.

2. पशुतृपं न तायुम्[1] Sāyaṇa's explanation of this simile refers it to the sign that atonement ( Prāyaścitta ) has been accepted. The person making atonement, at the end of the service, offers a wisp of hay to a cow. If the cow takes the hay the atonement has been accepted by the gods, and he may go in peace. If she does not, his atonement has been rejected. 'Loose me as one looses a thief who has made atonement.' I cannot say whether this is right. The word पशुतृप् does not occur elsewhere, and except that Yama's hounds are thrice called असुतृप: 'not easily satisfied' ( x, 14, 12 ; 82, 7 ; 87, 14 ) we have no other compound with तृप्. Roth ( followed by Grassmann ), takes पशुतृप् to mean eager for cattle, *i. e.*, who has stolen cattle or tried to steal them, and is therefore bound ( an den Heerden sich gütlich thuend d. h. dort zugreifend, P. W. B. ; rinderlustigen Dieb, S. L., Grassmann ). Similarly M. M. 'a thief who has feasted on stolen cattle.' This is awkward, as making the simile refer to the binding and not to the loosing. But that need not be a fatal objection. 'Loose me, who am bound like a cattle reiver or a calf.'

[ तृप्, steal, not actually occurring in verbal forms, but rendered probable by the deriv. तृपु, 'thief,' the compounds असु– and पशु– and by the √ Avestan trif, 'steal'— Lanman, Reader, 165.

[1] Av. tāyu–thief ( Jackson's Av. R. ).

तृप् is the same as the Gr. τρέπω. In the comparison the case of पशुतृप् ताय which should have been the Nom. has been attracted to that of वसिष्ठम्. Otherwise, apart from the not very flattering comparison of Vasiṣtha to a cattle-stealer and a calf, the passage, if interpreted literally, would not make much sense. The sense then is 'release Vasiṣṭha as a cattle-stealer (releases) the calf from the rope.'— Pischel, Ved. St., i. 106. ]

3. दाम्नः. Pronounce dā-ma-naḥ.

Verse 6

*Padapāṭha* :

न सः स्वः दक्षः वरुण ध्रुतिः सा सुरा मन्युः विऽभीदकः अचित्तिः । अस्ति ज्यायान् कनीयसः उपऽअरे स्वप्नः चन इत् अनृतस्य प्रऽयोता ॥ ६

*Sāyaṇa* :

हे वरुण स स्वो दक्षः पुरुषस्य स्वभूतं बलं पापप्रवृत्तौ कारणं न भवति । किं तर्हि । ध्रुतिः स्थिरा उत्पत्तिसमय एव निर्मिता दैवगतिः कारणम् । ध्रु गतिस्थैर्ययोरिति धातुः । सा च ध्रुतिः वक्ष्यमाणरूपा । सुरा प्रमादकारिणी । मन्युः क्रोधश्च गुर्वादिविषयः सन् अनर्थहेतुः । विभीदकः द्यूतसाधनोऽक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । अचित्तिः अज्ञानमविवेककारणम् । ईदृशी दैवक्लृप्तिरेव पुरुषस्य पापप्रवृत्तौ कारणम् । अपि च कनीयसः अल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तौ उपारे उपागते समीपे नियन्तृत्वेन स्थितः ज्यायानधिकः ईश्वरोऽस्ति । स एव तं पापे प्रवर्तयति । तथा चाम्नातम् । एष ह्येवासाधु कर्म कारयति तं यमधो निनीषतीति ( Kau. Up. iii 8 ) । एवं च सति स्वप्नश्चन स्वप्नोऽपि अनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति । इदिति पूरकः । स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायन्ते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यन्त इति । अतो ममापराधो दैवागत इति हे वरुण त्वया क्षन्तव्य इति भावः ॥

*Notes* :

1. स्वः. 'My own'.

2. ध्रुतिः This word occurs nowhere else. The verb ध्रुवति is given in one recension of Naight. ii, 14, as one of 122 words all meaning to go. Further, in the Dhātupāṭha, as

Sāyaṇa notes, the verb is said to mean to go and to be firm. Sāyaṇa puts these two meanings together and makes ध्रुति mean the settled course of fate. It seems better to accept this, which may be in part a traditional explanation of the passage, than to say with Roth that ध्रुतिः means temptation. The alternative is to confess that the word has no meaning for us.

3. अस्ति ज्यायान्कनीयस उपारे. This is perhaps an insoluble puzzle. उपारे is a word which occurs nowhere else. Roth does not accept Sāyaṇa's explanation of it, but takes it to mean Verfehlung, error ( so also Grassmann, Unrecht, Verirrung ). He gives the same meaning to उपारण in viii, 32, 21 the only place where that word occurs. अतीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब— Sāyaṇa, हे इन्द्र मन्युषाविणं क्रोधेन सोमं सुन्वन्तं अतीहि अतिगच्छ । तथा उपारणे । ब्राह्मणा उपेत्य यस्मिन्देशे न रमन्ते स उपारणः । तस्मिन्देशे सुषुवांसं सुन्वतं अतीहि । इमं रातं ब्राह्मणोपद्रवरहिते देशे अस्माभिर्दत्तमिमं सुतं सोमं पिब. The following explanations of the present passage have been offered. 'The older man is there to injure, to offend, to mislead the young,' Max Müller. 'The stronger perverts the weaker,' Muir. 'The weak sinner succumbs to the stronger,' S. L. 'The young man's fault o'ermasters the old man,' Grassmann. Lastly, Ludwig thinks it evident ( es versteht sich ) that ज्यायान् here is Varuṇa, Ludwig's idea is ingenious, and may be correct, but it can hardly be said to be evident. ( Ludwig is wrong in giving पापप्रवृत्तौ as Sāyaṇa's explanation of उपारे. Sāyaṇa paraphrases that word by उपागते ).

[ The root *ar* in the sense of hurting is distantly connected with the root *mar* . . . In the Veda *ar* has the sense of offending or injuring, particularly if preceded by *upa* . . . Hence *upāra*, injury. . . *Ari*, enemy, too, is best derived from this root. . . From this root *ar*, to hurt, *arvan*, hurting, as well as *arus*, wound, are derived in the same manner as both *dhanvan* and *dhanus*, bow, from *dhan* ; *yajvan* and *yajus*, from *yaj* ; *parvan* and *parus* from *par*.— Ved. Hymns, I, pp. 65-6.

4. स्वप्नश्चन etc. 'Even sleep does not remove all evil'. In this passage I formerly took चन as affirmative, not as negative, and therefore assigned to प्रयोता the same meaning which Sāyaṇa assigns to it, one who brings or mixes, whereas it ought to be, as rightly seen by Roth, one who removes–Müller, Ved. Hymns, I, pp. 267.

स्वस्मात्स्थानान्न विभक्तः पृथक्कृतो न भवति, Sāy. on न प्रयायत् in viii, 31, 17. ]

Verse 7

*Padapāṭha* :

अरंम् दासः न मीळ्हुषें कराणि अहम् देवायं भूर्णये अनांगाः । अचेंतयत् अचितंः देवः अर्यः गृत्संम् राये कविऽतंरः जुनाति ॥ ७

*Sāyaṇa* :

मीळहुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणाय अनागाः तत्प्रसादादपापः सन्नहम् अरम् अलं पर्याप्तं कराणि परिचरणं करवाणि । दासो न । यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी स च देवः अचितः अजानतोऽस्मानचेतयत् चेतयतु प्रज्ञापयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवः राये धनाय धनप्राप्त्यर्थं जुनाति [1] जुनातु प्रेरयतु ॥

*Notes* :

1. अरं ... कराणि. 'I will serve.'

2. भूर्णये. 'Mighty, impetuous.' The word is often so explained. Ludwig thinks the words दास and अनागाः, as also मीळ्हुषे and भूर्णये, are strongly opposed here, so that the meaning is 'though now freed from sin I will nevertheless serve as a slave to the angry god as if he were a merciful one.' But this is to completely pervert Vasiṣṭha's meaning. While conscious of sin he could not so much as come into Varuṇa's presence. And मीळ्हुषे does not mean 'as if he were merciful ( wie einem gütigen ).' Varuṇa is merciful even to the sinner : यो मृळयाति चक्रुषे चिदागः, vii, 87, 7.

3. अर्यः. Grassmann takes this as an acc. pl. 'Who are his faithful ones.' Roth, who follows Sāyaṇa in taking it with देवः, makes it mean 'kindly, beneficent.' On vii, 64, 3, where also it is an epithet of Varuṇa, Sāyaṇa takes it to be a synonym of Aryaman.

Verse 8

*Padapāṭha* :

अयम् सु तुभ्यंम् वरुण स्वधाऽवः हृदि स्तोमंः उपंऽश्रितः चित् अस्तु । शम् नः क्षेमें शम् ऊंइतिं योगें नः अस्तु यूयम् पात स्वस्तिऽभिंः सदां नः ॥ ८

---

[1] M's V. G. S., App. I, √ Jū. ( p. 384 ).

*Sāyaṇa* :

एकादशिने वारुणे पशौ अयमिति पुरोडाशस्यानुवाक्या । सूत्रितं च अयं सु तुभ्यं वरुण स्वधाव एवा वन्दस्व वरुणं बृहन्तमिति ( Āśv. Śr. Sū. iii, 7 ) ॥

हे स्वधावः अन्नवन्वरुण तुभ्यं त्वदर्थं क्रियमाणोऽयं एतत्सूक्तात्मकं स्तोमः स्तोत्रं हृदि त्वदीयं हृदये सु सुष्ठु उपश्रितः उपगतः समवेतोऽस्तु । चिदिति पूरकः । अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः । नोऽस्मदीये क्षेमे रक्षणे शमुपद्रवाणां शमनमस्तु । योगे च नोऽस्मदीये प्रापणे शमु शमनमेवास्तु उपद्रवाणाम् । हे वरुणादयो देवा नोऽस्मान् सर्वदा स्वस्तिभिरविनाशैः पात रक्षत ॥

*Notes* :

1. शं नः, etc. See note 4 on No. 20, verse 1.
2. क्षेमे and योगे. See note 5 on No. 20, verse 3.

[ M. M. and Lanman agree with Sāy. ]

## No. 25

*Maṇḍala* VII *Sūkta* 88

*Sāyaṇa* :

प्र शुन्ध्युवमिति सप्तर्चमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम् । प्रशुन्ध्युवमित्यनुक्रान्तम् । गतो विनियोगः ॥

[ *Note* :

Verses 4–6 translated in Muir's Sanskrit Texts, V, p. 67. ][1]

### Verse 1

*Padapāṭha* :

**प्र शुन्ध्युवम् वरुणाय प्रेष्ठाम् मतिम् वसिष्ठ मीळ्हुषे भरस्व । यः ईम् अर्वाञ्चम् करते यजत्रम् सहस्रऽमघम् वृषणम् बृहन्तम् ॥ १**

*Sāyaṇa* :

ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियुङ्क्ते । हे वसिष्ठ त्वं मीळ्हुषे सेक्त्रे वरुणाय शुन्ध्युवं शोधयित्रीं यद्वा स्वत एव शुद्धां प्रेष्ठां प्रियतमां मतिं मननीयामीदृशीं स्तुतिं प्र भरस्व प्रहर प्रापय । यो वरुणः ईमेनं सूर्यमर्वाञ्चमस्मदभिमुखं करते अन्तरिक्षे करोति तस्मै वरुणायेत्यन्वयः । कीदृशं सूर्यम् । यजत्रं यष्टव्यं सहस्रामघं बहुधनं वृषणं कामानां वर्षकं बृहन्तं महान्तम् ॥

---

[1] Annotated in Lanman's Sanskrit Reader, p. 373.

[ *Notes* :

1. प्रेष्ठाम्र. Read प्रय्-इष्ठाम्र ( Lanman ).[1]
2. करते.[2] Root Aor. subj. ( Whitney. 836 a ). ]

Verse 2

*Padapāṭha* :

अधं नु अस्य संऽदृशंम् जगन्वान् अग्नेः अनींकम् वरुंणस्य मंसि । स्वंः यत् अश्मंन् अधिऽपाः ऊंइतिं अन्धंः अभि मा वपुंः दृशयें निनीयात् ॥ २

*Sāyaṇa* :

अधाधुना अस्य वरुणस्य संदृशं संदर्शनं नु क्षिप्रं जगन्वान् गतवानहमग्नेरनीकं ज्वालासंघं मंसि[3] स्तवानि। तं वरुणं यष्टुमिति शेषः । यद्यदा वरुणः स्वः सुखकरमश्मन् अश्मनि अभिषवार्थे पाषाणे अवस्थितमभिषुतमित्यर्थः । ईदृशमन्धः सोमलक्षणमन्नमधिपाः आधिकं पाता भवेत् । छान्दसः षष्ठ्यभावः । उ इति पूरकः । तदानीं मा मां वपुः शरीरं स्वकीयम् । वपुरिति रूपनाम । प्रशस्तं रूपं वा दृशये दर्शनार्थम् अभि निनीयात् अभिप्रापयेत् ॥

*Note* :

This verse is not intelligible to me. I give the explanations which so far as I know, have been hazarded. The translation in the Siebenzig Lieder runs as follows : 'When I am lost in his gaze, then his face seems to me like glowing fire, so does the Lord in heaven let me see the glory of the light and of the dark.' Roth gives : 'When the Lord in heaven brings before my eyes the light and the dark, a wonder to see' as the literal translation of the second clause. 'Varuṇa,' he adds, 'appears in the light of the sky as well by night as by day.' Grassmann follows the Siebenzig Lieder for the first half of the verse translating more literally, 'Now that I am come into his presence, Varuṇa's face seems to me like that of fire.' He goes on : 'May the Lord bring for me to see that which displays itself so fair as light and dark in heaven.' Ludwig translates : 'And now that I am come into his presence I will praise Varuṇa's face of fire, that he may bring the

[1] Arnold's Ved. Metre, p. 5, § 14 iv.
[2] M's V. G. S., p. 375.
[3] M's V. G. S., App. I, √ man ( p. 404 ); Sk. √ man = Av. √ man.

light in heaven, he who is lord also of the darkness, the beautiful light for me to see.' I think Ludwig is right in holding that यत्... निनीयात् must mean 'that he may bring.'[1] Roth gives two other passages, where अन्धः means darkness in the Ṛgveda. i, 94, 7 रात्र्याश्चिदन्धो अति देव पश्यसि— Sāyaṇa, अन्धः बहुलमन्धकारम्. i, 62, 5 वि वरुषसा सूर्येण गोभिरन्धः— Sāyaṇa, अन्धः अन्धकारम्. In the sense which Sāyaṇa gives to it here the word is common ( Gr. *αυθος* ). For the meaning heaven ascribed to अश्मन् here Roth gives no authority. The word is said to mean that in Zend.

Verse 3

*Padapāṭha* :

**आ यत् रुहावं वरुणः च नावम् प्र यत् समुद्रम् ईरयाव मध्यम् । अधि यत् अपाम् स्नुऽभिः चराव प्र प्रऽईङ्खे ईङ्खयावहै शुभे कम् ॥ ३**

*Sāyaṇa* :

यद्यदा वरुणे प्रसन्ने सति अहं वरुणश्चोभौ नावं द्रुममयीं तरणसाधनभूतामारुहाव उभावारूढावभूव । तां च नावं यद्यदा समुद्रं मध्यं समुद्रस्य मध्यं प्रति प्र ईरयाव प्रकर्षेण गमयाव । यद्यदा च अपामुदकानामधि उपरि स्नुभिः गन्त्रीभिः अन्याभिरपि नौभिश्चराव वर्तावहै तदानीं शुभे शोभार्थं प्रेङ्खे नौरूपायां दोलायामिव प्र ईङ्खयावहै निम्नोन्नतैस्तरङ्गैरितश्चेतश्च प्रविचलन्तौ संक्रीडावहै । कमिति पूरकः । यद्वा क्रियाविशेषणम् । कं सुखं यथा भवति तथेत्यर्थः ॥

*Notes* :

1. What kind of voyage is meant is not clear. Compare Roth's note in the Siebenzig Lieder on the whole hymn. 'The kernel of the hymn lies in verses 3 to 6. The singer believes that he has been forsaken by his helper Varuṇa : with anguish he remembers his communion with the god in former times. In a vision he sees himself translated into Varuṇa's realm, he goes sailing with the god, is called to be ṛṣi or holy singer to the god, and is in his palace with him. Now Varuṇa has withdrawn his favour, yet let him have mercy on his singer, and not punish him so grievously for his sins. The hymn perhaps originally closed with verse 6.'

Delbrück says that the boat of verses 3 and 4 is the sun.

---

[1] M's V. G. S., p. 395.

[ 2. स्नुभिः Pronounce सानुभिः ( Lanman ). ][1]

Verse 4

*Padapāṭha* :

वसिष्ठम् ह वरुणः नावि आ अधात् ऋषिम् चकार सुऽअपाः महःऽभिः । स्तोतारम् विप्रः सुदिनऽत्वे अह्नाम् यात् नु द्यावः ततनन् यात् उषसः ॥ ४

*Sāyaṇa* :

एवं वसिष्ठेनात्मनोक्ते यद्वरुणेन कृतं तद्दर्शयति । वसिष्ठं ह वासिष्ठं खलु वरुणो नावि स्वकीयायामा अधात् आरोहयत् । तथा तमृषिमवोभी रक्षणैः स्वपां स्वपसं[2] शोभनकर्माणं चकार वरुणः कृतवान् । अपि च विप्रो मेधावी वरुणः अह्नां दिवसानां मध्ये सुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र स्तोतारम् । अस्थापयदिति शेषः । किं कुर्वन् । यात् यातो गच्छतो यावो दिवसान् यात् यातीः उषासः उषसोपलक्षिता रात्रीश्च नु क्षिप्रं ततनन् सूर्यात्मना विस्तारयन् ॥

*Notes* :

1. स्वपा महोभिः. ' Sāyaṇa reads स्वपामवोभिः instead of स्वपा महोभिः '— Max Müller, Varietas Lectionis. The explanation in the commentary does not, as Ludwig thinks, lend any support to the theory that a final 'm' may disappear before a following 'm'.

[ 2. यात्. The conjunction यात् ( so long as ) is an ablative form ( of यत् ) according to the ordinary declension. ( Whitney, 509 a ).

3. ततनन्.[3] This and मुमोचत् below are regular Perf. Subj. ( Whitney, 810 a ). ]

Verse 5

*Padapāṭha* :

क्व त्यानि नौ सख्या बभूवुः सचा अवहेइति यत् अवृकम् पुरा चित् । बृहन्तम् मानम् वरुण स्वधाऽवः सहस्रऽद्वारम् जगम गृहम् ते ॥ ५

---

[1] 'Sānubhiḥ § 151, iii '—Arnold's Ved. Met., pp. 310, 101. For the cæsura in 3d, see § 205 iv a—Arnold's Ved. Met., p. 179.

[2] Lat. *opus*.

[3] M's V. G. S., p. 385.

*Sāyaṇa* :

हे वरुण त्यानि तानि पुरातनानि नौ आवयोः सख्या सख्यानि सखित्वानि क कुत्र बभूवुः । पुरा पूर्वस्मिन् काले अवृकम् अहिंस्यमात्यन्तिकं यत्सख्यमास्ति तत्सचावहे आवाम् सेवावहे । चिदिति पूरकः । अपि च हे स्वधावः अन्नवन्वरुण ते त्वदीयं गृहं जगम गच्छानि । लोडर्थे लिट् । कीदृशं गृहम् । बृहन्त महान्तं मानम् । मान्त्यस्मिन् सर्वाणि भूतानीति मानम् । सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः । सहस्रद्वारं बहुद्वारम् ॥

[ *Notes* :

1. क, सख्या. Pronounce kua, sakhiā ( Lanman ).

2. सचावहे, &c. ' We seek the harmony which ( we enjoyed ) of old ' ( Muir, V ). ' ( Where are now our friendships, ) the tranquillity which we enjoyed of old ' ( Muir, i. ). ' When we walked together without hate. ' ( S. L. ). For the sense of the tense in the last explanations see Whitney, 778 a. ]

Verse 6

*Padapāṭha* :

**यः आपिः नित्यः वरुण प्रियः सन् त्वाम् आगांसि कृणवंत् सखा ते । मा ते एनस्वन्तः यक्षिन् भुजेम यन्धि स्म विप्रः स्तुवते वरूथम् ॥ ६**

*Sāyaṇa* :

हे वरुण यो वसिष्ठो नित्यः [1] ध्रुव आपिर्बन्धुः औरसः पुत्र इत्यर्थः । यः पूर्वं प्रियः सन् त्वां प्रति आगांसि अपराधान् कृणवत् अकरोत् । स इदानीं ते तव सखा समानख्यानः प्रियोऽस्तु । हे यक्षिन्यजनीय वरुण ते तव स्वभूता वयम् एनस्वन्तः एनसा पापेन युक्ताः सन्तो मा भुजेम मा भुज्महि । त्वत्प्रसादात्पापरहिता एव सन्तो भोगान् भुनजामहै । विप्रो मेधावी त्वं च स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वरूथमनिष्टनिवारकं वरणीयं वा गृहं यन्धि[2] प्रयच्छ । स्मेति पूरकः [3] ॥

[ *Notes* :

1. यः. An anacoluthon. ( Lanman ).

---

[1] nitya-' own '- § 85B ( 59 ) mentioned among words characteristic of the Ṛgveda proper—Arnold's Ved. Met., p. 33.

[2] M's V. G. S., App. I, √ yam., p. 409.

[3] ' 6c probably requires correction '—Arnold's Ved. Met., p. 310.

2. यक्षिन्. यक्ष *n.* = anything wonderful, anything extraordinary, magic, sorcery. यक्षिन् therefore, = magician.—Geldner Ved. St. iii, 126-143. ]

Verse 7

*Padapāṭha* :

ध्रुवासुं त्वा आसु क्षितिषुं क्षियन्तंः वि अस्मत् पाशंम् वरुंणः मुमोचत् । अवंः वन्वानाः अदिंतेः उपऽस्थात् यूयम् पात स्वस्तिऽभिंः सदां नः ॥ ७

*Sāyaṇa* :

अत्र ऋग्विधानम् ।

ध्रुवासु त्वासु क्षितिषु जपन् बन्धात्प्रमुच्यते ।
तिष्ठन्रात्रौ जपेदेतां पिशाचस्तं न गच्छति ॥

( Ṛgvidhāna, ii, 26 )

ध्रुवासु नित्यासु दृश्यमानासु क्षितिषु[1] भूमिषु क्षियन्तः निवसन्तो वयं हे वरुण त्वा त्वाम् । स्तुम इति शेषः । स च वरुणोऽस्मदस्मत्तः पाशं बन्धकं पापं वि मुमोचत् मोचयेत् । तथा अदितेः अखण्डनीयायाः पृथिव्याः उपस्थादुपस्थानात् अवः रक्षणं वरुणेन दत्तं वन्वानाः संभजमाना वयं स्याम । अन्यद्गतम् ॥

*Note* :

For the anacoluthic construction compare perhaps No. 10, verse 5. Roth would transpose the second and third lines.

---

## No. 26

*Maṇḍala* VII *Sūkta* 89

*Sāyaṇa* :

मो षु वरुणेति पञ्चर्चमेकोनविंशं सूक्तं वारुणम् । अन्त्या जगती[2] शिष्टाश्चतस्रो गायत्र्यः । तथा चानुक्रान्तम् । मो षु पञ्च गायत्रं जगत्यन्तमिति । गतो विनियोगः ॥

---

[1] 'kṣiti-' dwelling'-§ 85 B ( 27 ) mentioned among ' words characteristic of Ṛgveda proper '—Arnold's Ved. Met., p. 33.

[2] This stanza is not a part of the hymn. The stanza is an oftrecurring one.'-Schroeder; Manu xi, 253; Ṛg-vidhāna, ii, 29, 1. ( Lanman's S. R. ).

[ *Note* :

Translated in Max Müller's A. S. L., p. 540, and Muir's Sanskrit Texts, V, p. 67. ][1]

Verse 1

*Padapāṭha* :

मोइतिं सु वरुण मृत्ऽमयंम् गृहम् राजन् अहम् गमम्
मृळ सुऽक्षत्र मृळयं ॥ १

*Sāyaṇa* :

हे राजन्नीश्वर वरुण त्वदीयं मृन्मयं मृदादिभिर्निर्मितं गृहं मो[2] मा उ मैव अहं गमं गतोऽस्मि । अपि तु सुशोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्नवानि । स त्वं मां मृळ सुखय । ह सुक्षत्र शोभनधन वरुण मृळय[3] उपदयां च कुरु ॥

[ *Note* :

मृन्मयं गृहम्. 'The grave.' The dead body was either consigned to the flames or laid away to gentle rest in the mother earth. Cf. x, 18, 10 ( उपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् । ), 12 and 13. 'May he not become a dweller in the house of earth' is uttered over a sick person ( A. V. 5, 30, 14. ) ][4]

Verse 2

*Padapāṭha* :

यत् एमिं प्रस्फुरन्ऽइंव दृतिः न ध्मातः अद्रिऽवः । मृळ
सुऽक्षत्र मृळयं ॥ २

*Sāyaṇa* :

हे अद्रिवः आयुधवन्वरुण यद्यदा प्रस्फुरन्निव शैत्येन प्रविचलन्निव त्वद्भयाद्वेपमानः दृतिर्न दृतिरिव ध्मातो वायुना पूर्णः सन् त्वया बद्धोऽहमेमि गच्छामि । तदानीं मृळ सुखय । हे सुक्षत्र सुधन मृळय उपदयांकुरु ॥

---

[1] Annotated in Lanman's Sanskrit Reader, p. 373-74.

[2] mā́ sū́-Arnold.

[3] 'for mṛḷaya always mṝḷaya,'—Arnold's Ved. Met., § 14, v. ( p. 5 ).

[4] See Ragozin's Vedic India, p. 353.

[ *Notes* :

अद्रिवः [1] This epithet is used always of Indra except here ].

Verse 3

*Padapāṭha* :

**क्रत्वः समह दीनता प्रतिऽईपम् जगम शुचे । मृळ सुऽक्षत्र मृळय ॥ ३**

*Sāyaṇa* :

हे समह सधन शुचे स्वभावतो निर्मल वरुण दीनता दीनतया[2] अशक्ततया क्रत्वः कर्मणः कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य प्रतीपं प्रतिकूलमननुष्ठानं जगम प्राप्तवानस्मि । अत एव त्वया बद्धः । तादृशं मृळ सुखय । अन्यद्गतम् ।

Verse 4

*Padapāṭha* :

**अपाम् मध्ये तस्थिऽवांसम् तृष्णा अविदत् जरितारम् । मृळ सुऽक्षत्र मृळय ॥ ४**

*Sāyaṇa* :

अपां समुद्राणामुदकानां मध्ये तस्थिवांसं स्थितवन्तमपि जरितारं तव स्तोतारं मां तृष्णा पिपासा आविदत् आप्तवती लवणोत्कटस्य सामुद्रजलस्य पानानर्हत्वात् । अतस्तादृशं मां मृळ सुखय । अन्यद्गतम् ।

Verse 5

*Padapāṭha* :

**यत् किम् च इदम् वरुण दैव्ये जने अभिऽद्रोहम् मनुष्याः चरामसि । अचित्ती यत् तव धर्म युयोपिम मा नः तस्मात् एनसः देव रिरिषः ॥ ५**

---

1 Aronld's Ved. Met., § 84, 11 ( p. 29 ).

2 M's V. G. S., para 97, A. 1 ( p. 77 ).

*Sāyaṇa* :

देवसुवां हविःषु वारुणस्य हविषः यत्किञ्चेदमिति याज्या । सूत्रितं च । यत्किञ्चेदं वरुण दैव्ये जन उप ते स्तोमान्पशुपा इवाकरमिति द्वे इति ( Āśval. iv, 11 ) ॥

हे वरुण दैव्ये देवसमूहरूपे जने यदिदं किञ्चन अभिद्रोहमपकारजातं मनुष्याः वयं चरामसि चरामः । निर्वर्तयामः तथा अचित्ती अचित्त्या अज्ञानेन तव त्वदीयं यद्धर्म धारकं कर्म युयोपिम वयं विमोहितवन्तः हे देव तस्मादेनसः पापान्नोऽस्मान्मा रीरिषः[1] मा हिंसीः ॥

## No. 27

*Maṇḍala* VII. *Sūkta* 102

*Sāyaṇa* :

पर्जन्यायेति तृचं त्रयोदशं सूक्तं गायत्रम् । [2]पूर्ववदृषिदेवते । तथा चानुक्रान्तम् । पर्जन्याय तृचं गायत्रमिति । वैश्वानरपार्जन्यायामन्वारम्भणीयायां पार्जन्यस्य चरोः पर्जन्यायेत्यनुवाक्या । सूत्यते हि पर्जन्याय प्र गायत प्र वाता वान्ति पतयन्ति विद्युत इति ( Āśval. ii, 15 ) ॥

### Verse 1

*Padapāṭha* :

**पर्जन्याय प्र गायत दिवः पुत्राय मीळ्हुषे । सः नः यवसम् इच्छतु ॥ १**

---

[1] M's V. G. S., App. I, √ riṣ. p. 413.

[2] एते कुमार आग्नेयोऽपश्यद्वासिष्ठ एव वेति वक्ष्यमाणत्वादाग्निपुत्रः कुमार ऋषिर्वसिष्ठो वा । इदम् ( Ṛ.V. vii, 101 ) उत्तरं च पर्जन्यदेवत्यं । अत्र शौनकः । आस्यदघ्नं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां नित्य ( vii, 101 ) आदित्याभुपतिष्ठेत भास्करम् । अनश्नंस्तज्जपन्नित्यं वृष्टिकामेन यत्नतः । पञ्चरात्रेऽप्यतिक्रान्ते महतीं वृष्टिमाप्नुयात् ( Ṛgvidhāna, ii, 30 ) Sāy. in introducing Ṛ.V. vii, 101.

*Sāyaṇa* :

हे स्तोतारः पर्जन्याय देवाय प्रगायत प्रकर्षेण स्तोत्रमुच्चारयत । कीदृशाय । दिवः अन्तरिक्षस्य पुत्राय । तत्र हि पर्जन्यः प्रादुर्भवति । मीळ्हुषे सेक्त्रे । स तादृशः पर्जन्यो नोऽस्मभ्यं यवसमोषध्यादिलक्षणमन्नं दातुमिच्छतु ॥

*Note* :

For Parjanya the student should consult Muir, S. T., V, pp. 140–142, and the references to Bühler's paper on that god given there.[1]

Verse 2

*Padapāṭha* :

यः गर्भम् ओषधीनाम् गवाम् कृणोति अर्वताम् । पर्जन्यः पुरुषीणाम् ॥ २

*Sāyaṇa* :

यः पर्जन्यः ओषधीनां व्रीह्यादीनां गवामर्वतामर्वतीनां वडवानां पुरुषीणां नारीणां च यः पर्जन्यो गर्भं प्रसूतिहेतुं बीजमुदकरूपं कृणोति करोति तस्मै पर्जन्यायेत्युत्तरत्र संबन्धः ॥

Verse 3

*Padapāṭha* :

तस्मै इत् आस्ये हविः जुहोत मधुमत्ऽतमम् । इळाम् नः संऽयतम् करत् ॥ ३

*Sāyaṇa* :

तस्मै इत तस्मा एव पर्जन्याय आस्ये देवानामास्यभूते अग्नौ मधुमत्तमं रसवत्तमं हविर्जुहोत जुहुत हे ऋत्विजः । स च पर्जन्यो नोऽस्मभ्यम् इळामन्नं संयतं सम्यक् नियतं यथा भवति तथा करत् करोतु ददात्विति यावत् ॥

*Notes* :

1. आस्ये. 'In his mouth', pour it on the altar for him.

2. संयतम्. 'Uninterrupted', acc. sing. fem. Roth quotes Pāṇ. vi, 4, 40 [ Värtt. 1 ], and compares with other references, ṚV. ix, 62, 3, कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् । इळामस्मभ्यं संयतम् । Sāyaṇa, गवे अस्मभ्यं च संयतं ददमाना संयच्छति तत वरिवः धनं इळाम् अन्नं च, &c.

---

[1] 'RV. VII. 101, 102. The Parjanya hymns shew later linguistic notes, but they are in their order in the collection'—Arnold.

## No. 28

*Maṇḍala* VIII *Sūkta* 30

*Sāyaṇa* :

नहि व इति चतुर्ऋचं दशमं सूक्तम् । आद्या गायत्री द्वितीया पुरउष्णिक् तृतीया बृहती चतुर्थी अनुष्टुप् । मनुर्वैवस्वत ऋषिः । पूर्ववद्विश्वे देवा देवता । तथा चानुक्रान्तम् । नहि वश्चतुष्कं पुरउष्णिक् बृहत्यनुष्टुबन्तामिति[1] । विनियोगस्तु लिङ्गादवगन्तव्यः ॥

[ *Note :*

Translated in Max Müller's A. S. L., p. 531. ]

### Varse 1

*Padapāṭha* :

**नहि वः अस्ति अर्भकः देवासः न कुमारकः । विश्वे सतःऽमहान्तः इत् ॥ १**

*Sāyaṇa* :

हे देवासः देवाः वः युष्माकं मध्ये अर्भकः नह्य[2]स्ति शिशुर्नास्ति खलु । तथा न कुमारकः युष्माकं मध्ये कुमारोऽपि नास्ति किं तु सर्वे यूयं समवयसो नित्यतरुणा भवथ । एतदेव प्रतिपादयति । विश्वे सर्वे देवाः यूयं सतोमहान्त इत । सर्वस्माद्विद्यमानात्पृथिव्यामपि ये महान्तस्ते सतोमहान्त इत्युच्यन्ते तस्माद्युष्माकमर्भकोऽपि कुमारोऽपि नास्तीत्यर्थः ॥

*Notes* : [3]

सतोमहान्त 'Equally great' ( Roth ). The word occurs only here. In vi, 75, 9, we have the similar compound सतोवीराः 'equally bold'. Sāyaṇa, सतोवीराः प्राप्तवीर्याः । तथा च यास्कः तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवतीति सतः संसृतं भवतीति. Naigh. ii, 29 ; Nir. iii, 20. [ From स = similar. ]

---

1 See Arnold's Vedic Metre § 248, p. 238.

2 M's V. G. S., para 180, *sub voce*, with footnote ( p. 237 ).

3 VIII, 12-31 : 'These collections are almost exclusively in lyric metres. They have every indication of antiquity : but the few dimeter hymns which are included in the collection appear by their smoother rhythm to be later additions. '—Arnold's Vedic Metre, p. 311.

Verse 2

*Padapāṭha* :

इतिं स्तुतासंः असथ रिशादसः ये स्थ त्रयंः च त्रिंशत् च मनोंः देवाः यज्ञियासः २

*Sāyaṇa* :

हे रिशादसः रिशतां हिंसतामत्तारः हे मनोर्यज्ञियासः मनुनामकस्य मम यज्ञार्हा हे देवा ये यूयं त्रयश्च त्रिसंख्याकास्त्रिंशच्च त्रिंशत्संख्याकास्त्रयस्त्रिंशद्देवताः स्थ भवथ अभूत । ते यूयमिति इत्थमनेन प्रकारेण स्तुतासः असथ मया मनुना स्तुता भवथ । अस्तेर्लेटि छान्दसो लुगभावः । यद्वा असथेति कान्त्यर्थः । इत्थं स्तुता यूयं हवींषि कामयध्वम् ॥

*Notes* :

1. रिशादसः See note on No. 1, verse 5.

2. ये स्थ त्रयश्च त्रिंशत च.[1] 'The gods are often described as three and thirty in number. Gods that are eleven in heaven, eleven on earth and eleven in the waters' 1, 139, 11. Compare Muir, S. T., V, p. 9.' Roth in S. L.

3. मनोर्देवा यज्ञियासः.[2] 'Gods worshipped of man.' Compare x, 36, 10 ये स्थ मनोर्यज्ञियाः— Sāyaṇa, हे देवाः ये यूयं मनोर्मनुष्यस्य यज्ञिया यज्ञार्हाः. So Roth, followed by Grassmann and Ludwig. 'Gods worshipped of Manu' is an alternative explanation which is naturally suggested by the phrase पित्र्यान्मानवात् 'of our father Manu' in the next verse. Sāyaṇa's explanation is inconsistent with v. 3. It is a descendant of Manu that is speaking.

Verse 3

*Padapāṭha* :

ते नः त्राध्वम् ते अवत ते ऊँ इतिं नः अधिं वोचत । मा नः पथः पित्र्यात् मानवात् अधिं दूरम् नैष्ट पराऽवतः ॥ ३

---

1 Muir's S. T. sec. i, 2, pp 9-12; T. S. i, 4, 10, 1; Śat. Brā., iv, 5, 7, 2; Ait. Br., ii, 18.

2 For Manu see Macdonell's Vedic Mythology, p. 139; Bloomfield's Rel. Ved., p. 140; Bühler's Introduction in S. B. E. Vol. xxv, p. lvii; for Manu = Cretan Minos see Cox's Mythology of the Aryan Nations, p. 328.

*Sāyaṇa* :

हे देवाः ते यूयं नोऽस्मान् त्राध्वं बाधकेभ्यो रक्षोभ्यः त्रायध्वं ते यूयमवत धनादिप्रदानैरस्मान्रक्षत त एव देवा नोऽस्मानधि वोचत अधिक भवन्तः कर्मकारिणो धनादिमन्तश्च भवन्त्विति यूयं ब्रूत । किंच हे देवाः मानवात् । मनुः सर्वेषां पिता । तत आगतात् पित्र्यात् पिता मनुर्यं मार्गं चक्रे तस्मात्पथो मार्गान्नोऽस्मान्मा नैष्ट । मा नयत । अपनयनं मा कुरुतेत्यर्थः । सर्वदा ब्रह्मचर्याग्निहोत्रादिकर्माणि येन मार्गेण भवति तमेवास्मान्नयत । किं तु दूरं परावतः [1] य एतद्व्यतिरिक्तो विप्रकृष्टमार्गोऽस्ति तस्मादधि । अधिकमित्यर्थः । अस्मानपनयत ॥

*Notes* :

1. ऊ इति. Pān. i, 1, 18.

2. नः अधि वोचत. 'Speak for us.' 'वच् with अधि to speak for, to come to the help of ( with the dative ). ṚV. i, 132, 1 अधि वोचा नु सुन्वते—Sāyaṇa, सुन्वते यजमानाय तदर्थमधिवोच तं हविष्प्रदं यजमानं यज्ञं वा नु क्षिप्रम् अधिकं ब्रूहि. ii, 27, 6 तेनादित्या अधि वोचता नः — Sāyaṇa, अधिवचनं पक्षपातेन वचन कुरुत. vii, 83, 2 ; viii, 20, 26 तेना नो अधि वोचत — Sāyaṇa, अधि वोचत अधिब्रूत चिकित्सतेत्यर्थः. viii, 30, 3 ; viii, 48, 14 ; viii 56, 6 ; x, 63, 11 . . . Compare अधिवक्तृ., अधिवाक' Roth in St. Petersburg Dictionary.

Verse 4

*Padapaṭha* :

ये देवासः इह स्थन विश्वे वैश्वानराः उत । अस्मभ्यम्
शर्म सऽप्रथः गवे अश्वाय यच्छत ॥ ४

*Sāyaṇa* :

हे देवासः देवा उत अपि च वैश्वानराः । विश्वे सर्वे नरः कर्मनेतारोऽध्वर्य्वादयो यस्य स विश्वानरो यज्ञः तस्मिन् सोमादिहवींषि स्वीकर्तुं भवाः प्रादुर्भूताः । भवार्थे-

1 M's V. G. S., para 182, vat, pp. 263–64.

प्रत्ययः । यद्वा । विश्वानरोऽग्निः[1] । देवानां तन्मुखत्वात्तस्य संबन्धिनो विश्वे सर्वे ये देवा यूयम् इह अस्मिन्नस्मदीये यज्ञे स्थन हविष्प्रदातुं भवथ । ततः सप्रथः । प्रथ प्रख्याने । सर्वतः प्रसिद्धं सर्वत्र पृथुतमं वा शर्म । शर्म । सर्वं शृणाति हिनस्ति दुःखमिति शर्म सुखम् । तदस्मभ्यं प्रयच्छत । तथा गवेऽस्मदीयेभ्यो यज्ञसाधनभूतेभ्यो गोभ्यः अश्वाय[2] शर्म सुखम् प्रदत्त ॥

*Notes* :

1. इह. ‘At our sacrifice.’ Roth in S. L.

[ 2. स्थन. Whitney, 549 a. ]

3. ‘Assembled here’ ( S. L. ) ‘And all that are in the world,’ in apposition to the foregoing इह ( Grassmann ).

---

## No. 29

*Maṇḍala* X *Sūkta* 14

*Sāyaṇa* :

परेयिवांसमिति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य [3]यमस्यार्षम् । अङ्गिरसो नः पितरो नवग्वा इति षष्ठ्या अङ्गिरःपित्रथर्वभृगुलक्षणा लिङ्गोक्ता देवताः । प्रेहीत्याद्यास्तिस्रो लिङ्गोक्तदेवताकाः पितृदेवताका वा । अपि द्रव सारमेयावित्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितः स्थितौ तद्देवताकः । शिष्टा यमदेवत्याः । यमाय सोममिति त्रयोदश्याद्या अनुष्टुभः । यमाय मधुमत्तममित्येषा बृहती । आदितो द्वादश त्रिष्टुभः । तथा चानुक्रान्तम् । परेयिवांसं षोळश यमो यामं षष्ठी लिङ्गोक्तदेवता पराश्च तिस्रः पित्र्या वा तृचः श्वभ्यां परा अनुष्टुभो बृहत्युपान्त्येति । गतः सूक्तविनियोगः । महापितृयज्ञे यमयागाख्या याज्या । सूत्रितं च । इमं यम प्रस्तरमा हि सीदेति परेयिवांसं प्रवतो महीरन्विति ( Āśval. ii, 19 ) ॥

[ *Note* :

Translated in Muir's ‘Sanskrit Texts, V, pp. 292-5. ][4]

---

[1] Nir. vii, 6.

[2] Av. aspa.

[3] **Yama**: Muir's S. T. Vol. V, sec. xviii; M's Ved.-Myth., § 77 pp. 171-73; Hopkin's Rel. Ind., pp. 128-150; Bloomfield's Rel. Ved, pp. 105, 250-51; Yama = Av. Yima—Moulten's E. Z., pp. 148, 205 foot-note. Ragozin's Vedic India, p. 181.

[4] Verses 1 to 12 annotated in Lanman's S. R., pp. 377-78: and translated in Ragozin's Vedic India, p. 357.

Verse 1

*Padapāṭha* :

परेयिऽवांसंम् प्रऽवतः महीः अनुं बहुऽभ्यः पन्थांम् अनुऽपस्पशानम् । वैवस्वतम् संऽगमंनम् जनांनाम् यमम् राजांनम् हविषां दुवस्य ॥ १

*Sāyaṇa* :

हे मदीयान्तरात्मन् यजमान वा त्वं राजानं पितॄणां स्वामिनं यमं हविषा पुरोडाशादिना दुवस्य परिचर । कीदृशम् । प्रवतः प्रकृष्टकर्मवतो भूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान्महीः तत्तद्भोगोचितभूप्रदेशविशेषाननु परेयिवांसं क्रमेण मरणादूर्ध्वं प्रापितवन्तम् तथा बहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतार्थे पन्थां स्वर्गस्योचितं मार्गमनुपस्पशानमबाधमानम् । पापिन एव पुरुषान् स्वर्गमार्गबाधेन नरकं प्रापयति न तु पुण्यकृत इत्यर्थः । वैवस्वतं विवस्वतः[1] सूर्यस्य पुत्र जनानां पापिनां संगमनं गन्तव्यस्थानरूपम् ॥

*Notes* :

1. परेयिवांसम्. This is the perfect participle of the simple verb, and cannot have the causal sense which Sāyaṇa attributes to it. 'Him that went.'

2. प्रवतो महीः. 'Along the great heights.' Sāyaṇa's interpretation of प्रवतः here is as purely fanciful as his construction is wrong. The word is a derivative from प्र of the same kind as [ उद्वतः and ] परावतः from [ उद् and ] परा in [ No. 12, verse 7, and ] No. 28, verse 3. Roth compares Ṛ. V. vi, 22, 4 विश्वा रोधांसि प्रवतश्च.

[ The suffix वत् forms feminine abstract nouns from prepositions and adverbs, and the accent is always on the last syllable.— Lindner Altind. Nom.

Cf. तीर्थैस्तरन्ति प्रवतो महीरिति यज्ञकृतः सुकृतो येन यन्ति A. V. xviii, 4, 7; यः प्रथमः प्रवतम् ( Sāy. प्रणवन्तम् ) आससाद बहुभ्यः पन्थामनुपस्पशानः A. V. vi, 28, 3; and यो ममार प्रथमो मर्त्यानां यः प्रेयाय प्रथमो लोकमेतम् । वैवस्वतं संगमनं जनानां यमं ... सपर्यत ॥ A. V. xviii, 3, 13. Yama is the first mortal, the first to reach the other world.

---

[1] Avestan–Vīvaṅhvant; M's Ved. Myth., p. 43; Ragozin's Vedic India, pp. 183–85.

3. अनुपस्पशानम्. अवगच्छन्तमित्यर्थः । स्पशतिर्ज्ञानकर्मा[1] । Sāy. on A. V. xviii. 1, 9. )

4. संगमनं[2] जनानाम् ' Assembler of men ' or ' gatherer of the peoples. ' ]

Verse 2

*Padapāṭha* :

यमः नः गातुम् प्रथमः विवेद न एषा गव्यूतिः अपऽभर्तवै ऊं इति । यत्र नः पूर्वे पितरः पराऽईयुः एना जज्ञानाः पथ्याः अनु स्वाः ॥ २

*Sayaṇa* :

प्रथमः सर्वेषां मुख्यः यमः नोऽस्माकं प्रजानां गातुं शुभाशुभनिमित्तं विवेद जानाति । एषा गव्यूतिर्नापभर्तवा उ । अतिशयज्ञानयोगाद्यमस्य न केनचिदपहर्तुमपनेतुं शक्यत इत्यर्थः । यत्र यस्मिन्मार्गे नोऽस्माकं पूर्वे पितरः परेयुः एना अनेन मार्गेण गच्छन्तो जज्ञानाः जाताः सर्वे स्वाः स्वभूताः पथ्याः स्वकर्ममार्गभूताः अनुगच्छन्ति ॥

*Notes* :

1. गातुम्. ' The way. ' Compare i, 71, 2 चक्रुर्दिवो बृहतो गातुमस्मे — Sāyaṇa, गातुं मार्गम्.

2. एना.[3] For the form see Whitney, 502. Ludwig, who, with Grassmann, derives जज्ञानाः here from ज्ञा would understand एना of Yama.

3. अपऽभर्तवे. For accent see M's V. G. S., app. III., para 7 ( p. 452 ).

Verse 3

*Padapāṭha* :

मातली कव्यैः यमः अङ्गिरःऽभिः बृहस्पतिः ऋक्वऽभिः वावृधानः । यान् च देवाः वावृधुः ये च देवान् स्वाहा अन्ये स्वधया अन्ये मदन्ति ॥ ३

---

[1] Av. √ spaś–watch, observe.

[2] Av. Yima, hañjamanem.

[3] Lanman's N. I. V., pp. 332-33; M's V. G. S., para 178. 3 ( p. 210 ).

*Sāyaṇa* :

अग्निमारुते मातली कव्यैरित्येषा धाय्या । सूत्रितं च । इमं यम प्रस्तरमा हि सीद मातली काव्यैर्यमो अङ्गिरोभिरुदीरतामवर उत्परास इति ( Āśval. v. 20 ) ।

मातली । मातलिरिन्द्रस्य सारथिः । तद्वानिन्द्रो मातली । स च कव्यैः कव्यभागिभः पितृभिः सह वावृधानो[1] वर्धमानो भवति । यमश्चाङ्गिरोभिः पितृविशेषैः सह वर्धमानो भवति । तत्र देवा इन्द्रादयो यांश्च कव्यभागादीन्पितृन्वावृधुर्वर्धयन्ति ये च कव्यभागादयः पितरो देवानिन्द्रादीन्वर्धयन्ति तेषां मध्ये अन्ये इन्द्रादयः स्वाहा मदन्ति स्वाहाकारेण हृष्यन्ति अन्ये पितरः स्वधया स्वधाकारेण हृष्यन्ति ॥

*Notes* :

1. Mātali, or Mātalin, a divine being mentioned only here. The Kavyas, Aṅgirases, are pious races of the old time : the Ṛkvans are the spirits who surround Bṛhaspati.' Roth in S. L. [ अत्र मातलीनाम देवः, Sāyaṇa on corresponding passage of A. V. xviii, i, 47. ]

2. यांश्च देवा वावृधुर्ये च देवान्. That is, the fathers and the gods. The relation of mutual support and nourishment, begun on earth, is continued in heaven.[2]

3. स्वाहा. 'The cry svāhā with which the oblation is offered to the gods.' Roth in S. L. The word is an indeclinable— स्वधया. 'Svadhā, a sweet drink which is offered to the manes.' Roth in S. L. Compare note on No. 5, verse 4.

Verse 4

*Padapāṭha* :

इमम् यम॒ प्रऽस्तरम् आ हि सीद अङ्गिरःऽभिः । पितृऽभिः संऽविदानः । आ त्वा मन्त्राः कविऽशस्ताः वहन्तु एना राजन् हविषा मादयस्व ॥ ४

*Sāyaṇa* :

महापितृयज्ञे यमस्य इमं यमेत्याद्विके द्वे अनुवाक्ये । इमं यम प्रस्तरमा हि सीदेति द्वे ( Āśval. ii, 19 ) इति हि सूत्रितम् । सैषाग्निमारुतेऽपि धाय्या । सूत्रं पूर्वमेवोदाहृतम् ॥

---

[1] vāvṛdhāna–M's V. G. S., p. 421.

[2] For reciprocity between men and gods see Bloomfield's Religion of the Ṛgveda, p. 184; Bhagavadgītā, iii, 11.

हे यम अङ्गिरोभिः एतन्नामकैः पितृभिः संविदानः ऐकमत्यं गतः त्वमिमं प्रस्तर विस्तीर्णं यज्ञविशेषम् आ सीद आगत्योपविश । हि यस्मादेवं तस्मात्कविशस्ताः विद्वद्भिर्ऋत्विग्भिः प्रयुक्ता मन्त्रास्त्वा त्वाम् आ वहन्तु । हे राजन् एना एतेन हविषा तुष्टो मादयस्व यजमानं हर्षय ॥

*Notes* :

[ 1. सीदा°. Read सीदा°. For the accent see Whitney, para. 595e[r]. ]

2. आङ्गिरोभिः[2] पितृभिः. 'With our fathers the Aṅgirases.' The Aṅgirases have just been represented as, among the fathers, special companions of Yama in heaven : It seems a mistake to translate 'Aṅgirases *and* the fathers' as in Grassmann, Ludwig and the S. L. Compare the next verse and verse 6.

## Verse 5

*Padapāṭha* :

**अङ्गिरःऽभिः आ गहि यज्ञियेभिः यमं वैरूपैः इह मादयस्व । विवस्वन्तम् हुवे यः पिता ते अस्मिन् यज्ञे बर्हिषि आ निऽसद्य ॥ ५**

*Sāyaṇa* :

हे यम वैरूपैः विविधरूपयुक्तैः वैरूपसामप्रियैर्वा यज्ञियेभिः यज्ञयोग्यैः अङ्गिरोभिः सह आ गहि आगच्छ । आगत्य च इह अस्मिन्यज्ञे मादयस्व यजमानं हर्षय । यो विवस्वान् ते तव पितास्ति अस्मिन्यज्ञे तं विवस्वन्तं हुवे आह्वयामि । स चास्तीर्णे बर्हिषि आ निषद्योपविश्य यजमानं हर्षयतु ॥[3]

*Notes* :

वैरूपैः[4] 'A sub-division of the Aṅgirases.' Roth in S. L. Does Sāyaṇa's second explanation get any support from a passage like i, 107, 2, अङ्गिरसां सामभिः स्तूयमानाः ?

---

[1] M's V. G. S., App. III. para 19 B (p. 467).

[2] M's Ved. Myth., § 54, pp. 142–43.

[3] "5c catalectic Bhārgavī verse § 227 iii b" Arnold's Ved. Met., p. 318; one of "the Bhārgavī verses with rest at the fifth place and Triṣṭubh cadence"—A's Ved. Met., p. 214.

[4] M's Ved. Myth., § 55. A. pp. 143–44.

## Verse 6

*Padapāṭha* :

अङ्गिरसः नः पितरः नवऽग्वाः अथर्वाणः भृगवः सोम्यासः । तेषाम् वयम् सुऽमतौ यज्ञियानाम् अपि भद्रे सौमनसे स्याम ॥ ६

*Sāyaṇa* :

अङ्गिरसः अङ्गिरोनामकाः अथर्वाणः अथर्वनामकाः भृगवः भृगुनामकाश्च[1] नोऽस्माकं पितरः नवग्वाः अभिनवगमनयुक्ताः सदा नूतनवत्प्रीतिजनका इत्यर्थः । ते च सोम्यासः । सोममर्हन्तीति सोम्याः । यज्ञियानां यज्ञार्हाणां तेषां सुमतौ अनुग्रहयुक्तायां बुद्धौ वयं स्याम सर्वदा तिष्ठेम । अपि च सौमनसे भद्रे सौमनसस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥

*Notes* :

1. नवग्वाः[2] 'Navagva, Atharvan, &c., are names of pious races of the old time.' Roth in S. L.

2. सोम्यासः. The word has the meaning Sāyaṇa ascribes to it here as, for example, when it is used of Indra, R̥V. iii, 51, 11, &c. But as used of the Bhr̥gus, and other pious races, it is better explained as meaning offerers of Soma. Roth cites i, 31, 16 ; iv, 17, 7 ; and of the Bhr̥gus our passage, viii, 32, 5 ; x, 53, 7 ; iii, 30, 1.

[ 3. सौमनसे. See Sāyaṇa on iii, 59, 4, p. 130[3] ].

## Verse 7

*Padapāṭha* :

प्र इहि प्र इहि पथिऽभिः पूर्व्येभिः यत्र नः पूर्वे पितरः पराऽईयुः । उभा राजाना स्वधया मदन्ता यमम् पश्यासि वरुणम् च देवम् ॥ ७

---

[1] For Atharvans and Bhr̥gus see Macdonell's Vedic Mythology, pp. 140–1 ; Skt. Atharvan = Av. aθravanō.

[2] Macdonell's Ved. Myth., p. 144.

[3] p. 132 in this edition.

*Sāyaṇa* :

सत्रमध्ये दीक्षितमरणे प्रेहीत्याद्याः पञ्चर्चस्तृतीयावर्जिता होत्रा शंसनीयाः । सूत्रितं च । प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पञ्चानां तृतीयामुद्धरेदिति ( Aśval. vi, 10 ) ।

यत्र यस्मिन्स्थाने नोऽस्माकं पूर्वे पुरातनाः पितरः पितामहादयः परेयुः पूर्व्येभिः पूर्वस्मिन्काले भवैः । अनादिकालप्रवृत्तैरित्यर्थः पथिभिर्मार्गैः हे मत्पितस्तत्स्थानं प्रेहि प्रगच्छ शीघ्रं गच्छ । गत्वा च स्वधया अमृतान्नेन मदन्ता मदन्तौ तृप्यन्तौ राजाना राजानौ उभा उभौ यमं देवं द्योतमानं वरुणं च पश्यासि पश्य ॥

*Note* :

Note the appropriate connection of this stanza with st. 2, and observe the identical pādas.--- Lanman, Reader, 378.

Verse 8

*Padapāṭha* :

**सम् गच्छस्व पितृऽभिः सम् यमेन इष्टापूर्तेन परमे विऽओमन् । हित्वाय अवद्यम् पुनः अस्तम् आ इहि सम् गच्छस्व तन्वा सुऽवर्चाः ॥ ८**

*Sāyaṇa* :

हे मदीय पितः ततस्त्वं परमे उत्कृष्टे व्योमन् व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः पितृभिः सह सं गच्छस्व । इष्टापूर्तेन श्रौतस्मार्तदानफलेन संगच्छस्व । तत इष्टापूर्तेन सहागम्य अवद्यं पापं हित्वा परित्यज्य अस्तं ध्रियमाणाख्यं गृहमेहि आगच्छ । ततः सुवर्चाः तृतीयार्थे प्रथमा । सुवर्चसा शोभनदीप्तियुक्तेन तन्वा स्वशरीरेण संगच्छस्व[1] ॥

*Notes* :

1. इष्टापूर्तेन[2]. The word occurs nowhere else in the Ṛgveda. Roth explains it as meaning 'wish and fulfilling,' that is, the fulfilment of desire. 'This belongs to the condition of the blessed in heaven.' He quotes from other texts as follows: इष्टापूर्तमनुसंक्राम विद्वान् A. V. xviii, 2, 57; V. S. xv. 54, 8, 5;

1 "8d., Rest at the fifth place"—Arnold. Ved. Met., p. 318.

2 Bloomfield's Rel. Ved., pp. 194–95.

समसुष्मिंल्लोके इष्टापूर्तेन गच्छति T. S. iii, 3 ; इष्टापूर्तमवतु नः पितॄणाम् A. V. ii. 12, 4 ; iii, 12, 8 ; 29, 1 ; in a curse : इष्टापूर्ते ते लोकं सुकृतमायुः प्रजां वृञ्जीय यदि मे द्रुह्येः ( 'If you injure me, I will take from you happiness and heaven, life and posterity.' ) Ait. Br. viii, 15. The lexicographers explain the word as meaning oblations ( इष्ट ) and good works ( पूर्त ), such as digging a tank and the like.

वापीकूपतडागानि देवतायतनानि च ।
अन्नप्रदानमारामाः पूर्तमर्थाः प्रचक्षते ॥
एकाग्निकर्म हवनं त्रेतायां यच्च हूयते ।
अन्तर्वेद्यां च यद्दानमिष्टं तदभिधीयते ॥ Hemac. 835.
Sch. ( Roth. )

2. हित्वाय ' 'Instead of *tvā* alone, the Veda has three forms of the suffix; namely, *tvā*, *tvāya* and *tvī*.' Whitney, para, 993 b.

3. सुवर्चाः. Construe with स गच्छस्व. 'There, glorious, find a body' to take the place of that which we are about to burn. Roth ( S. L. ) compares x, 16, 5, स गच्छतां तन्वा जातवेदाः.

Verse 9

*Padapāṭha* :

अप इत वि इत वि च सर्पत अतः अस्मै एतम् पितरः लोकम् अक्रन् । अहःऽभिः अत्ऽभिः अक्तुऽभिः विऽअक्तम् यमः ददाति अवऽसानम् अस्मै ॥ ९

*Sayaṇa* :

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षत्यपेत वीतेति । सूत्रितं च । गर्तोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत वीत वि च सर्पतात इति ( Āśval. Gṛh. iv, 2, 10 ) ।

श्मशाने पूर्वं स्थिता हे पिशाचादयः अतः अस्मात्प्रमृज्यमानदहनस्थानादपेत अपगच्छत वीत विशेषेण गच्छत वि सर्पत च । इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः । पितरः अस्मै मृतयजमानस्यार्थाय एतं लोकमिदं दहन-स्थानम् अक्रन् यमस्याज्ञया अन्वकुर्वन् । यमोऽप्यहोभिर्दिवसैः अद्भिः अभ्युक्षणोदकैः अक्तुभिः[1] रात्रिभिर्व्यक्तं संगतम् । शुद्धिनिमित्तं कालोदकादिभिः शोधित-

[1] M's V. G. S., para 178.3 ( p. 211 ).

मित्यर्थः । अवसानं दहनस्थानम् अस्मै मृतयजमानस्यार्थाय ददाति दत्तवान्[1] ॥

*Notes* :

[ 1. The scholiast to V. S. takes this as an address to 'Yama's men.' It is a little forced to refer it to the mourners[2]. — Lanman, Reader, 378. ]

2. अहोभिः &c. 'Where the pleasures of earth will be found again.' Roth in S. L.

Verse 10

*Padapāṭha* :

**अति॑ द्र॒व सा॒र॒मे॒यौ श्वानौ॑ च॒तुः॒ऽअ॒क्षौ श॒बलौ॑ सा॒धुना॑ प॒था । अथ॑ पि॒तॄन् सु॒ऽवि॒दत्रा॑न् उप॑ इ॒हि॒ य॒मेन॑ ये स॒ध॒ऽमाद॑म् मद॑न्ति ॥ १०**

*Sāyaṇa* :

अनुस्तरण्या वृक्कौ पार्श्वयोराम्रफलाकृती । तावुद्धृत्य प्रेतस्य हस्तयोर्निदधात्यति द्रव सारमेयाविति द्वाभ्याम् । सूत्रितं च । वृक्कावुद्धृत्य पाण्योरादध्यादति द्रव सारमेयौ श्वानाविति ( Āsval. Gṛh. iv, 3, 20 ) ।

हे अग्ने साधुना पथा समीचीनेन मार्गेण श्वानावुभौ अति द्रव[3] अतिक्रम्य गच्छ । यमसबन्धिनौ यौ श्वानौ[4] प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः । कीदृशौ श्वानौ । सारमेयौ । सरमा[5] नाम काचित्प्रसिद्धा देवशुनी । तस्याः पुत्रौ चतुरक्षौ उपरिभागे पुनरप्यक्षिद्वयं ययोस्तादृशौ । अथ शोभनमार्गेण गमनानन्तरं ये पितरो यमेन सधमादं सहर्षं मदन्ति प्राप्नुवन्ति तान्सुविदत्रान् सुष्ठुभिज्ञान्पितॄन् उपेहि उपगच्छ ॥

---

[1] 9a itā, twice–Arnold. [2] See, however, Vāj. Saṁ., xii., 45.

[3] dravā–Arnold.

[4] '10a, 11a śuānau § 145, vi'—Arnold, pp. 318. 'There are several other instances, chiefly in the later part of the Ṛgveda, where resolution of *y* or *v* seems to be due to a preceding heavy syllable'. Arnold's Ved. Met., p. 95.

[5] M's Ved. Myth p. 173; Ṛv. x, 108; Nir. vii, 24–25 and com. ( Bib. Ind. Edn. pp. 205–208 ); Max Müller's Sc. Lang., Vol. II, Ch. xii, pp. 577–595; and *Saramā* and *Sārameya*=Gr. Hermes; = Teutonic *Storm* and Gr. horme ( Kūhn ).

Verse 11

*Padapāṭha* :

यौ ते श्वानौ यम रक्षितारौ चतुःऽअक्षौ पथिरक्षीइति पथिऽरक्षी नृऽचक्षसौ । ताभ्याम् एनम् परि देहि राजन् स्वस्ति च अस्मै अनमीवम् च धेहि ॥ ११

*Sāyaṇa* :

हे राजन् हे यम ते त्वदीयौ यौ श्वानौ[1] विद्येते ताभ्यां हे श्वभ्यां राजन् यम एनं प्रेतं परि देहि रक्षणार्थं प्रयच्छ । कीदृशौ श्वानौ । रक्षितारौ यमगृहस्य रक्षकौ चतुरक्षौ अक्षिचतुष्टययुक्तौ पथिरक्षी मार्गस्य रक्षकौ । नृचक्षसौ मनुष्यैः ख्याप्यमानौ । श्रुतिस्मृतिपुराणाभिज्ञा पुरुषाः तौः प्रख्यापयन्ति । ताभ्यां श्वभ्यां दत्त्वा अस्मै प्रेताय स्वस्ति च क्षेममपि अनमीवं च रोगाभावमपि धेहि संपादय ॥[2]

[ *Notes* :

1. रक्षितारौ. There are only two instances of *au* before a consonant ( in the Nom. Dual masc. of stems in ऋ ) ; *viz*, at the end of iii, 55, 11*c* and of x, 14, 11*a*. iii, 55 is one of the later mystical hymns ; and verse 11 of x, 14 contains notions about the hounds of Yama, which are entirely different from those of verse 10, and probably later.— Lanman's Noun-Inflection.

2. नृचक्षसौ. The suffix अस् forms adjectives and nouns signifying the agent, as well as a large number of neuter nouns which are mostly abstract verbal nouns— Lindner, Altind. Nom., p. 50. The hounds are in the next verse called messengers of Yama going up and down among men. Cf. Sāy. on उरुचक्षसम् in No. 2, v, 5. ]

Verse 12

*Padapāṭha* :

उरुऽनसौ असुऽतृपौ उदुम्बलौ यमस्य दूतौ चरतः जनान् अनु । तौ अस्मभ्यम् दृशये सूर्याय पुनः दाताम् असुम् अद्य इह भद्रम् ॥ १२

---

[1] For the hounds of Yama, see Bloomfield's Rel. Ved., p. 105-6; where the author indentifies Skt. = Śabalas = Gr. Kerberos, Cerberus—the Dog of the Hades.

[2] 11c tā́bhiām; 11d svastí ( Arnold ).

*Sāyaṇa* :

यमस्य संबन्धिनौ दूतौ श्वानौ जनाँ अनु प्राणिनो लक्षीकृत्य सर्वत्र चरतः । कीदृशौ । उरुणसौ दीर्घनासिकायुक्तौ असुतृपौ परकीयान्प्राणान् स्वीकृत्य तैस्तृप्यन्तौ उदुम्बलौ उरुबलौ विस्तीर्णबलौ तावुभौ दूतौ सूर्याय दृशये सूर्यस्य दर्शनार्थम् अद्य दिने इह कर्मणि भद्रमसुं समीचीनं प्राणं पुनरस्मभ्यं दातामदत्ताम् ॥

[ *Note* :

1. असुतृपौ. अ + सु + तृप् or असु + तृप्. See note 2 on vii, 86, 5, above.

2. अस्मभ्यं दृशये सूर्याय Whitney, para. 982 a. ][1]

Verse 13

*Padapāṭha* :

यमाय सोमम् सुनुत यमाय जुहुत हविः । यमम् ह यज्ञः गच्छति अग्निऽदूतः अरंऽकृतः ॥ १३

*Sāyaṇa* :

हे ऋत्विजो यमाय यमदेवतार्थं सोमं सुनुत लतात्मकं सोममभिषुणुत । तथा यमार्थं हविर्जुहुत । अग्निर्दूतो यस्मिन्यज्ञे सोऽयमग्निदूतः । अग्नेर्दूतत्वमन्यत्राम्नातम् । अग्निर्देवानां दूत आसीदिति ( T. S. ii, 5, 8, 5) । अरंकृतः बहुभिर्द्रव्यैरलंकाररूपैर्युक्तः । तादृशो यज्ञो यमं ह यममेव गच्छति ॥

Verse 14

*Padapāṭha* :

यमाय घृतऽवत् हविः जुहोत प्र च तिष्ठत । सः नः देवेषु आ यमत् दीर्घम् आयुः प्र जीवसे ॥ १४

*Sāyaṇa* :

हे ऋत्विजो यूयं यमाय घृतवदाज्येन संयुक्तं हविः पुरोडाशादिकं जुहोत जुहुत प्र तिष्टत च यमं यूयमुपतिष्ठध्वं च । देवेषु मध्ये स यमो देवः प्र जीवसे प्रकृष्टजीवनार्थं नोऽस्माकं दीर्घमायुः आ यमत् प्रयच्छतु ॥

[ *Note* :

जीवसे. Whitney, para. 670 c. ][2]

---

[1] M's V. G., para 583 (p. 408); M's V. G. S., para 211. 1a (p. 333) Īśa Up., ver. 15.

[2] M's V. G. S., para 167, 1b 1. (p. 192).

## Verse 15

*Padapāṭha* :

यमाय मधुमत्ऽतमम् राज्ञे हव्यम् जुहोतन । इदम् नमः ऋषिभ्यः पूर्वऽजेभ्यः पूर्वेभ्यः पथिकृत्ऽभ्यः १५

*Sāyaṇa* :

हे ऋत्विजो यमाय राज्ञे मधुमत्तममतिशयेन मधुरं हव्य पुरोडाशादिकं हविर्जुहोतन जुहुत । पूर्वजेभ्यः सृष्ट्यादावुत्पन्नेभ्यः अत एव पूर्वेभ्यः अस्मत्तः पूर्वभाविभ्यः पथिकृद्भ्यः शोभनमार्गकारिभ्यः ऋषिभ्य इदं प्रत्यक्षं यथा भवति तथा नमोऽस्तु ॥

## Verse 16

*Padapāṭha* :

त्रिऽकद्रुकेभिः पतति षट् उर्वीः एकम् इत् बृहत् । त्रिऽस्तुप् गायत्री छन्दांसि सर्वा ता यमे आऽहिता ॥ १६

*Sāyaṇa* :

त्रिकद्रुकेभिः । द्वितीयार्थे तृतीयैषा । त्रिकद्रुकान् । ज्योतिर्गौरायुरिति त्रयो यागविशेषास्त्रिकद्रुका उच्यन्ते । तान्प्रत्यङ्गभावाय संरक्षणार्थं च पतति यमः तान् प्राप्नोति । षट्संख्याकाः उर्वीः भूमीः कृताकृतप्रत्यवेक्षणाय प्राप्नोति । ताश्चोर्व्यः शाखान्तरमन्त्रे समाम्नाताः षण्मोर्वीरंहसस्पान्तु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क्च सूनृता चेति । एकमित् एकमेव बृहत महत जगत् यमश्च प्रतिपालनीयः प्राप्नोति । किं च यानि त्रिष्टुब्गायत्र्यादीनि छन्दांसि सन्ति सर्वा ता सर्वाणि तानि छन्दांसि यमे आहिता आहितानि । ऋत्विग्भिः स्तुतित्वेनावस्थितानि ॥

[ *Note* :

The meaning appears to be that the Great Unit, Yama, as All-God,[1] broadens and fills the universe after plentiful libations of Soma juice in the three Kadruka days, or first three days of the Abhiplava festival.— Griffith.

Stanzas 13–16 are palpably later additions-Lanman Reader, 377 a. ]

---

[1] ṚV. i, 164, 46.

## No. 30

*Maṇḍala* X *Sūkta* 90

*Sāyaṇa* :

सहस्रशीर्षेति षोडशर्चं षष्टं सूक्तम् । नारायणो नाम ऋषिः । अन्त्या त्रिष्टुप् शिष्टा अनुष्टुभः [1] । अव्यक्तमहदादिविलक्षणश्चेतनो यः पुरुषः ( Ve. Sū. i, 4. 1 ) पुरुषान्न परं किञ्चिदित्यादिश्रुतिषु प्रसिद्धः ( Ka. Upa. iii, 11 ) स देवता । तथा चानुक्रान्तम् । सहस्रशीर्षा षोळश नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं त्विति । गतो विनियोगः ॥

[ *Notes* :

1. Translated in Muir's Sk. Texts, I, 9—11; V, 368-73.
2. On the subject of the modernness of this hymn, see Muir, I, pp. 12 ff. ][2]

### Verse 1

*Padapāṭha* :

**सहस्रऽशीर्षा पुरुषः सहस्रऽअक्षः सहस्रऽपात् । सः भूमिम् विश्वतः वृत्वा अति अतिष्ठत् दशऽअङ्गुलम् ॥ १**

*Sāyaṇa* :

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः पुरुषः सोयं सहस्रशीर्षा । सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवं सहस्राक्षित्वं सहस्रपादत्वं च । स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां विश्वतः सर्वतो वृत्वा परिवेष्ट्य दशाङ्गुलं दशाङ्गुलपरिमितं देशमत्यतिष्ठत् अतिक्रम्य व्यवस्थितः । दशाङ्गुलमित्युपलक्षणम् । ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥

*Note* :

दशाङ्गुलम्. Accus. neut. of extent. 'To ten fingers' length.' The word does not occur elsewhere in the Ṛgveda. BR. quote for it Manu viii, 271 ( शङ्कु[3] ).

---

[1] On Anuṣṭubh Metre see Arnold's Vedic Metre § 128, p. 166. etc.

[2] Very late rhythm—Arnold.

[3] Av. dasa.

Verse 2

*Padapāṭha* :

पुरुषः एव इदम् सर्वम् यत् भूतम् यत् च भव्यम् । उत अमृतऽत्वस्य ईशानः यत् अन्नेन अतिऽरोहति ॥ २

*Sāyaṇa* :

यदिदं वर्तमानं जगत्तत्सर्वं पुरुष[1] एव यच्च भूतमतीतं जगद्यच्च भव्यं भविष्यज्जगदत्तदपि पुरुष एव । यथास्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः । उत अपि च अमृतत्वस्य देवत्वस्यायमीशानः स्वामी । यद्यस्मात्कारणादन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेनातिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः ॥

*Notes* :

यदन्नेनातिरोहति. '( And is ) whatever is nourished, or increased by food.' The construction is the same as that of the first line, the words उतामृतत्वस्येशानः being parenthetic. Puruṣa *is* the whole world animate ( यदन्नेनातिरोहति ) and inanimate (इदं सर्वं यद्भूतं यच्च भव्यम् ). Compare the same classification in verse 4 below.

The construction and meaning have been variously explained. 'It ( the clause ) may also mean, according to the commentators on the Vāj. S. and the Śvetāśvatara Upaniṣad, "( he is also the lord of ) that which grows by food." [ Cf. चक्रे...ग्राम्याश्च ये, v. 8. ] According to the paraphrase in the Bhāgavata Purāṇa it means "seeing he has transcended mortal nutriment." The parallel passage of the Atharvaveda ( xix, 6, 4 ) reads "he is also the lord of immortality since he became united with another" ( *yad anyenābhavat saha* ). Muir.

Muir himself translates 'since through food he expands.' Grassmann refers the clause to अमृतत्वस्य 'that which is nourished by our sacrifices— was durch speise, *i. e.*, opferspeise, noch höher wächst, *i. e.*, Herrlicher wird.' Ludwig 'since he stretches far above what exists by food—da er was durch speise ist weit überragt.' But compare his note.

---

[1] Pū́ruṣaḥ–Arnold.

### Verse 3

*Padapāṭha* :

एतावा॑न् अ॒स्य॒ म॒हि॒मा अतः॑ ज्याया॑न् च॒ पुरु॑षः । पादः॑ अ॒स्य॒ विश्वा॑ भू॒तानि॑ त्रि॒ऽपात् अ॒स्य॒ अ॒मृत॑म् दि॒वि ॥ ३

*Sāyaṇa* :

अतीतानागतवर्तमानरूपं जगद्यावदस्ति एतावान्सर्वोऽप्यस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषः । न तु तस्य वास्तवस्वरूपम् । वास्तवस्तु पुरुषः अतो महिम्नोऽपि ज्यायान् अतिशयेनाधिकः । एतच्चोभयं स्पष्टीक्रियते । अस्य पुरुषस्य विश्वा सर्वाणि भूतानि कालत्रयवर्तीनि प्राणिजातानि पादः चतुर्थोऽशः । अस्य पुरुषस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सद्दिवि द्योतनात्मके स्वप्रकाशस्वरूपे । व्यवतिष्ठत इति शेषः । यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्याम्नातस्य ( T. A. viii. 1 ; T. Upa. ii, 1 ) परब्रह्मण इयत्ताभावात्पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात्पादत्वोपन्यासः ॥

*Note* :

'Compare Atharvaveda x, 8, 7 and 13 : "7. With the half he produced the whole world : but what became of that which was the other half of him ( *ardhena viśvaṁ bhuvanaṁ jajāna yad asya ardhaṁ kva tad babhūva* ) ? 13. Prajāpati moves within the womb ; though unseen, he is born in many forms. With the half he produced the whole world ; but the other half of him, what sign is there of it ? " Compare also Atharvaveda, x, 7, 8, 9,' Muir, Sanskrit Texts, V, pp. 368–9, note.

### Verse 4

*Padapāṭha* :

त्रि॒ऽपात् ऊ॒र्ध्वः उत् ऐ॒त् पुरु॑षः पादः॑ अ॒स्य॒ इ॒ह अ॒भ॒व॒त् पुन॒रिति॑ । ततः॑ विष्व॑ङ् वि अ॒क्रा॒म॒त् सा॒श॒ना॒न॒श॒नेइति॑ अ॒भि ॥ ४

*Sāyaṇa* :

योऽयं त्रिपात्पुरुषः संसाररहितो ब्रह्मस्वरूपः सोऽयमूर्ध्व उदैत् । अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतः अत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् । तस्यास्य सोऽयं

पादो लेशः सोऽयमिह मायायां पुनरभवत् । सृष्टिसंहाराभ्यां पुनः पुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तम् विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ( Bhag. x, 42 ) । ततो मायायामागत्यानन्तरं विष्वङ् देव-मनुष्यतिर्यगादिरूपेण विविधः सन् व्यक्रामत् व्याप्तवान् । किं कृत्वा । साशनानशने अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम् । अनशनं तद्रहितम-चेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवा-नित्यर्थः[1] ॥

Verse 5

*Padapāṭha* :

तस्मात् विऽराट् अजायत विऽराजः अधि पुरुषः । सः
जातः अति अरिच्यत पश्चात् भूमिम् अथोइति पुरः ॥ ५

*Sāyaṇa* :

विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । तस्मादादिपुरुषाद्विराड् ब्रह्माण्डदेहोऽजायत उत्पन्नः । विविधानि राजन्ते वस्तून्यत्रेति विराट् । विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा पुरुषस्तद्देहाभिमानी कश्चित्पुमानजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति । स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैवेति ( Nṛ. Tāp-Upa. ii, 1, 2 ) । स जातो विराट्पुरुषोऽत्यरिच्यत अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । पश्चाद्देवादिजीवभावादूर्ध्वं भूमिम् । ससर्जेति शेषः । अथो भूमिसृष्टेरनन्तरं तेषां जीवानां पुरः ससर्ज । पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ॥

[ *Note* :

भूमिम्. It is better to take this as an object of अत्यरिच्यत than that of ससर्ज understood. ]

[1] '4a hypersyllabic verse, or combination of ūrdhvaḥ and ut. § 130 i (irregular sandhi)'—Arnold.

Verse 6

*Padapāṭha* :

**यत् पुरुषेण हविषा देवाः यज्ञम् अतन्वत । वसन्तः अस्य आसीत् आज्यम् ग्रीष्मः इध्मः शरत् हविः ॥ ६**

*Sāyaṇa* :

यद्यदा पूर्वोक्तक्रमेणैव शरीरेषूत्पन्नेषु सत्सु देवा उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासंभवात्पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य पुरुषेण[1] पुरुषाख्येन हविषा मानसं यज्ञमतन्वत अन्वतिष्ठन् । तदानीमस्य यज्ञस्य वसन्तो वसन्तर्तुरेवाज्यमासीत । तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः । एवं ग्रीष्म इध्म आसीत् । तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः । शरद्धविरासीत् । तामेव पुरोडाशादिहविष्ट्वेन संकल्पितवन्त इत्यर्थः । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः । अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन संकल्प इति द्रष्टव्यम् ॥

Verse 7

*Padapāṭha* :

**तम् यज्ञम् बर्हिषि प्र औक्षन् पुरुषम् जातम् अग्रतः । तेन देवाः अयजन्त साध्याः ऋषयः च ये ॥ ७**

*Sāyaṇa* :

यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं बर्हिषि मानसे यज्ञे प्रौक्षन् प्रोक्षितवन्तः । कीदृशमित्यत्राह । अग्रतः सर्वसृष्टेः पूर्वं पुरुषं जातं पुरुषत्वेनोत्पन्नम् । एतच्च प्रागेवोक्तम् । तस्माद्विराळजायत विराजो अधि पूरुष इति । तेन पुरुषरूपेण पशुना देवा अयजन्त । मानसयागं निष्पादितवन्त इत्यर्थः । के ते देवा इत्यत्राह । साध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूला ऋषयो मन्त्रद्रष्टारश्च ये सन्ति । ते सर्वेऽप्ययजन्तेत्यर्थः ॥

[ *Note* :

साध्याः. A class of divine beings, probably ancient divine sacrificers. -- Griffith. ]

Verse 8

*Padapāṭha* :

**तस्मात् यज्ञात् सर्वऽहुतः संऽभृतम् पृषत्ऽआज्यम् । पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्याः च ये ॥ ८**

---

[1] pūrusena–Arnold.

*Sāyaṇa* :

सर्वहुतः । सर्वात्मकः पुरुषो यस्मिन्यज्ञे हूयते सोऽयं सर्वहुत् । तादृशात्तस्मात्पूर्वोक्तान्मानसाद्यज्ञात्पृषदाज्यं दधिमिश्रमाज्य संभूतं संपादितम् । दधि चाज्यं चेत्यवमादिभोग्यजातं सर्वं संपादितमित्यर्थः । तथा वायव्यान्[1] वायुदेवताकाँल्लोकप्रसिद्धानारण्यान्पशूंश्चक्रे उत्पादितवान् । आरण्या हरिणादयः । तथा ये च ग्राम्याः गवाश्वादयस्तानपि चक्रे । पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते । वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैतान्परिददातीति ( T. B. iii. 2, 1, 3. ) ॥

Verse 9

*Padapāṭha* :

**तस्मात् यज्ञात् सर्वऽहुतः ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत ॥ ९**

*Sāyaṇa* :

सर्वहुतस्तस्मात्पूर्वोक्ताद्यज्ञादृचः सामानि च जज्ञिरे उत्पन्नाः । तस्माद्यज्ञाच्छन्दांसि गायत्र्यादीनि जज्ञिरे । तस्माद्यज्ञाद्यजुरप्यजायत ॥

*Note* :

'The A. V. may be referred to under the appellation of छन्दस् in the following passages, according to the indication of the St. Pet. Lexion, where the second sense of the word छन्दस् is thus defined : " A sacred hymn, and according to the first three texts to be quoted, esp. that sort, which is neither Ṛc, Sāman nor Yajus ; hence, perhaps, originally an incantation." The texts referred to are A. V. xi 7, 24 ; Ṛ. V. x, 90, 9 ; and Hariv. v. 9491.'— Muir, II, p. 189.

Verse 10

*Padapāṭha* :

**तस्मात् अश्वाः अजायन्त ये के च उभयादतः । गावः ह जज्ञिरे तस्मात् तस्मात् जाताः अजावयः ॥ १०**

---

[1] So vāyavyān § 135 a ; mentioned among exceptions to the general rule in § 135–Arnold's Ved. Met., p. 83.

*Sāyaṇa* :

तस्मात्पूर्वोक्ताद्यज्ञादश्वा अजायन्त उत्पन्नाः। तथा ये के चाश्वव्यतिरिक्ता गर्दभा अश्वतराश्चोभयादत उर्ध्वाधोभागयोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त। तथा तस्माद्यज्ञाद्गावश्च जज्ञिरे। किं च। तस्माद्यज्ञादजावयश्च जाताः॥

Verse 11

*Padapāṭha* :

यत् पुरुषम् वि अदधुः कतिधा वि अकल्पयन्। मुखम् किम् अस्य कौ बाहूइति कौ ऊरूइति पादौ उच्येतेइति॥ ११

*Sāyaṇa* :

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवा यद्यदा पुरुषं[1] विराड्रूपं व्यदधुः संकल्पेनोत्पादितवन्तस्तदानीं कतिधा कतिभिः प्रकारैर्व्यकल्पयन् विविधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किमासीत्। कौ बाहू अभूताम्। कावूरू। कौ च पादावुच्येते। प्रथम सामान्यरूपः प्रश्नः पश्चान्मुखं किमित्यादिना विशेषविषयाः प्रश्नाः॥

Verse 12

*Padapāṭha* :

ब्राह्मणः अस्य मुखम् आसीत् बाहूइति राजन्यः कृतः। ऊरूइति तत् अस्य यत् वैश्यः पत्ऽभ्याम् शूद्रः अजायत॥ १२

*Sāyaṇa* :

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति। अस्य प्रजापतेः ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः[2] पुरुषो मुखमासीत्। मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रि-

---

[1] 11a pū́ruṣam; 11d pā́da, § 174 i a, ucyate § 170 i—Arnold's Ved. Met., p. 322.

[2] For 'the origin of Caste' and 'Caste in the Ṛ.V.' see Varuṇa, Macdonell and Keith's Vedic Index, Vol. 2, pp. 247 etc ; Muir's S. T. Vol. I, pp. 6–11, V, pp. 368–77. Tribes and Castes of the Central Provinces Vol. I, pp. 13–25; Nesfield's Brief Sketch of the Caste System of the N.W. Provinces and Oudh. For Iranian analogues see Moulton's Early Zoroastrianism, p. 117 : Skt. varṇa–Av. piśtra-colour ; āthravan, zaotar ; kṣathra, rathæśtar ; vāstrya. vish, vaiśya = Lat. vious, Gr. oikos, Ir. vasteriox. Sudros–a town on the lower Indus, Sudroi, name of the people.

यत्वजातिमान् पुरुषः स बाहू कृतः बाहुत्वेन निष्पादितः । बाहुभ्यामुत्पादित इत्यर्थः । तत्तदानीमस्य प्रजापतेर्यद्यौ ऊरू तद्रूपो वैश्यः संपन्नः । ऊरुभ्यामुत्पन्न इत्यर्थः । तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान्पुरुषोऽजायत । इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे स मुखतस्त्रिवृतं निरमिमीतेत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परतयैव योजनीये ॥

[ *Note* :

For the reason for the several identifications, see note on the passage by Griffith.[1] ]

Verse 13

*Padapāṭha* :

चन्द्रमाः मनसः जातः चक्षोः सूर्यः अजायत । मुखात् इन्द्रः च अग्निः च प्राणात् वायुः अजायत ॥ १३

*Sāyaṇa* :

यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेर्मनसः सकाशाच्चन्द्रमा जातः । चक्षोश्च चक्षुषः सूर्योऽप्यजायत । अस्य मुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ । अस्य प्राणाद्वायुरजायत ॥

Verse 14

*Padapāṭha* :

नाभ्याः आसीत् अन्तरिक्षम् शीर्ष्णः द्यौः सम् अवर्तत । पत्ऽभ्याम् भूमिः दिशः श्रोत्रात् तथा लोकान् अकल्पयन् ॥ १४

*Sāyaṇa* :

यथा चन्द्रादीन्प्रजापतेर्मनःप्रभृतिभ्योऽकल्पयंस्तथान्तरिक्षादींल्लोकान्प्रजापतेर्नाभ्यादिभ्यो देवा अकल्पयन् उत्पादितवन्तः । एतदेव दर्शयति । नाभ्याः प्रजापतेर्नाभेरन्तरिक्षमासीत् । शीर्ष्णः शिरसो द्यौः समवर्तत उत्पन्ना । अस्य पद्भ्यां पादाभ्यां भूमिरुत्पन्ना । अस्य श्रोत्राद्दिश उत्पन्नाः[2] ॥

[ *Note* :

'लोका . लोक, meaning 'open space', is in the Veda very rarely not preceded by उ, there being only one instance in the first eight maṇḍalas. Again, the only so-called particle not

---

[1] Translation of the Hymns of the ṚV. Vol. II, p. 519.

[2] 'Cf. the creation of the world giant Ymir or Hymir in old Northern poetry (Edda)'—Griffith.

accented even in the beginning of a pāda is the उ preceding लोक. So उलोक, derived from उरु, seems to have been the original word, उ being a part of it, and not a separate particle.'— M. M., Ved. Hymns, i. pp. lxxiv-lxxvii. Here, therefore, is another indication of the modernness of the present hymn. ]

Verse 15

*Padapāṭha* :

**स॒प्त अ॒स्य आ॒स॒न् प॒रि॒ऽधयः॑ त्रिः स॒प्त स॒म्ऽइधः॑ कृ॒ताः ।**
**दे॒वाः यत् य॒ज्ञम् त॒न्वा॒नाः अब॑ध्नन् पुरु॑षम् प॒शुम् ॥ १५**

*Sāyaṇa* :

अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि सप्तच्छन्दांसि परिधय आसन् । ऐष्टिकस्याहवनीयस्य त्रयः परिधयः उत्तरवेदिकास्त्रयः आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः। अत एवाम्नायते। न पुरस्तात्परिदध्यादादित्यो ह्येवोद्यन्पुरस्ताद्रक्षांस्यपहन्तीति (T. S. ii, 6, 6, 3) । तत एत आदित्यसहिताः सप्त परिधयोऽत्र सप्तच्छन्दोरूपाः । तथा सामिधाश्रिः सप्त त्रिगुणीकृतसप्तसंख्याका एकविंशतिः कृताः । द्वादश मासाः पञ्चर्तवः त्रय इमे लोका असावादित्य एकविंश इति श्रुताः ( T. S. 5, 1, 10, 3 ) पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः । यद्यः पुरुषो वैराजोऽस्ति तं पुरुषं देवाः प्रजापतिप्राणेन्द्रियरूपा यज्ञं तन्वाना मानसं यज्ञं तन्वानाः कुर्वाणाः पशुमबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र यत्पुरुषेण हविषेत्युक्तम् ॥

Verse 16

*Padapāṭha* :

**य॒ज्ञेन॑ य॒ज्ञम् अ॒य॒ज॒न्त॒ दे॒वाः तानि॑ धर्मा॑णि प्र॒थ॒मानि॑ आ॒स॒न् । ते ह॒ नाक॑म् म॒हि॒मानः॑ स॒च॒न्त॒ यत्र॑ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥ १६**

*Sāyaṇa* :

पूर्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । देवाः प्रजापतिप्राणरूपा यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमयजन्त पूजितवन्तः । तस्मात्पूजनात्तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यान्यासन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानुवादकभागार्थः संगृह्यते । यत्र यस्मिन्विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातनाः

विराडुपास्तिसाधका देवाः सन्ति तिष्ठन्ति तन्नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचन्त समवयन्ति प्राप्नुवन्ति ॥

[ *Note* :

See Muir's remarks on this hymn at p. 373 of Vol. V of the Sk. Texts. ]

---

## No. 31

*Maṇḍala* X *Sūkta* 119

*Sāyaṇa* :

इति वा इति त्रयोदशर्चं सप्तमं सूक्तं गायत्रम् । इन्द्रो लवरूपमास्थाय सोमपानं[1] कुर्वन् तदानीमृषिभिर्दृष्टः सन् स्वात्मानमनेन सूक्तेनास्तावीत् । अतो लवरूपापन्न इन्द्र ऋषिः । स एव देवता । तथा चानुक्रम्यते । इति वै सप्तोनैन्द्रो लव आत्मानं तुष्टावेति । गतो विनियोगः ॥

[ *Note* :

Translated in Muir's Sk. Texts, V, 91. ][2]

Verse 1

*Padapāṭha* :

**इति॑ वै इति॑ मे॒ मनः॑ गाम् अश्व॑म् स॒नु॒याम् इति॑ । कु॒वित् सोम॑स्य अपा॑म् इति॑ ॥ १**

*Sāyaṇa* :

इति व खलु इत्येवंप्रकारेण मे मदीयं मनो वर्तते । तं प्रकारं दर्शयति । गामश्वं च सनुयां स्तोतृभ्यः प्रयच्छामीति । षणु दाने तानादिकः । इतिशब्दो हेतौ । यस्मात्कुविद्बहुवारं सोमस्य सोममपां पीतवानस्मि । क्रियाग्रहणं कर्तव्यमिति सोमस्य संप्रदानसंज्ञा । चतुर्थ्यर्थे बहुलमिति षष्ठी । पा पाने । लुङि गातिस्थेति सिचो लुक् । कुवियोगादनिघातः[3] ॥

---

[1] Soma : M's Ved. Myth., § 37, pp. 104–114; Hopkin's Rel. Ind., pp. 112–26; Bloomfield's Rel. Ved., pp. 174, 146–47.

[2] 'X. 119. Out of order. Decisive indications of date are wanting'.—Arnold's : Ved. Met. p. 46.

[3] Pāṇ. VIII, 1, 30; M's V. G. S., App. III., 19 B, p. 467.

[ *Notes* :

1. सनुयाम् 'I shall get me,' *i. e.*, and give to my faithful worshipper. Roth quotes ṚV. iii, 25, 2 अग्निः सनोति वीर्याणि— Sāyaṇa, अग्निर्वीर्याणि पशुपुत्रादिसंपद्रूपाणि सामर्थ्यानि सनोति यजमानाय ददाति ; iii, 13, 2; vii, 52, 1 सनेम मित्रावरुणा सनन्तः— Sāyaṇa, हे मित्रावरुणा मित्रावरुणौ सनन्तः युवां संभजन्तो वयं सनेम युवाभ्यां दत्तं धनं संभजेमहि ; viii, 81, 8 इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः। अस्माभिः ( dat. ) सु तं सनुहि— Sāyaṇa, हे इन्द्र यो वाजः अन्नं विप्रेभिः मेधाविभिः सनित्वः संभजनीयस्ते तवास्ते तं वाजमस्माभिर्याचितः सन् अस्मभ्यं वा सु सुष्ठु सनुहि देहि ; ix, 9, 9 ; x, 97, 5.

2. कुवित्. An interrogative particle the verb after which is accented. It never has the meaning Sāyaṇa puts upon it here.

Verse 2

*Padapāṭha* :

**प्र वाताःऽइव दोधतः उत् मा पीताः अयंसत । कुवित् सोमस्य अपाम् इति ॥ २**

*Sāyaṇa* :

दोधतः भृशं कम्पयमाना वाता इव वायवो यथा वृक्षादीनुद्यच्छन्ते तद्वत्पीताः सोमाः मा मां प्रकर्षेण उदयसत उद्यच्छन्ते । यमेर्लुङि समुदाङ्भ्यो यमोऽग्रन्थे इत्यात्मनेपदम् ( Pāṇ. i, 3, 75 ) यस्माद्बहुवारं सोममपाम् ॥

[ *Notes* :

दोधतः This word occurs five times. In i, 80, 5, it is an epithet of Vṛtra वृत्रस्य दोधतः-- Sāyaṇa, दोधतः भृशं कम्पमानस्य ... ... । दोधतः । धूञ् कम्पने । अस्माद्यङ्लुगन्ताच्छतर्यन्त्यलोपश्छान्दसः । अभ्यस्तानामादिरित्याद्युदात्तत्वम्. In ii, 21, 4, it is said of Indra that he is अनानुदो वृषभो दोधतो वधः-- Sāyaṇa, दोधतः दुधिर्हिंसाकर्मा । हिंसकस्यासुरस्य वधो हन्ता. In viii, 6, 6, the phrase वृत्रस्य दोधतः recurs-- Sāyaṇa, वृत्रस्य चिदावरकस्यापि दोधतः अत्यर्थं जगत्कम्पयतोऽसुरस्य. The fourth place is our passage, and is the only one in which the word is a nom. masc. pl. Lastly, in x, 171, 2, we have the phrase मखस्य दोधतः-- Sāyaṇa, मखस्य यज्ञस्य दोधतः कम्पमानस्य देवेभ्यः पलायमानस्य. The root दोधति stands in Naigh. iii, 12, as one of the synonyms of क्रुध्यति. Our word, with the adjective or participle दुधित ( ii, 17, 4, तमांसि दुधिता-- Sāyaṇa, तमोरूपाणि रक्षांसि दुधिता दुःस्थितानि दुर्गतानि. iv, 1, 17, तमो दुधितम्-- Sāyaṇa तमो रात्रिकृतं ध्वान्तं दुधितं । दुधिः प्रेरणकर्मा । प्रातरग्निविहरणकाल उषसा प्रेरितम्. iv, 16,

4, तमांसि दुधिता-- Sāyaṇa, तमांसि दुधिता दुधितानि नाशितानि-- ) and the adjectives दुधि and दुध्र are referred by Benfey and Roth to a reduplication of √ धु to shake.

Verse 3

*Padapāṭha :*

**उत् मा पीताः अयंसत रथम् अश्वाःऽइव आशवः । कुवित् सोमस्य अपाम् इति ॥ ३**

*Sāyaṇa :*

पीताः सोमाः मामुदयंसत उद्यच्छन्ते । तत्र दृष्टान्तः । रथमश्वा इव । यथा आशवः क्षिप्रगामिनः गमनेन व्याप्ता वा अश्वा रथमुद्गमयन्ति तद्वत् ॥

Verse 4

*Padapāṭha :*

**उप मा मतिः अस्थित वाश्रा पुत्रम्ऽइव प्रियम् । कुवित् सोमस्य अपाम् इति ॥ ४**

*Sāyaṇa :*

मतिः स्तोतृभिः क्रियमाणा स्तुतिः मा मामुपास्थित संयोजयति । उपाद्देवपूजासंगतिकरणेत्यात्मनेपदम् ( Pāṇ. i, 3. 25. 1 ) । कथामिव । वाश्रा पुत्रमिव । यथा वाश्रा शब्दायमाना धेनुः प्रियं पुत्रं वत्सं संगच्छति तद्वत् ॥

Verse 5

*Padapāṭha :*

**अहम् तष्टाऽइव वन्धुरम् परि अचामि हृदा मतिम् । कुवित् सोमस्य अपाम् इति ॥ ५**

*Sāyaṇa :*

तष्टेव तक्षा यथा वन्धुरं सारथिनिवासस्थानं तद्वान्वा उपलक्ष्यते । तत्स्थानं रथं वा साधु करोति तद्वदहं मतिं स्तुतिं हृदा आत्मीयेन मनसा पर्यचामि साधुकरणाय परिगच्छामि ॥

### Verse 6

*Padapaṭha* :

नहि मे अक्षिऽपत् चन अच्छांन्त्सुः पञ्चं कृष्टयंः । कुवित् सोमंस्य अपांम् इतिं ॥ ६

*Sāyaṇa* :

चनेति निपातसमुदायोऽप्यर्थे । पञ्च कृष्टयोऽपि निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः यद्वा देवमनुष्यादयः । मे मदीयमक्षिपत चक्षुःपतनं दृष्टिसंचारं नह्यच्छान्त्सुः[1] नह्यपवृण्वन्ति । नहि दृष्टेर्दृष्टेर्विपरिलोपो विद्यते इति हि श्रुतेः ( S. Br. XIV, 7, 1, 23 ) । छदि अपवारणे । चुरादीनामिति वा ण्यन्तत्वादत्र ण्यभावे लुङि हलन्तलक्षणा वृद्धिः ( Paṇ. vii, 2, 3 ) यस्माद्बहुवारं सोममपाम् ॥

*Notes* :

1. आक्षिपत. 'So much as a mote in the eye.' An adverb. The word occurs only here and in vi, 16, 18 नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो 'Let not thy fulness, Vasu, be *a whit* the property of others.' Sāyaṇa, आक्षिपत् अक्ष्णोः पातकं विनाशकं नहि भुवत् न भवतु । सर्वदास्माकं दर्शनसामर्थ्यं करोतु.

[ 2. अच्छान्त्सुः. छन्द् with double Nom. and the Dat. of the person = to appear, appear as.-- Gr. ]

### Verse 7

*Padapāṭha* :

नहि मे रोदंसीइतिं उभेइतिं अन्यम् पक्षम् चन प्रतिं । कुवित् सोमंस्य अपांम् इतिं ॥ ७

*Sāyaṇa* :

उभे रोदसी द्यावापृथिव्यौ मे मदीयमन्यं पक्षं चन पक्षमपि प्रति समाने न भवतः ॥

### Verse 8

*Padapāṭha* :

अभि द्याम् महिना भुवम् अभि इमाम् पृथिवीम् महीम् । कुवित् सोमंस्य अपांम् इतिं ॥ ८

---

1 M's V. G. S., App. I, √ *chad* or *chand*, p. 382.

*Sāyaṇa* :

उक्तमर्थं प्रतिपादयति । माहिना महिम्नात्मीयेन द्यां द्युलोकमभि भुवं अभिभवामि । तथा महीं महतीमिमां पृथिवीं स्वमहिम्ना अभिभवामि । भवतेर्लङि छान्दसो विकरणस्य लुक् । भूसुवोस्तिङीति गुणे प्रतिषिद्धे उवङादेशः ॥

Verse 9

*Padapāṭha* :

हन्त॑ अ॒हम् पृ॒थि॒वीम् इ॒माम् नि द॒धा॒नि इ॒ह वा॒ इ॒ह वा॒ ।
कुवित् सोम॑स्य अपा॑म् इति॑ ॥ ९

*Sāyaṇa* :

हन्तेति संभावनायामनुज्ञायां वा । संभावयाम्येतदनुजानामि वा । किं तत् । अहमिमां पृथिवीमिह वान्तरिक्षे नि दधानि इह द्युलोके । इति हस्तेन निर्दिशति । दधातेर्लोटि मेर्निः ॥

Verse 10

*Padapāṭha* :

ओ॒षम् इत् पृ॒थि॒वीम् अ॒हम् ज॒ङ्घना॑नि इ॒ह वा॒ इ॒ह वा ।
कुवित् सोम॑स्य अपा॑म् इति॑ ॥ १०

*Sāyaṇa* :

अहं पृथिवीमभिलक्ष्य ओषं स्वतेजसा तापकमादित्यमिह वान्तरिक्षे इह वा द्युलोके जङ्घनानि भृशं यापयानि । इदिति पूरणः । हन्तेर्गत्यर्थस्य यङ्लुगन्तस्य लोटि शपो लुगभावश्छान्दसः ॥

*Note* :

ओषम्. This word occurs nowhere else in the Ṛgveda. Roth refers to Naigh. ii, 15, where it is given as one of the synonyms of क्षिप्र, and quotes Atharvaveda, ii, 36, 1 ; vii, 73, 6 ; xii, 3, 31. He takes the connection of thought between it and the root उष् ( to burn ) to be of the same kind as the German ( and English ) phrases 'I burn to do it,' and the like.

Verse 11

*Padapāṭha* :

दि॒वि मे॒ अ॒न्यः प॒क्षः अ॒धः अ॒न्यम् अ॒ची॒कृ॒षम् । कुवित्
सोम॑स्य अपा॑म् इति॑ ॥ ११

*Sāyaṇa* :

मे मदीयः अन्यः पक्षः दिवि द्युलोके स्थापितः[1] । अधः । पूर्वाधरावराणामसीत्यादिनासिप्रत्ययः ( Pāṇ. v, 3, 39 ) । प्रकृतेरधादेशश्च । अधस्तात्पृथिव्यामन्यं पक्षमचीकृषमकार्षम् । कृष विलेखने । ण्यन्तस्य लुङि चङि नित्यं छन्दसीति ऋकारादेशः ( Pāṇ. vii. 4, 8 ) विलेखनं नामोत्पादनम् । उदपादयम् । आस्थापयमित्यर्थः ॥

Verse 12

*Padapāṭha* :

अ॒हम् अ॒स्मि॒ म॒हा॒ऽम॒हः अ॒भि॒ऽन॒भ्यम् उत्ऽई॒षि॒तः ।
कु॒वित् सोम॑स्य अपा॑म् इति॑ ॥ १२

*Sāyaṇa* :

अभिनभ्यम् । नाभौ मध्यस्थाने भवं नभ्यमन्तरिक्षम् । उगवादिभ्यो यदिति यत्प्रत्ययः ( Pāṇ. v, 1, 2 ) तत्रैव पाठान्नभादेशश्च । लक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः ( Pāṇ. ii, 1, 14 ) । समासस्वरः ( Pāṇ. vi, 1, 223 ) । अन्तरिक्षमभ्युदीषित उद्गतः सूर्यात्माहं महामहोऽस्मि महानस्मि । यद्वा महत्प्रभूतं महस्तेजो यस्य । प्रभूततेजस्कोऽस्मि । आन्महत इत्यात्वम् ( Pāṇ. vi, 3, 46 )

Verse 13

*Padapāṭha* :

गृ॒हः या॒मि अर॑ऽकृतः दे॒वेभ्यः ह॒व्य॒ऽवाह॑नः । कु॒वित्
सोम॑स्य अपा॑म् इति॑ ॥ १३

*Sāyaṇa* :

गृहः हविषां ग्रहीता अरंकृतो यजमानैरलंकृतोहं देवेभ्य इन्द्रादिभ्यो हव्यवाहनो हविषां वोढा प्रापयिता अग्न्यात्मा सन् यामि हवींषि प्रापयामि । या प्रापणे । लट् । हव्येनन्तः पादमिति वहेर्ञ्युट् ( Pāṇ. iii, 2, 66 ) । ञित्वादाद्युदात्तः ( Pāṇ. vi, 1, 139 ) समासे कृदुत्तरपदप्रकृतिस्वरः ( Pāṇ, vi, 2, 197 ) । इति यस्मात्कुविद्बहुवारं सोमस्य सोममपां पीतवानस्मि तस्मादेतान्यकार्षमितीन्द्रः स्वात्मानमेवास्तावीत ॥

---

1 '11a heptasyllabic verse'—Arnold.

[ *Note* :

गृहः. 'The unintelligible गृहो I explain as a contraction for गृहम्, which the collectors of the hymns did not understand'--Roth in S. L.[1] Compare note 3 on चन्द्रेव, No. 8, verse 7. Grassmann makes the word mean here, and only here, a servant.

---

## No. 32

*Maṇḍala* X　*Sūkta* 121

*Sāyaṇa* :

हिरण्यगर्भ इति दशर्चं नवमं सूक्तं प्रजापतिपुत्रस्य हिरण्यगर्भस्यार्षं त्रैष्टुभम् । कशब्दाभिधेयः प्रजापतिर्देवता । तथा चानुक्रान्तम् । हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायमिति । गतः सूक्तविनियोगः । प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणाद्यतिस्रोनुवाक्यास्ततस्तिस्रो याज्याः । सूत्रितं च । हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्या इति ( Āśval. iii, 8 ) । वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भ इत्येषा याज्या । सूत्रितं च । कयानश्चित्र आ भुवद्धिरण्यगर्भः समवर्तताग्र इति प्रतिप्रस्थाता वाजिने तृतीय इति ( Āśval. ii, 17 ) ॥

*Notes* :

[ Translated in Max Müller's A. S. L., pp. 569-70; Vedic Hymns, Part i. ( S. B. E ), pp. 1-2 ; and Muir's Sk. Texts, IV, 16-7.[2]

' With deep longing the poet seeks and searches after that God, who, being the beginning of the world and the first germ and the shaper of all life, reveals himself all over in nature. He sees the divinity in its manifestation now here, now there, now elsewhere and again and again he always asks doubting, seeking and longing, ' Who is this God to whom we present our offering ? '- Schroeder, Indiens Literatur und Cultur, p. 80.

---

[1] ' probably gṛhâm '—Arnold.

[2] Verse 1, 2, 3, 4, 10, translated also in Bloomfield's Rel. Ved., pp. 240-41. Verses 1-7 annotated in Lanman's Sanskrit Reader, pp. 391-92.

On the subject of the modernness of this hymn,[1] see M.M., Vedic Hymns, i, pp. 3-4. The student is advised to read also the notes in the volume on the several verses of this hymn. ]

Verse 1

*Padapāṭha* :

हिरण्यऽगर्भः सम् अवर्तत अग्रे भूतस्य जातः पतिः एकः आसीत् । सः दाधार पृथिवीम् द्याम् उत इमाम् कस्मै देवाय हविषा विधेम ॥ १

*Sāyaṇa* :

हिरण्यगर्भः हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः । तथा च तैत्तिरीयकम् । प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वायेति ( T. S. 5. 5, 1, 2 ) । यद्वा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते । अग्रे प्रपञ्चोत्पत्तेः प्राक् समवर्तत । मायाध्यक्षात्सिसृक्षोः परमात्मनः समजायत । यद्यपि परमात्मैव हिरण्यगर्भस्तथापि तदुपाधिभूतानां वियदादीनां ब्रह्मण उत्पत्तेः तदुपहितोऽप्युत्पन्न इत्युच्यते । स च जातो जातमात्र एव एकोऽद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः पतिरीश्वर आसीत् । न केवलं पतिरासीदेव अपि तर्हि स हिरण्यगर्भः पृथिवीं विस्तीर्णां द्यां दिवमुत अपि च इमामस्माभिर्दृश्यमानां पुरोवर्तिनीम् इमां भूमिम् । यद्वा पृथिवीत्यन्तरिक्षनाम । अन्तरिक्षं दिवं भूमिं च दाधार धारयति । छन्दसि लुङ्लङ्लिट इति सार्वकालिको लिट् ( Pāṇ. iii, 4, 6 ) । तुजादित्वादभ्यासदीर्घः ( Pāṇ. vi, 1. 7 ) । कस्मै । अत्र किंशब्दोऽनिर्ज्ञातस्वरूपत्वात्प्रजापतौ वर्तते । यद्वा सृष्ट्यर्थं कामयत इति कः । कमेर्डप्रत्ययः । यद्वा कं सुखम् । तद्रूपत्वात्क इत्युच्यते । अथवा इन्द्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदाय अहं कः कीदृशः स्यामित्युक्तवान् । स इन्द्रः प्रत्यूचे यदीदं ब्रवीष्यहं कः स्यामिति तदेव त्वं भवेति । अतः कारणात्क इति प्रजापतिराख्यायते । इन्द्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत् इत्यादिकं ब्राह्मणमत्रानुसंधेयम् ( Ait, Br. iii, 21 ) । यदासौ किंशब्दस्तदा सर्वनामत्वात्स्मैभावः सिद्धः । यदा तु यौगिकस्तदा व्यत्ययेनेति द्रष्टव्यम् । सावेकाच ( Pāṇ. vi, 1, 165 ) इति प्राप्तस्य न गोश्वन्साववर्णेति प्रतिषेधः ( Pāṇ. vi, 1, 182 ) । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । कं प्रजापतिं देवाय देवं दानादिगुणयुक्तं हविषा प्राजापत्यस्य पशोर्वपारूपेणैककपालात्मकेन पुरोडाशेन वा विधेम वयमृत्विजः परिचरेम । विधतिः परिचरणकर्मा ॥

---

[1] On the structure of the hymn, and the distinction of earlier from later portions, see Lanman's S. R., Notes on p. 392.

[ *Note* :

कस्मै. On the interpretation of this word in the refrain of this hymn, see M. M., Ved. Hymns, i. pp. 11–13[1]. ]

Verse 2

*Padapāṭha* :

यः आत्मऽदाः बलऽदाः यस्यं विश्वें उपऽआसंते प्रऽशिषंम् यस्यं देवाः । यस्यं छाया अमृतंम् यस्यं मृत्युः कस्मैं देवायं हविषां विधेम ॥ २

*Sāyaṇa* :

यः प्रजापतिः आत्मदाः आत्मनां दाता । आत्मानो हि सर्वे तस्मात्परमात्मन उत्पद्यन्ते । यथाग्नेः सकाशाद्विस्फुलिङ्गा जायन्ते तद्वत् । यद्वा आत्मनां शोधयिता । दैप् शोधने । आतो मनिन्निति विच् ( Pāṇ. iii, 2, 74 ) । बलदाः बलस्य च दाता शोधयिता वा । यस्य च प्रशिषं प्रकृष्टं शासनमाज्ञां विश्वे सर्वे प्राणिन उपासते प्रार्थयन्ते सेवन्ते वा । शासु अनुशिष्टौ । शास इदित्युपधाया इत्वम् ( Pāṇ. vi, 4, 34 ) । शासिवसिघसीनां चेति षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ( Pāṇ. vi, 2, 139 ) । आसेरनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । तिङि चोदात्तवतीति गतिरनुदात्ता ( Pāṇ. viii, 1, 71 ) । तथा देवा अपि यस्य प्रशासनमुपासते । अपि च अमृतममृतत्वम् । भावप्रधानो निर्देशः । यद्वा मृतं मरणं नास्त्यस्मिन्नित्यमृतं सुधा । बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वम् (Pāṇ. vi, 2, 116 ) । तदपि यस्य प्रजापतेः छाया छायेव वर्ति भवति । मृत्युर्यमश्च प्राणापहारी छायेव भवति । तस्मै कस्मै देवायेत्यादि समानं पूर्वेण । हविषा पुरोडाशात्मनेति तु विशेषः ॥

*Note* :

यस्य देवा...यस्य मृत्युः. It is possible that we are to supply or understand उपासते प्रशिषम् and छाया with these clauses. But in view of verse 4, I prefer to take them as independent sentences.

Verse 3

*Padapāṭha* :

यः प्राणतः निऽमिषतः महिऽत्वा एकंः इत् राजां जगंतः बभूवं । यः ईशें अस्य द्विऽपदंः चतुंःऽपदः कस्मैं देवायं हविषां विधेम ॥ ३

[1] also Hopki. s Rel. Ind.,; p. 182.

*Sāyaṇa* :

यो हिरण्यगर्भः प्राणतः प्रश्वसतः । अन प्राणने अदादिकः । शतुरनुम इति विभक्तेरुदात्तत्वम् ( Pāṇ. vi, 1, 173 ) । निमिषतः । अक्षिपक्ष्मचलनं कुर्वतः । अत्रापि पूर्ववद्विभक्तिरुदात्ता । जगतः जङ्गमस्य प्राणिजातस्य महित्वा महत्त्वेन । सुपां सुलुगिति तृतीयाया आकारः ( Paṇ. vii, 1, 39 ) । माहात्म्येन एक इव अद्वितीय एव सन् राजा बभूव ईश्वरो भवति । भवतेर्णलि लितीति प्रत्ययात्पूर्वस्योदात्तत्वम् ( Pāṇ. vi, 1, 193 ) । अस्य परिदृश्यमानस्य द्विपदः पादद्वययुक्तस्य मनुष्यादेः चतुष्पदः गवाश्वादेश्च यः प्रजापतिरीशे ईष्टे । ईश ऐश्वर्ये अदादिकोनुदात्तेत् । लोपस्त आत्मनेपदेष्विति तलोपः । ( Pāṇ. vii, 1, 41 ) । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः (Pāṇ. vi, 1, 186) । अस्य । ऊडिदमितीदमो विभक्तिरुदात्ता ( Pāṇ. vi, 1, 171 ) । द्वौ पादौ यस्य स द्विपात् । संख्यासुपूर्वस्येति पादशब्दस्यान्त्यलोपः समासान्तः । भसंज्ञायां पादः पदिति पद्भावः । द्वित्रिभ्यां पाद्दन्मूर्धस्विति एकदेशविकृतस्यानन्यत्वादुत्तरपदान्तोदात्तत्वम् ( Pāṅ. vi, 2, 197 ) । स्वरवर्जमेषैव चतुष्पद इत्यत्रापि प्रक्रिया । बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरः ( Pāṇ. vi. 2, 1 ) । पूर्वपदस्य त्रेः संख्याया ( Phit. ii, 5 ) इत्याद्युदात्तत्वम् । इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वम् । ईदृशो यः प्रजापतिः तस्मै कस्मा इत्यादि सुबोधम् । हविषा हृदयाद्यात्मनेत्ययमत्र विशेषः ॥

*Notes* :

1. प्राणतो निमिषतः ...... जगतः. 'The breathing, sleeping world,' the world of breath and sleep, as distinguished here on the one hand from the inanimate creation and on the other from the world of the gods, who sleep not. But जगतः too may be an adjective 'all that breathes and sleeps and moves.'

2. महित्वा.[1] Vedic instrumental as it is also in the next verse. [ Whitney, para. 327. c. ]

## Verse 4

*Padapāṭha* :

यस्यं इमे हिमऽवन्तः महिऽत्वा यस्यं समुद्रम् रसयां सह आहुः । यस्यं इमाः प्रऽदिशः यस्यं बाहूइति कस्मैं देवायं हविषां विधेम ॥ ४

---

1 M's V. G. S., p. 60; Lanman's N. I. V.

*Sāyaṇa* :

हिमा अस्मिन्सन्तीति हिमवान् । तेन बहुवचनान्तेन सर्वे पर्वता लक्ष्यन्ते यथा छत्रिणो गच्छन्तीति । हिमवन्तो हिमवदुपलक्षिता इमे दृश्यमानाः सर्वे पर्वता यस्य प्रजापतेर्महित्वा महत्त्वं माहात्म्यमैश्वर्यमित्याहुः । तेन सृष्टत्वात्तद्रूपेणावस्थानाद्वा । तथा रसया । रसो जलम् । तद्वती रसा नदी । अर्शआदित्वादच् । जातावेकवचनम् । रसाभिर्नदीभिः सह समुद्रम् । पूर्ववदेकवचनम् । सर्वान्समुद्रान् । यस्य महाभाग्यमित्याहुः कथयन्ति सृष्ट्यभिज्ञाः । यस्य चेमाः प्रदिशः प्रारम्भा आग्नेय्याद्याः कोणदिश ईशितव्याः । तथा बाहू वचनव्यत्ययः । बाहवो भुजाः भुजवत्प्राधान्ययुक्ताः प्रदिशश्च यस्य स्वभूताः । तस्मै कस्मै इत्यादि समानं पूर्वेण ॥

*Notes* :

1. रसया. 'The Rasā is a distant river, in some respects like the Gr. Okeanos'– M. M. See Muir, II, p. 343, note 119.]

2. प्रदिशः[1] Sāyaṇa's commentary here has given a good deal of trouble. A common explanation of the word विदिश् is दिशोर्मध्ये. Each intermediate point of the compass stands midway between two of the principal points. In प्रारम्भाः here Sāyaṇa is giving a similar etymological explanation of the synonymous term प्रदिश्. The intermediate points have that name because they are 'the beginnings' of the principal points. In other words, there is an intermediate point in front of each principal point. Having thus explained the name, he tells us what it denotes : आग्नेय्याद्याः कोणदिशः. Lastly ईशितव्याः is added to specify more closely the relation of dependence in which the intermediate regions stand to Prajāpati. They are his ( यस्य ), because they are under his governance. The next clause is treated in exactly the same way. बाहू is first paraphrased by भुजाः, and then we are told that बाहू or भुजाः here denotes the principal points of the compass. प्रदिशश्च here is, I believe, a mistake for दिशश्च. स्वभूताः is the corresponding word to ईशितव्याः. The principal points of the compass are his as being parts of himself.

This is against Müller, who says that the reading of the MSS. 'is simply unintelligible,' and reads यस्य चेमाः प्रदिशः प्राच्याद्यम्भा आग्नेय्याद्याः कोणदिश ईशानान्ता वा from conjecture. It will be seen

[1] diś and pradiś-region-mentioned among 'words characteristic of the popular Ṛg-Veda and the Atharvaveda'—Aronld, p. 39.

that I have amended my explanation of Sāyaṇa's meaning. I owe the explanation of प्रारम्भाः and the suggestion that we should write दिशश्च for प्रदिशश्च to [ R. G. ] Bhandarkar.

### Verse 5

*Padapāṭha* :

येन॑ द्यौः उ॒ग्रा पृ॒थि॒वी च॑ दृ॒ळ्हा येन॑ स्व१॒रिति॑ स्वः॑ स्त॒भि॒तम् येन॑ नाकः॑ । यः अ॒न्तरि॑क्षे रज॑सः वि॒ऽमानः॑ कस्मै॑ दे॒वाय॑ ह॒विषा॑ वि॒धे॒म ॥ ५

*Sāyaṇa* :

येन प्रजापतिना द्यौः अन्तरिक्षम् उग्रा उद्गूर्णविशेषा गहनरूपा वा पृथिवी भूमिश्च दृळ्हा येन स्थिरीकृता । स्वः स्वर्गश्च येन स्तभितं स्तब्धं कृतम् । यथा अधो न पतति तथोपर्यवस्थापितमित्यर्थः । ग्रसितस्कभितस्तभितेति निपात्यते । यथा नाक आदित्यश्च येनान्तरिक्षे स्तभितः यश्चान्तरिक्षे रजस उदकस्य विमानो निर्माता । तस्मै कस्मा इत्यादि गतम् ॥

### Verse 6

*Padapāṭha* :

यम् क्रन्द॑सी॒इति॑ अव॑सा त॒स्त॒भा॒ने इति॑ अ॒भि ऐक्षे॑ताम् मन॑सा रेज॑माने॒इति॑ । यत्र॑ अधि॑ सूरः॑ उत्ऽइ॑तः वि॒ऽभाति॑ कस्मै॑ दे॒वाय॑ ह॒विषा॑ वि॒धे॒म ॥ ६

*Sāyaṇa* :

क्रन्दितवान् रोदितवाननयोः प्रजापतिरिति क्रन्दसी द्यावापृथिव्यौ । श्रूयते हि यदरोदीत्तदनयो रोदस्त्वमिति ( Tait. Br. 2, 2, 9, 4 ) । ते अवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं तस्तभाने प्रजापतिना सृष्टे लब्धस्थैर्ये सत्यौ यं प्रजापतिं मनसा बुद्ध्याभ्यैक्षेताम् आवयोर्महत्त्वमनेन इत्यभ्यपश्येताम् । ईक्ष दर्शने । लङ्न्यङादित्वादाद्युदात्तः । कीदृश्यौ द्यावापृथिव्यौ । रेजमाने राजमाने दीप्यमाने । आकारस्य व्यत्ययेनैत्वम् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वा लिटः कानच् । फणां च सप्तानामित्येत्वाभ्यासलोपौ ( Pāṇ. vi, 4, 125 ) । छन्दस्युभयथेति सार्वधातुकत्वात् शप् । अभ्यस्तानामादिरित्याद्युदात्तत्वम् । यत्राधि यस्मिन्नाधारभूते प्रजापतौ सूरः सूर्यः उदितः उदयं प्राप्तः सन् विभाति प्रकाशते । उत्पूर्वादेतेः कर्मणि निष्ठा । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् (Pāṇ. vi, 2, 49) । तस्मै कस्मा इत्यादि सुज्ञानम् ॥

[ *Note* :

क्रन्दसी. ‘It would be well to read रोदसी for क्रन्दसी, and the various reading in A. V. iv, 2, 3 decidedly points in that direction--’ M. M. ]

Verse 7

*Padapāṭha* :

आपः॑ ह॒ यत् बृ॒ह॒तीः विश्व॑म् आय॑न् गर्भ॑म् द॒धा॑नाः ज॒नय॑न्तीः अ॒ग्निम् । ततः॑ दे॒वाना॑म् सम् अ॒व॒र्त॒त असुः॑ एकः॑ कस्मै॑ दे॒वाय॑ ह॒विषा॑ वि॒धे॒म ॥ ७

*Sāyaṇa* :

बृहतीः बृहत्यो महत्यः । जसि वा छन्दसीति पूर्वसवर्णदीर्घः । बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वम् ( Kāt. Vārt. on Pāṅ. vi, 1, 173 ) । अग्निम् उपलक्षणमेतत् । अग्न्युपलक्षितं सर्वं वियदादि भूतजात जनयन्तीः जनयन्त्यः तदर्थं गर्भं हिरणमयाण्डस्य गर्भभूतं प्रजापतिं दधानाः धारयन्त्यः आपो ह आप एव विश्वमायन् सर्वं जगद्व्याप्नुवन् । यद्यस्मात्तस्माद्धेतोर्देवानां देवादीनां सर्वेषां प्राणिनामसुः प्राणभूत एकः प्रजापतिः समवर्तत समजायत । यद्वा । यत् यं गर्भं दधाना आपो विश्वात्मनावस्थिताः ततो गर्भभूतात्प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत । अथवा । यत् लिङ्गवचनयोर्व्यत्ययः । उक्तलक्षणा या आपः विश्वमावृत्य स्थिताः ततस्ताभ्योऽद्भ्यः सकाशादेकोऽद्वितीयो असुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम[1] । तस्मै कस्मा इत्यादि गतम् ॥

Verse 8

*Padapāṭha* :

यः चि॒त् आपः॑ म॒हि॒ना प॒रि॒ऽअप॑श्यत् दक्ष॑म् द॒धा॑नाः ज॒नय॑न्तीः य॒ज्ञम् । यः दे॒वेषु॑ अधि॑ दे॒वः एकः॑ आसी॑त् कस्मै॑ दे॒वाय॑ ह॒विषा॑ वि॒धे॒म ॥ ८

*Sāyaṇa* :

यज्ञं यज्ञोपलक्षितं विकारजातं जनयन्तीः उत्पादयन्तीः तदर्थं दक्षं प्रपञ्चात्मना वर्धिष्णुं प्रजापतिमात्मनि दधानाः धारयित्रीः । दधातेर्हेतौ शानच् । अभ्यस्ताना-

[1] 7o hypersyllabic verse § 224. (p. 208.); § 152 i. (p. 102)—Arnold's Ved. Met.

मादिरित्याद्युदात्तत्वम् ( Pāṅ. vi, 1, 189 ) । ईदृशीरापः । व्यत्ययेन प्रथमा । अपः प्रलयकालीना महिना[1] महिम्ना । छान्दसो मलोपः । स्वमाहात्म्येन यश्चित् यश्च प्रजापतिः पर्यपश्यत् परितो दृष्टवान् । यश्च देवेष्वधि देवेषु मध्ये देवः तेषा-मपीश्वरः सन् एकः अद्वितीयः आसीत भवति । अस्तेश्छान्दसो लङ् । अस्तिसि-चोपृक्ते इतीडागमः ( Pāṇ. vii, 3, 96 ) । तस्मै कस्मा इत्यादि गतम् ॥

[ *Notes* :

1. आपः ( Acc. ) 'The waters here referred to have to be understood as the waters in the beginning of the creation, where as we read ( ṚV. x, 29, 3 ), everything was like a sea without a light '— M. M.

2. 'Grassmann proposes to omit ekaḥ, because it is absent in the Maitrāyaṇī Śākhā. The metre shows the same. '— M. M. ]

Verse 9

*Padapāṭha* :

मा नः हिंसीत् जनिता यः पृथिव्याः यः वा दिवम् सत्यऽ-धर्मा जजान । यः च अपः चन्द्राः बृहतीः जजान कस्मै देवाय हविषा विधेम ॥ ९

*Sāyaṇa* :

स प्रजापतिः नोऽस्मान् मा हिंसीत् मा बाधताम् । यः पृथिव्याः भूमेर्जनिता जनयिता स्रष्टा । जनिता मन्त्र ( Pāṇ. vi, 4, 53 ) इति णिलोपो निपात्यते । उदात्तयणो हल्पूर्वादिति पृथिवीशब्दाद्विभक्तेरुदात्तत्वम् ( Pāṇ. vi, 1, 174 ) । यो वा यश्च सत्यधर्मा सत्यमवितथं धर्मः जगतो धारणं यस्य तादृशः प्रजापतिर्दि-वमन्तरिक्षोपलक्षितान्सर्वांल्लोकान् जजान जनयामास । जनी प्रादुर्भावे । णिचि वृद्धौ जनीजृष्क्नसुरञ्ज ( Dhāt. xix, 63-67 ) इति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वम् । ततो लिटि अमन्त्र ( Pāṇ. iii, 1, 35 ) इति निषेधादाम्प्रत्ययाभावे तिपो णलि वृद्धौ लितीति प्रत्ययात्पूर्वस्योदात्तत्वम् ( Pāṇ. vi, 1, 93 ) । यश्च बृहतीः महतीः चन्द्राः आह्लादिनीः अपः उदकानि जजान जनयामास । ऊडिद-मित्यादिना ( Pāṇ vi, 1, 171 ) । अप्शब्दादुत्तरस्य शस उदात्तत्वम् । तस्मै कस्मा इत्यादि गतम् ॥

Verse 10

*Padapāṭha* :

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ १०

---

1 M's. V. G. S., para 90. 2. ( p. 69 ).

*Sāyaṇa* :

इळादधाख्य इष्टयने प्राजापत्यस्य हविषः प्रजापत इत्येषानुवाक्या । सूत्रितं च प्राजापत्य इळादधः प्रजापते न त्वदेतान्यन्य इति (Āśval. ii, 14) । केशनखकीटादिभिर्दुष्टानि हवींष्यनयैवाप्सु प्रक्षिपेत् । सूत्रितं च । अपोऽभ्यवहरेयुः प्रजापते न त्वदेतान्यन्य इति ( Āśval. iii, 10 ) । चौलादिकर्मस्वप्येषा होमार्था । सूत्रितं च तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च इति ( Āśval. Gṛh. i, 4, 4 ) ।

हे प्रजापते त्वम् त्वत्तोऽन्यः कश्चित् एतानि इदानीं वर्तमानानि विश्वा विश्वानि सर्वाणि । शेश्छन्दसि बहुलमिति शेर्लोपः ( Pāṇ. vi, 1, 70 ) । जातानि प्रथमविकारभाञ्जि ता तानि सर्वाणि भूतजातानि न परि बभूव न परिगृह्णाति न व्याप्नोति । त्वमेवैतानि परिगृह्य स्रष्टुं शक्नोषीति भावः । परिपूर्वो भवतिः परिग्रहार्थः । वयं च यत्कामाः यत्फलं कामयमानाः ते तुभ्यं जुहुमः हवींषि प्रयच्छामः तत्फलं नोऽस्माकमस्तु भवतु । तथा वयं च रयीणां धनानां पतय ईश्वराः स्याम भवेम । नामन्यतरस्यामिति नाम उदात्तत्वम् ( Pāṇ. vi, 1, 177 ) ॥

[ *Note* :

It should be noticed that the Padapāṭha of this verse in no way differs from the Saṁhitāpāṭha. This is one of the six verses, which, according to Kaegi, 'appear to have forced themselves into the Ṛk text only after the introduction of the Padapāṭha and show the Saṁhitā form even in the Pada manuscripts.'— Kaegi's Ṛgv. tr. by Arrowsmith, n. 79, p. 120. ][1]

---

## No. 33

*Maṇḍala* X *Sūkta* 125

*Sāyaṇa* :

अहमित्यष्टर्चं त्रयोदशं सूक्तम् । अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत् । अतः सा ऋषिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति । द्वितीया जगती शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रान्तम् । अहमष्टौ वागाम्भृणी तुष्टावात्मानं द्वितीया जगतीति । गतो विनियोगः ॥

[ *Note* :

For some remarks by Max Müller on this hymn see his 'Vedānta Philosophy, pp. 144-7 See also Griffith's notes. ]

---

[1] [ The other five vss. are: vii, 52, 12; x, 20, 1; x, 190, 1-3 ( the whole तृच ). See also n. 373, p. 178f., ibid. ].

Verse 1

*Padapāṭha* :

**अहम् रुद्रेभिः वसुऽभिः चरामि अहम् आदित्यैः उत विश्वऽदेवैः । अहम् मित्रावरुणा उभा बिभर्मि अहम् इन्द्राग्नी-इति अहम् अश्विना उभा ॥ १**

*Sāyaṇa* :

अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यद्ब्रह्म जगत्कारणं तद्रूपा भवन्ती रुद्रेभी रुद्रैरेकादशभिः । इत्थंभावे तृतीया । तदात्मना चरामि । एवं वसुभिरित्यादौ तत्तदात्मना चरामीति योज्यम् । तथा मित्रावरुणा मित्रं च वरुणं च । सुपां सुलुगिति द्वितीयाया आकारः । उभा उभौ अहमेव ब्रह्म भूता बिभर्मि धारयामि । इन्द्राग्नी अप्यहमेव धारयामि । उभा उभौ अश्विना अश्विनौ अप्यहमेव धारयामि । मयि हि सर्वं जगत् शुक्तौ रजतमिवाध्यस्तं सद्दृश्यते । माया च जगदाकारेण विवर्तते । तादृश्या मायाया आधारत्वेन असङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्यात्पत्तिः ॥

Verse 2

*Padapāṭha* :

**अहम् सोमम् आहनसम् बिभर्मि अहम् त्वष्टारम् उत पूषणम् भगम् । अहम् दधामि द्रविणम् हविष्मते सुप्रऽअव्ये यजमानाय सुन्वते ॥ २**

*Sāyaṇa* :

आहनसमाहन्तव्यमभिषोतव्यं सोमं यद्वा शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोममहमेव बिभर्मि । तथा त्वष्टारमुत अपि च पूषणं भगं च अहमेव बिभर्मि । तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे । अवतेस्तर्पणार्थाद्वितॄस्तृतन्त्रिभ्य ईरितीकारप्रत्ययः ( Uṇ. iii, 158 ) । चतुर्थ्येकवचने यणुदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति सुपः स्वरितत्वम् (Pāṇ. viii, 2, 4 ) । सुन्वते सोमाभिषवं कुर्वते । शतुरनुम इति चतुर्थ्या उदात्तत्वम् । ईदृशाय यजमानाय द्रविणं धनं यागफलरूपमहमेव धारयामि । एतच्च ब्रह्मणः फलदातृत्वं फलमत उपपत्तेरित्यधिकरणे (Br. Su. iii. 2, 38) भगवता भाष्यकारेण समर्थितम् ॥

*Notes* :

आहनसम्. The word occurs in the following passages only. ii, 13, 1 तदाहना अभवत् पिप्युषी पयः ( ' Then was she swelling full

of milk. '— Sāyaṇa, आहनाः आहन्तव्योऽभिषोतव्यो भवति । आहना इति सकारान्तमिदं पदम् । तथा च मन्त्रवर्णः । ये त मदा आहनसो विहायस इति. v, 42, 13 य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः-- Sāyaṇa, इन्द्रः पर्जन्यो वा आहना आहन्ता सेक्ता दुहितुः दुहितृस्थानीयायाः पृथिव्या हिताय वक्षणासु नदीषु रूपा रूपाणि मिनानः कुर्वाणः इदमुदकं नोऽस्मभ्यम् अकृणोत् करोतु. ix, 75, 5 ये ते मदा आहनसः ( as here, of the Soma )-- Sāyaṇa, आहनसः आहननवन्तो वचनवन्त इति यास्कः ( Nir. iv, 15 ) । शत्रूणामभिमृत्यन हन्तारः आभिहन्यमानाः अभिषूयमाणाः स्तुतिमन्तः शब्दवन्तो वा x, 10, 6 आहनः ( Voc )— Sāyaṇa हे आहनः आहन्तर्मर्यादया हिंसित । स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातनं स्वर्गप्रापणेन निग्रहानुग्रहयोः कर्तरित्यर्थः । एवंभूत हे यम &c Verse 8 of the same hymn, आहनः ( Compare Nir. v. 2 )— Sāyaṇa, हे आहनः ममापहन्त्रि असह्यभाषणेन दुःखयित्रि.

2. सुप्राव्य This is also a rare word. Roth, who makes it mean *very attentive*, *zealous*, quotes i, 60, 1 ( दूत ). Sāyaṇa, सुप्राव्यं सुष्टु प्रकर्षेण रक्षितारं दूतम्... । सुप्राव्यम् । सुष्टु प्रकर्षेण अवति रक्षतीति सुप्रावीः । उपसर्गद्वयोपसृष्टादवतेरवितॄस्तॄतन्त्रिभ्य ईरितीकारप्रत्ययः ( Uṇ. iii 156, &c. ); i, 83, 1 ( ( मर्त्य ) Sāyaṇa, सुप्रावीः सुष्टु प्ररक्षितः... । सुप्रावीः अवितॄस्तॄतन्त्रिभ्य ईरित्यवतेरीकारप्रत्ययः ; ii, 26, 1 ; iv, 25, 5, 6, and our passage.

## Verse 3

*Padapāṭha :*

**अहम् राष्ट्री संऽगमनी वसूनाम् चिकितुषी प्रथमा यज्ञियानाम् । ताम् मा देवाः वि अदधुः पुरुऽत्रा भूरिऽस्थात्राम् भूरि आऽवेशयन्तीम् ॥ ३**

*Sāyaṇa :*

अहं राष्ट्री । ईश्वरनामैतत् । सर्वस्य जगत ईश्वरी । तथा वसूनां धनानां संगमनी संगमयित्री उपासकानां प्रापयित्री । चिकितुषी यत्साक्षात्कर्तव्यं परं ब्रह्म तज्ज्ञातवती स्वात्मतया साक्षात्कृतवती । अत एव यज्ञियानां यज्ञार्हाणां प्रथमा मुख्या । या एवंगुणविशिष्टाहं तां मां भूरिस्थात्रां बहुभावेन प्रपञ्चात्मनावतिष्ठमानां भूरि भूरीणि बहूनि भूतजातानि आवेशयन्तीं जीवभावेन आत्मानं प्रवेशयन्तीम् ईदृशीं मां पुरुत्रा बहुषु देशेषु व्यदधुः देवा विदधति कुर्वन्ति । उक्तप्रकारेण वैश्वरूप्येणावस्थानात् यद्यत्कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः ॥

*Notes :*

1. संगमनी वसूनाम्. Compare संगमनं जनानाम्, No. 29, verse 1, p. 257.

2. चिकितुषी प्रथमा यज्ञियानाम्. 'The first to know the gods.' Compare verse 1. So Roth and Grassmann. Ludwig follows, and holds that चिकितुषी answers to राष्ट्री and प्रथमा यज्ञियानां to सगमनी वसूनाम्.

3. भूरि. Perhaps a singular. For आवेशयन्तीम् Ludwig notes that the reading in the Atharvaveda is आवेशयन्तः. [ As to भूरि being also a plur. form[1], see Whitney, paras, 338 a and 340 k.]

Verse 4

*Padapāṭha* :

मयां सः अन्नंम् अत्ति यः विऽपश्यंति यः प्राणिंति यः ईम् शृणोतिं उक्तम् । अमन्तवंः माम् ते उपं क्षियन्ति श्रुधि श्रुत श्रद्धिऽवम् ते वदामि ॥ ४

*Sāyaṇa* :

योऽन्नमत्ति स भोक्तृशक्तिरूपया मयैवान्नमत्ति । यश्च विपश्यति आलोकयतीत्यर्थः । यश्च प्राणिति श्वासोच्छ्वासरूपं व्यापारं करोति सोपि मयैव । यश्चोक्तं शृणोति । श्रु श्रवणे श्रुवः शृ चेति श्रुधातोः शृभावः । य ईदृशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमानाः अजानन्तः उप क्षियन्ति उपक्षीणाः संसारेण हीना भवन्ति मनेरौणादिकस्तुप्रत्ययः (Uṇ. 78) । नञ्समासे व्यत्ययेनान्तोदात्तत्वम् । यद्वा । भावे तुप्रत्ययः। ततो बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदान्तोदात्तत्वम् ( Pāṇ. vi, 2, 172 ) । माममन्तवः मद्विषयज्ञानरहिता इत्यर्थः । हे श्रुत विश्रुत सखे श्रुधि मया वक्ष्यमाणं शृणु । छान्दसो विकरणस्य लुक् । श्रुशृणुपृकृवृभ्य इति हेर्धिभावः । किं तच्छ्रोतव्यम् । श्रद्धिवम् । श्रद्धिः श्रद्धा तया युक्तम् । श्रद्धायत्नेन लभ्यमित्यर्थः । श्रदन्तरोरुपसर्गवद्वृत्तिरिष्यत इति ( Pāṇ. i. 4, 57, vart. 2 ) श्रच्छब्दस्योपसर्गवद्वर्तमानत्वादुपसर्गे घोः किरिति किप्रत्यय ( Pāṇ iii. 3, 92 ) । मत्वर्थीयो वः । ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ॥[2]

*Notes* :

1. All the authorities follow Sāyaṇa, and make no distinction between the relative clauses and the first clause सो

---

[1] M's. V. G S., para 98 B, p. 82, note 4.

[2] '4a sá 4b i ; § 178' ( īm : i is to be restored occasionally in the popular Ṛgveda. ) — Arnold's. Ved. Met. pp. 324, 142.

अन्नमत्ति. But is not the meaning that all that see and breathe and hear, that is, the whole living world, draw their food from the divine word ? Compare the clause which follows— अमन्तवो मां त उप क्षियन्ति.

2. अमन्तवः. Compare the use of अमन्यमानान् in No. 6, verse 10.

3. श्रुत. In his translation Ludwig follows Roth and Grassmann in taking this, against Sāyaṇa, as an imperative of the second person plural. In his commentary he takes श्रुतश्रद्धिवं, against the Pada text, as one word 'what old tradition bids believe.'

Verse 5

*Padapāṭha* :

अहम् एव स्वयम् इदम् वदामि जुष्टम् देवेभिः उत मानुषेभिः । यम् कामये तम्ऽतम् उग्रम् कृणोमि तम् ब्रह्माणम् तम् ऋषिम् तम् सुऽमेधाम् ॥ ५

*Sāyaṇa* :

अहं स्वयमेवेदं वस्तु ब्रह्मात्मकं वदामि उपदिशामि । देवेभिः देवैरिन्द्रादिभिरपि जुष्टं सेवितमुत अपि च मानुषेभिः मनुष्यैरपि जुष्टम् । ईदृग्वस्त्वात्मिकाहं यं कामये यं पुरुषं रक्षितुमहं वाञ्छामि तं तं पुरुषमुग्रं कृणोमि सर्वेभ्योऽधिकं करोमि तमेव ब्रह्माणं स्रष्टारं करोमि तमेव ऋषिमतीन्द्रियार्थदर्शिनं करोमि तमेव सुमेधां शोभनप्रज्ञं च करोमि ॥

[ *Note* :

'This would seem to prove that sometimes, at least, the *brahman* was such not by birth or nature, but by special favour and inspiration of the goddess. In this passage, therefore, the word cannot denote the member of a caste, who would not be dependent on the good will of Vāc for his position'—Muir, I, p. 246. ]

Verse 6

*Padapāṭha* :

अहम् रुद्राय धनुः आ तनोमि ब्रह्मऽद्विषे शरवे हन्तवै ऊँ इति । अहम् जनाय सऽमदम् कृणोमि अहम् द्यावापृथिवी इति आ विवेश ॥ ६

*Sāyaṇa* :

पुरा त्रिपुराविजयसमये रुद्राय रुद्रस्य । षष्ठ्यर्थे चतुर्थी । महादेवस्य धनुश्चापमहमातनोमि ज्यया आततं करोमि । किमर्थम् । ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरं हन्तवे हन्तुं हिंसितुम् । हन्तेस्तुमर्थे सेसेनिति तवेप्रत्ययः[1] ( Pāṇ. iii. 4, 9 ) । अन्तश्च तवै युगपदित्याद्यन्तयोर्युगपदुदात्तत्वम्[2] ( Pāṇ. vi, 1, 200 ) । शॄ हिंसायामित्यस्माच्छॄस्वृस्निहीत्यादिना उप्रत्ययः ( Uṇ. 10 ) । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । उशब्दः पूरकः । अहमेव समदम् । समानं माद्यन्त्यस्मिन्निति समत्संग्रामः । स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि करोमि । तथा द्यावापृथिवी दिवं च पृथिवीं चान्तर्यामितया अहमेवा विवेश प्रविष्टवती ॥

*Note* :

ब्रह्मद्विषे शरवे हन्तवा उ. 'That his arrow may slay all that hate God.' For the construction, see Whitney paras, 287 and 982a. शरु is a weapon as in i, 100, 18. Sāyaṇa शर्वे = हिंसकेन वज्रेण. [ Cf. also, ii, 12, 10 ( No. 6, p. 123 *supra* )— Sāy. शरुर्वज्रः. ]

## Verse 7

*Padapāṭha* :

**अहम् सुवे पितरम् अस्य मूर्धन् मम योनिः अप्ऽसु अन्तरिति समुद्रे । ततः वि तिष्ठे भुवना अनु विश्वा उत अमूम् द्याम् वर्ष्मणा उप स्पृशामि ॥ ७**

*Sāyaṇa* :

द्यौः पितेति श्रुतेः पिता द्यौः । पितरं दिवमहं सुवे प्रसुवे जनयामि । आत्मन आकाशः संभूत इति श्रुतेः ( T. A. viii, 1 ) । कुत्रेति तदाह । अस्य परमात्मनः मूर्धन् मूर्धनि उपरि । कारणभूते तस्मिन् हि वियदादि कार्यजातं सर्वं वर्तते । तन्तुषु पट इव । मम च योनिः कारणं समुद्रे । समुद्द्रवन्त्यस्माद्भूतजातानीति समुद्रः परमात्मा । तस्मिन्नप्सु व्यापनशीलासु धीवृत्तिष्वन्तर्मध्ये यद्ब्रह्म चैतन्यं तन्मम कारणमित्यर्थः । यत ईदृग्भूताहमस्मि ततो हेतोर्विश्वा विश्वानि सर्वाणि भुवनानि भूतजातान्यनुप्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि । समवप्रविभ्यः स्थ इत्यात्मनेपदम् ( Pāṇ. 1, 3, 22 ) । उत अपि च अमूं द्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम् । उपलक्षणमेतत् । एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा मायात्मकेन मदीयेन देहेन उप स्पृशामि । यद्वा । अस्य भूलोकस्य मूर्धन्मूर्धनि उपरि अहं पितरमाकाशं सुवे । समुद्रे जलधौ अप्सु उदकेषु अन्तर्मध्ये मम योनिः कारणभूतोऽम्भृ-

---

1 M's V. G. S. p. 336. 2 M's V. G. S. App. III para 7 ( p. 452 ).

णाख्य ऋषिर्वर्तते । यद्वा । समुद्रेऽन्तरिक्षेऽप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते । ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि । अन्यत्समानम् ॥

*Notes* :

1. अस्य मूर्धन्. 'At the head of this, that is of all that is; it is left undetermined by what name the God is meant to be called.' Roth in S. L.

[ 2. वर्ष्मणा. From the same stem as वर्षीयस्, वर्षिष्ठ and means ( 1 ) height, highest space; ( 2 ) the crown ( of the head ) .-- Gr. ]

Verse 8

*Padapāṭha* :

अहम् एव वातःऽइव प्र वामि आऽरभमाणा भुवनानि विश्वा । परः दिवा परः एना पृथिव्या एतावती महिना सम् बभूव ॥ ८

*Sāyaṇa* :

विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणानधिष्ठिता स्वयमेव प्र वामि प्रवर्ते । वात इव । यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । परो दिवा । पर इति सकारान्तं परस्तादित्यर्थे वर्तते यथाध इत्यधस्तादर्थे । तद्योगे च तृतीया सर्वत्र दृश्यते । दिवा आकाशस्य परस्तात् । एना पृथिव्या । द्वितीयाटौस्स्वेन इतीदम एनादेशः । अस्याः पृथिव्या परः परस्तात् । द्यावापृथिव्योरुपादानमुपलक्षणम् । एतदुपलक्षितात्सर्वस्माद्विकारजातात्परस्ताद्वर्तमाना असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना महिम्ना एतावती सं बभूव । एतच्छब्देनोक्तं सर्वं परामृश्यते । एतत्परिमाणमस्याः । यत्तदेतेभ्यः परिमाण इति वतुप् ( Pāṇ. v. 2, 39 ) । आ सर्वनाम्न इत्यात्वम् (Pāṇ. vi, 3, 91) । सर्वजगदात्मनाहं संभूतास्मि । महच्छब्दादिमनिचि टेरिति टिलोपः ( Pāṇ. vi, 4, 155 ) । ततः तृतीयायामुदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम् ( Pāṇ. vi, 1, 168 ) । छान्दसो मलोपः[1] ॥

[ *Note* :

महिना. Whitney, para 425 e.[2] ]

---

[1] Sa evā-Arnold.   [2] M's V. G. S., p. 69.

## No. 34

*Maṇḍala* X *Sūkta* 168

*Sāyaṇa* :

वात[1]स्येति चतुर्ऋचं सप्तदशं सूक्तं वातगोत्रस्यानिलाख्यस्यार्षं त्रैष्टुभं वायुदेवताकम्। तथा चानुक्रान्तम्। वातस्यानिलो वातायनो वायव्यमिति गतो विनियोगः॥

*Note* :

Translated in Vedic Hymns, Part i. ( S. B. E. ), p. 449, and Muir's Sk. Texts, V, pp. 145–6 ].[2]

### Verse 1

*Padapāṭha* :

**वात॑स्य नु म॒हि॒मान॑म् रथ॑स्य रु॒जन् ए॒ति स्त॒नय॑न् अ॒स्य घोषः॑। दि॒वि॒ऽस्पृक् या॒ति अ॒रु॒णानि॑ कृ॒ण्वन् उ॒तो इति॑ ए॒ति पृ॒थि॒व्या रे॒णुम् अस्य॑न्॥ १**

*Sāyaṇa* :

वातस्य वायोः रथस्य रंहणशीलस्य महिमानं माहात्म्यं नु[3] क्षिप्रं प्रब्रवीमि। अस्य वायोर्घोषः शब्दः स्तनयन् गिरिगह्वरादिषु विविधं शब्दमुत्पादयन् रुजन् सर्वं स्थावरजङ्गमजातं भञ्जन् एति गच्छति। स च वायुः दिविस्पृक् दिवमाकाशं स्पृशन् व्याप्नुवन् अरुणानि अरुणवर्णानि विकृतरूपाणि दिगन्तराणि कृण्वन् कुर्वन् याति प्राप्नोति। उतो अपि च पृथिव्याः भूमे रेणु पांसुमस्यन् गृहीत्वा सर्वत्र विक्षिपन् एति गच्छति। अत एव चारुणानि कृण्वन्नित्युक्तम्॥

*Notes* :

1. अस्य. That is रथस्य, not वायोः, as Sāyaṇa takes it. For दिविस्पृक् as an epithet of the chariot of the god compare No. 9, verse 4.

2. अरुणानि कृण्वन्. ' Reddening the sky. ' 'The red sky at sunset is perhaps what is meant. ' Ludwig.

---

[1] Vāta : for Maruts, Rudra, Vāyu and Vāta see M's Ved. Myth., pp. 74-83; Bloomfield's Rel. Ved., p. 155. Vāta identified with Teut. Wotan, Wodan, Odhin ( ibid ); the identification regarded as 'very doubtful' by Mac donell. Sk. Vāta = Av. Vāta-wind, from √ vā-to blow.

[2] Also in Bloomfield's Rel. Ved., p. 155 in verse.

[3] nú-Arnold.

Verse 2

*Padapāṭha* :

सम् प्र ईरते अनु वातस्य विऽस्थाः आ एनम् गच्छन्ति समनम् न योषाः । ताभिः सऽयुक् सऽरथम् देवः ईयते अस्य विश्वस्य भुवनस्य राजा ॥ २

*Sāyaṇa* :

विष्ठाः विशेषेणावस्थिताः पर्वतायाः वातस्य वायोः अनुगुणं सं प्रेरते संप्रगच्छन्ति । यदभिमुखो वायुर्वर्तते तदभिमुखाः प्रक्रमन्त इत्यर्थः । समनं न संग्राममिव एनं वायुं योषाः अश्वयोषितः वडवाः आ गच्छन्ति । ताभिर्वडवाभिः सयुक् स्वयमेव युज्यमानः सरथं समानमेकं रथमारुह्य देवो दीप्यमानो वायुः ईयते गच्छति । ईङ् गतौ । अस्य विश्वस्य सर्वस्य भुवनस्य द्वितीयविकारभाजो भूतजातस्य राजा स्वामी भवति । यद्वा समनं धृष्टं पुरुषं योषाः कामिन्य इव । एवं वायु तरुगुल्मादिरूपाः स्त्रियोऽभिगच्छन्ति । ताभिः सरथं सहरथं देव ईयत इति ॥

*Notes* :

1. सं प्रेरते अनु वातस्य विष्ठाः. The construction and the meaning of this sentence are alike obscure. Ludwig makes विष्ठाः the accusative after अनु, and supplies a nominative to the verb from the next verse. 'They rush ( *i. e.*, the waters rush ) in the tracks of the wind.' But there is no authority for the meaning given to विष्ठाः. Roth, followed by Grassmann, takes वातस्य विष्ठाः together as the subject of the sentence. Roth translates 'the winds of all sorts'; and Grassmann, 'the wings of the wind.' Sāyaṇa is evidently at sea. The difficulty is as to the word विष्ठा, which does not occur elsewhere in the Ṛgveda. Roth, deriving it from स्था with वि, quotes गवामश्वानां वयसश्च विष्ठा ( or विष्ठाः as he would prefer to read : the pada text has विष्ठा ) *the different kinds of birds*, AV. xii. 1, 5 ; देवानां विष्ठामनु यो वितस्थे *the different gods*, T. Br. iii, 7, 5, 3 ; ṚV. x, 168, 2 ( our passage ) ; बुध्न्या उपमा विष्ठाः VS. xiii, 3 ; यज्ञस्य 23, 57, fg. ; Kauṣ. 3 ; दर्शन्नु ता वरुण यास्ते विष्ठाः *different forms of manifestation* AV. v, 1, 8 ; vii, 3, 1 ( compare TS. i, 7, 12, 2 ) ; स्वर्गा लोका अमृतेन विष्ठा इषं दुहाम् *the heavenly worlds, with the immortals, the various*, &c., AV. xviii, 4, 4 ; त्रिवृन्ना विष्ठया ( the

MSS. have विद्वया ; but compare Āśval. Sr. iv, 12, 2 ) स्तोमैरह्नाम ( विपर्ह्ने ) *with the different days*, TS. iv, 4, 12, 1, 3.

2. एनं गच्छन्ति समनं न योषाः. 'They go to him as women to an assembly.' But समन may have another meaning. I translate Roth's article on the word. 'समन ( from सम् prep. ) n. *meeting*, as follows ( 1 ) *embrace* आचरन्ती समनेव ( for समनामिव Nir. ix, 40 ) योषा RV. vi, 75, 4 ; in the same way, iv, 58, 8 ( Nir. vii. 17 ) ; x, 168, 2 ( our passage ).— ( 2 ) *contest, battle*, Naigh. 11, 17 ; Nir. ix, 14, 18 ; RV. vi, 75, 3, 5 ; वाजी न सप्तिः समना जिगाति ix, 96, 9 ; आ यन्नः समने पर्षथः x, 143, 4 ; VS. ix, 9.— ( 3 ) *meeting, holiday gathering* समयुवो न समनेष्वञ्जन् *they adorned themselves as girls at a fair* RV. vii, 2, 5 ; ii, 16, 7 ; होतेव याति समनेषु रेभन् ix, 97, 47; समनेव वपुष्यतः कृणवन् मानुषा युगा *he makes men a wondering circle of spectators*, that is, *draws all eyes to himself*, viii, 51, 9 ; x, 55, 5 ; 86, 10 ; AV. ii, 36, 1 ; अन्यासां समनं यती *to the feasts of others*, that is, *bridal parties*, vi, 60, 2.— ( 4 ) *traffic, business* : वि या सृजति समनं व्यर्थिनः *who sends out the merchants to their business*, RV. i, 48, 6. Compare असमन ( '*separating*,' RV. i, 140, 4 ; vii, 5, 3 ). In S. L. Roth has the note ' They go together to the dance.'

3. सयुक्. 'Joined with.' Nom sing. masc. Compare सयुजा i, 164, 20 ( Sāyaṇa=समानयोगौ ), सयुजः iii, 30, 11 ( Sāyaṇa=संगतान् ) and सयुजम् x, 124, 9 ( Sāyaṇa=सखायम् ). These are all the passages in which the word occurs in the RV.

4. सरथम्. ' An adverb. *On one chariot with* ( third case ; opposed to नानारथम् ) ; [ Cf. No. 6 Vs. 8, p. 122 ] ; then generally *together with*, RV. i, 71, 6 ; 108, 1 ; iii, 4, 11 ; 6, 9 ; इन्द्रेण याथ सरथं सुते सचा 60, 4 ; iv, 47, 3 ; देवैः सरथं स बर्हिषि सीदन्नि होता v, 11, 2 ; सरथा यातमर्वाक् 43, 8 ; vi, 20, 5 ; x, 15, 10 ; 75, 6 ; 84, 1 ; 168, 2 ( our passage ) ; AV. iii, 21, 3 ; ix, 2, 9, Kauṣ ; 117, 135. Comp. सारथिः ' Roth in P. W. B.

Verse 3

*Padapāṭha* :

**अन्तरिक्षे पथिऽभिः ईयमानः न नि विशते कतमत् चन अहः इति । अपाम् सखा प्रथमऽजाः ऋतऽवा क्व स्वित् जातः कुतः आ बभूव ॥ ३**

*Sāyaṇa* :

अन्तरिक्षे नभसि विद्यमानैः पथिभिः मार्गैः ईयमानो गच्छन् वायुः कतमच्चनाहः एकमपि दिनं न नि विशते नोपविशति । किंतु सर्वदैव गच्छति । नेर्विश इत्यात्मनेपदम् ( Pāṇ. 1, 3, 17 ) । अपि च अपामुदकानां सखा । वायुर्वै वृष्ट्या ईशत इति श्रुतेः । प्रथमजाः सर्वेभ्यः प्राणिभ्यः पूर्वोत्पन्न एव ऋतावा सत्यवान् यज्ञवान्वा । एव भूतो वायुः क्व स्वित् कुत्र खलु देशे जातः उत्पन्नः कुतः कस्माच्च देशान्निष्क्रम्य आबभूव इदं सर्वं जगद्व्याप्नोत । सर्वदा सर्वत्र वर्तमानत्वादस्योत्पत्तिर्व्याप्तिप्रकारश्च न केनापि ज्ञातुं शक्यत इत्यर्थः ॥

*Note* :

न नि विशते कतमच्चनाहः. Roth believes that we should read अह for अहः here, so as to make कतमच्चनाह an emphatic 'never.'

Verse 4

*Padapāṭha* :

**आत्मा देवानांम् भुवनस्य गर्भः यथाऽवशम् चरति देवः एषः । घोषाः इत् अस्य शृण्विरे न रूपम् तस्मै वाताय हविषा विधेम ॥ ४**

*Sāyaṇa* :

अयं वायुः देवानामिन्द्रादीनामप्यात्मा जीवरूपेण तेष्ववस्थानात् । भुवनस्यापि भूतजातस्य गर्भः गर्भवत्प्राणरूपेणान्तर्वर्तमान एष ईदृशो देवो यथावशं यथ कामं यथेच्छं चरति वर्तते । अनिवारितगतिः सन् क्वचिच्छाघ्रं गच्छति क्वचिच्छनैर्गच्छति कुतश्चिच्छरीरान्निष्क्रामति अन्यच्च शरीरं प्रविशतीत्येवं यथेच्छं वर्तत इत्यर्थः । अस्य वायोः आगच्छतो घोषा इत् शब्दा एव शृण्विरे श्रूयन्ते । रूपं स्वरूपं तु न दृश्यते । नीरूपत्वात् । अदृग्विषयत्वेन शब्देनैवानुमीयते इत्यर्थः तस्मै वाताय वायवे हविषा चरुपुरोडाशादिलक्षणेन विधेम परिचरेम ॥

---

## APPENDIX To NOTES.

*Paras,* 80 *to* 83, 85 *to* 87, *and* 90 *of Whitney's Sanskrit Grammar.*[1]

80. The phenomena of accent are, by the Hindu grammarians of all ages alike, described and treated as depending on a variation of tone or pitch ; of any difference of stress involved, they make no account.

81. The primary tones ( *svara* ) or accent-pitches are two : a higher ( *udātta* raised ), or acute ; and a lower ( *anudātta* not raised ), or grave, A third ( called *svarita* : a term of doubtful meaning ) is always of secondary origin, being ( when not enclitic : see below, 85 ) the result of actual combination of an acute vowel and a following. grave vowel into one syllable. It is also uniformly defined as compound in pitch, a union of higher and lower tones within the limits of a single syllable. It is thus indentical in physical character with the Greek and Latin circumflex, and fully entitled to be called by the same name.

82. Strictly, therefore, there is but one distinction of tone in the Sanskrit accentual system, as described by the native grammarians and marked in the written texts: the accented syllable is raised in tone above the unaccented ; while then further, in certain cases of the fusion of an accented and an unaccented element into one syllable, that syllable retains the compounded tone of both elements.

83. The *svarita* or circumflex is only rarely found on a pure long vowel or diphthong, but almost always on a syllable in which a vowel, short or long, is preceded by a *y* or *v* representing an originally acute *i*- or *u*- vowel.

*a.* In transliteration, in this work, the *udātta* or acute will be marked with the ordinary sign of acute, and the *svarita* or circumflex ( as being a downward slide of the voice forward ) with what is usually called the grave accent : thus, *á*, acute, *yá* or *vá* circumflex.

[1] For fuller information on the subject of Accent see Macdonell's Vedic Grammar, p. 74, etc. and Vedic Grammar for Students Appendix III.

85. But further, the Hindu grammarians agree in declaring the ( naturally grave ) syllable following an acute, whether in the same or in another word, to be *svarita* or circumflex—unless, indeed, it be itself followed by an acute or circumflex ; in which case it retains its grave tone. This is called by European scholars the enclitic or dependent circumflex.

( a ) Thus, in *téna* and *té ca*, the syllable *na* and word *ca* are regarded and marked as circumflex ; but in *téna té* and *té ca svàr* they are grave.

( b ) This seems to mean that the voice, which is borne up at the higher pitch to the end of the acute syallable, does not ordinarily drop to grave pitch by an instantaneous movement, but descends by a more or less perceptible slide in the course of the following syllable. No Hindu authority suggests the theory of a middle or intermediate tone for the enclitic, any more than for the independent circumflex. For the most part, the two are identified with one another, in treatment and designation. The enclitic circumflex is likewise divided into a number of sub-varieties, with different names : they are of too little consequence to be worth reporting.

86. The essential difference of the two kinds of circumflex is shown clearly enough by these facts : 1. the independent circumflex takes the place of the acute as the proper accent of a word while the enclitic is the mere shadow following an acute, and following it in another word precisely as in the same word ; 2. the independent circumflex maintains its character in all situations, while the enclitic before a following circumflex or acute loses its circumflex character, and becomes grave ; moreover, 3. in many of the systems of marking accent the two are quite differently indicated.

87. The accentuation is marked in manuscripts only of the older literature : namely, in the primary Vedic texts or Saṁhitās, in two of the Brāhmaṇas ( Tāittirīya and Śatapatha ), in the Tāittirīya-Āraṇyaka, in certain passages of the Aitareya-Āraṇyaka, and in the Suparṇādhyāya. There are a number of methods of writing accent, more or less different from one another ; the one found in MSS. of the Ṛg-Veda, which is most widely known, and of which most of the others are only slight modifications, is as follows.

( a ) The acute syllable is left unmarked ; the circumflex, whether independent or enclitic, has a short perpendicular stroke above ; and the grave next preceding an acute or ( independent ) circumflex has a short horizontal stroke below. Thus,

अ॒ग्निम् *agním* ; जु॒होति॑ *juhóti* ; त॒न्वा॑ *tanvā̀* ; क्वा॑ *kvā̀.*

( b ) But the introductory grave stroke below cannot be given if an acute syllable is initial ; hence an unmarked syllable at the beginning of a word is to be understood as acute ; and hence also, if several grave syllables precede an acute at the beginning of a sentence, they must all alike have the grave sign. Thus,

इन्द्रः॑ *índraḥ* ; ते॒ *te* ; क॒रि॒ष्यसि॑ *kariṣyási* ; तु॒वि॒जा॒ता *tuvijātā̀.*

( c ) All the grave syllables, however, which follow a marked circumflex, are left unmarked, until the occurrence of another accented syllable causes the one which precedes it to take the preparatory stroke below. Thus,

सु॒दृशी॑कसंदृक् *sudṛ́çīkasaṁdṛk* ;

but सु॒दृशी॑कसं॒दृ॒ग्गवा॑म् *sudṛ́çīkasaṁdṛggávām.*

( d ) If an independent circumflex be followed by an acute ( or by another independent circumflex ), a figure १ is set after the former circumflexed vowel if it be short, or a figure ३ if it be long, and the signs of accent are applied as in the following examples :

अ॒प्स्व१॑न्तः *apsv á 1 ntáḥ* (from *apsu antáḥ*) ;

रा॒यो३॑व॒निः *rāyo3 vániḥ* ( from *rāyo avániḥ* ).

90. The theory of the Sanskrit accent, as here given (a consistent and intelligible body of phenomena ), has been overlaid by the Hindu theorists, especially of the Prātiśākhyas, with a number of added features, of a much more questionable character. Thus :

( *a* ) The unmarked grave syllables following a circumflex ( either at the end of a sentence, or till the near approach of

another acute ) are declared to have the same high tone with the ( also unmarked ) acute. They are called *pracaya* or *pracita* ( '*accumulated*' : because liable to occur in an indefinite series of successive syllables ).

( *b* ) The circumflex, whether independent or enclitic, is declared to begin on a higher pitch than acute, and to descend to acute pitch in ordinary cases ; the concluding instant of it being brought down to grave pitch, however, in the case of an independent circumflex which is immediately followed by another ascent of the voice to higher pitch, in acute or independent circumflex ( a *kampa* syllable : 87 d ).

## TRANSLATION

### No. 1. Ṛgvēda I. 19.

1 To my pleasant sacrifice I summon thee, and bid thee: drink this milk: Come, Agni,[1] with the Maruts.[2]

2 No god, no mortal is stronger than thee, O mighty one: Come, Agni, with the Maruts.

3 That host of gods, who roam over the great sky, unharmed of any: Come, Agni, with the Maruts.

4 Who fiercely sing their thunder song, irresistible in their might: Come, Agni, with the Maruts.

5 Bright, fearful to look on, strong rulers, devourers of their foes: Come, Agni, with the Maruts.

6 Who sit as gods in the sky on the bright vault of heaven: Come, Agni, with the Maruts.

7 Who toss the waves in mountains across the surging sea: Come, Agni, with the Maruts.

8 Who stretch mightily across the sea with their rays: Come, Agni, with the Maruts.

9 Lo, I pour out for thee the soma mead, drink thou it first: Come, Agni, with the Maruts.

### No. 2. Ṛgveda I. 25.

1 Though we break thy law daily, men as we are, O God Varuṇa,

2 Give us not over to the deadly stroke of our enemy; give us not over to the wrath of our foe.

3 We will unloose thy mind mercywards with these our songs, as a traveller unlooses his horse.

4 My prayers fly up from me, seeking my heart's desire as birds to their nests.

5 When shall we bring here to us the Man Varuṇa, the universal Lord, that he, whose eyes are over all, may have mercy upon us.

---

[1] Fire. [2] The gods of the storm.

6 See, the Two[1] joyously receive their common oblation: they do not despise the faithful giver.

7 Varuṇa knows the way of the birds that fly in the air: he knows the way of the ship on the sea.[2]

8 The righteous Varuṇa knows the twelve months with their children[3]: he knows the month that is born besides.[4]

9 He knows the track of the wide, high and great wind[5]: he knows them that sit thereon.[6]

10 The righteous Varuṇa has sat down in his house; the strong one to rule over all.

11 From thence he marks and sees all his wondrous works, that have been, and that are to be.

12 May he, the strong ruler, Aditi's son, this day and every day, make straight our way before us[7]: may he prolong our lives.

13 Varuṇa has put on his golden breast plate and his shining raiment: his spies sit down around.

14 The evil-minded seek not to injure him, nor those who do men hurt: the God has no foe to fear.

---

[1] Mitra and Varuṇa.

[2] As a ship that passeth over the waves of the water, which when it is gone by, the trace thereof cannot be found, neither the pathway of the keel in the waves; or as when a bird hath flown through the air, there is no token of her way to be found, but the light air being beaten with the stroke of her wings, and parted with the violent noise and motion of them, is passed through, and therein afterwards no sign where she went is to be found.—*Wisdom of Solomon*, Chap. v, ver. 10, 11. Compare also *Proverbs*, Chap. xxx, ver. 19.

[3] The days.

[4] The intercalary month.

[5] The wind bloweth where it listeth, and thou hearest the sound thereof but canst not tell whence it cometh, and whither it goeth.—*Gospel of St. John*, Chap. iii, ver. 8.

[6] He rode upon a cherub and did fly: and he was seen upon the wings of the wind.—II. *Samuel*, Chap. xxii, ver. 2. He walketh upon the wings of the wind.—*Psalms* civ. ver. 3.

[7] I will cause them to walk by the rivers of waters in a straight way: wherein they shall not stumble; for I am a Father to Israel, and Ephraim is my firstborn.—*Jeremiah*, Chap. xxxi, ver. 9.

15 And he it is who gives blessing in no half-measure to us men, filling our bellies with food.

16 My prayers go up to him, like kine to their pasture lands,[1] seeking him whose eyes are over all.

17 Come now, and let us talk together,[2] since I have brought the mead : like a priest thou art eating the morsel dear to thee.

18 Lo, I see him who is seen of all, I see his chariot on the earth : he has accepted my song.

19 Here my call, O Varuṇa, and to-day have mercy upon me : I am needy and call upon thee.[3]

20 Thou art wise, and art Lord of all, of heaven and of earth : listen and answer on thy way.

21 Loose from my head, from my body, from my feet, the snare,[4] that I may live.

## No. 3. Ṛgveda I. 115.

1 The bright face of the gods is gone up the sky, the eye of Mitra, of Varuṇa, of Agni: Sūrya[5] has filled heaven, earth, and the mid-sky, soul of the moving and standing world.

---

[1] As the hart panteth after the water-brooks, so panteth my soul after thee, O God.—*Psalms*, xlii, ver. 1.

[2] With this bold invocation to a present God, and the prayer of the last verse here, compare *Isaiah*, Chap. i, ver. 18, where God is the speaker : Come now, and let us reason together, saith the Lord : though your sins be as scarlet, they shall be as white as snow ; though they be red like crimson, they shall be as wool.

[3] But I am poor and needy ; yet the Lord thinketh upon me ; thou art my help and my deliverer ; make no tarrying, O my God.—*Psalms*, xl. ver. 17. Bow down thine ear, O Lord, hear me ; for I am poor and needy.—*Psalms*, lxxxvi. ver. 1.

[4] The sorrows of hell compassed me about; the snares of death prevented me. In my distress I called upon the Lord, and cried to my God......He brought me forth into a large place ; he delivered me, because he delighted in me.—*Psalms*, xxiii, ver. 6. 7 and 19.

[5] The Sun.

2 The Sun follows the divine and shining Dawn, as a wooer follows his mistress[1]......................[2]

3 Bringing us blessing the yellow horses of the Sun, bright, swift, worthy to be praised, bend, and climb the steep of the sky: in a moment they go over heaven and earth.

4 This is the godhead, this the greatness of the Sun: while yet it was forming he has rolled the web of darkness away; for, when he yoked his horses from their stall, Night was spreading her garment over all.

5 Then the Sun put his glory in the bosom of heaven, to be a light to Mitra and Varuṇa: in endless succession his horses bring, now the clear day-light, now the darkness.

6 To-day, O gods, at the rising of the Sun free us from trouble, free us from sin: this boon may Mitra, Varuṇa, Aditi, Sindhu, Earth, and Heaven, fulfil to us.

No, 4. Ṛgveda I. 143.

1 A stronger, newer song I bring to Agni, lifting up heart and voice to that son of strength: child of the waters, dear to us, lo, he takes his seat on earth with the Vasus,[3] a priest, who knows the season when to come.

2 At the moment of his birth in heaven on high, Agni was manifest to Mātariśvan: by the might of him when fully kindled a light lightened heaven and earth.[4]

4 The sons of Bhṛgu by their strength brought Agni, giver of all good things, to the navel of the earth and the

[1] In them (*i. e.*, the heavens) hath he set a tabernacle for the sun; which is as bridegroom coming out of his chamber, and rejoiceth as a strong man to run a race. His going forth is from the end of the heaven, and his circuit unto the ends of it: and there is nothing hid from the heat thereof.—*Psalms*, xix, ver. 4, 5.

[2] Here, and in a few other places farther on, I perfer to make an omission rather than give a translation which could only be conjectural.

[3] The gods.

[4] A verse is omitted.

world : do you now bring this same Agni to this his house, who, with Varuṇa, is the one Lord of wealth.

5 None can stay him; he comes like the roaring of the Maruts, like an arrow let loose from the bow; like the thunder-bolt of the sky: with his sharp teeth Agni lays hold of the faggots, breaks them in pieces, and destroys them as a warrior destroys his foes.

6 But will Agni in very deed be gracious to my prayer? will the good God fulfil desire with good? he in very deed further my prayer and bring it to pass? —with this prayer I praise him, God of the shining face.

7 Our altar fire kindles and bends towards Agni as to a friend; his face now shines with fat, as he leads your sacrifice: kindling and shining in our assemblies may he bear up-wards our pure prayer.

8 O Agni, thyself watchful, defend us with thy watchful, merciful, and mighty guards: whom none can injure, none deceive; who slumber not—with them defend us and our children.[1]

No. 5. Ṛgveda I. 154.

1 I will sing the mighty deeds of Viṣṇu; how in three great strides he measured out earth's fields, and fixed fast the heavens to be his seat on high.

2 Viṣṇu makes loud boast of this, like a firce lion roaming on the mountain tops: under his three steps all worlds abide.

3 Let the loud song go out to Viṣṇu, the Bull of the wide paces who dwells in the hills: who alone measured out in three steps this great and wide world, to be his dwelling-place.

---

[1] He will not suffer thy foot to be moved: he that keepeth thee will not sleep. Behold he that keepeth Israel shall neither slumber nor sleep.—*Psalms*, cxxi, ver. 3, 4. For he shall give his angels charge over thee, to keep thee in all thy ways.—*Psalms*, xci, ver. 11.

4 Whose three steps are full of honey and, knowing no decay, rejoice ever in heavenly food: who alone sustains this triple earth and heaven,[1] with all that dwell therein.[2]

5 O that I may come to that dear home of his, where god-fearing men live in bliss: there is the fellowship of the God of the mighty strides; in Viṣṇu's seat on high there is a spring of honey.

6 I long to go to that house of yours, O Twin Gods,[3] where are the many-horned unresting kine;[4] here that highest seat of the God of the mighty strides shines bright upon us.

## No. 6. Ṛgveda II. 12.

1 The fierce God who, so soon as he was born their chief, [5]surpassed all the gods in strength: from before whose breath heaven and earth trembled, He, O men, is Indra.

2 Who fixed fast the quivering earth, who made the moving mountains rest; who measured out the wide sky, who propped up heaven, He, O men, is Indra.

3 Who slew the serpent and let loose the seven streams, who drove out the kine from the cave of Vala; who begat fire within the stones,[6] a spoiler in bottles, He, O men, is Indra.

4 By whom all this world was shaken, who put under us the dark skin;[7] who, like a gambler that has won a lakh, laid hold of the wealth of our foe, He, O men, is Indra.

---

1 Earth, heaven, and the space between.

2 Or Heaven, and all the worlds.

3 Viṣṇu and a fellow-god not named.

4 The stars?

5 [ See, however, note on *paryabhūṣat*, p. 114. ]

6 Perhaps heaven and earth, the fire being lightning. [ Or perhaps clouds. ]

7 The aborigines of the land.

5 Of whom they ask, "Where is He" in this awful manner, and even say, "He is not"[1]; He brings to nought the wealth of the foe like a gambler's stake, He, O men, is Indra.

6 Who is the furtherer of the rich, and of the poor, of the priest and of the suppliant singer: who is the helper of the man that brings together the stones, and pours out for him the soma, God of the shining face, He, O men, is Indra.

7 In whose gift are horses, and kine, and villages, and all chariots; who begat the sun, who begat the dawn, who is the leader of the waters,[2] He, O men, is Indra.

8 On whom Heaven and Earth,[3] who are joined, call, and all enemies, high and low; on whom two warriors standing in the same chariot call, each for himself, He, O men, is Indra.

9 Without whom men do not conquer. on whom the warriors call for help; who is the image of this whole world, who is the shaker of what never before was shaken, He, O men, is Indra.

10 Who has struck down with his dart, while they least thought of it, many who were doing great evil; who does not forgive the stubbornness of the man that provokes him, who is the slayer of his foe, He, O men, is Indra.

11 Who found out in the fortieth autumn Śambara[4] abiding

---

[1] Knowing this first, that there shall come in the last days scoffers, walking after their own lusts, and saying, Where is the promise of his coming? for since the fathers fell asleep, all things continue as they were from the beginning of the creation.—II. *Peter*, Chap. iii, ver. 3, 4.

[2] The monsoon rains.

[3] [ See note on *Krandasī*, p. 123. ]

[4] The evil spirit who keeps back the rains. The hills are, perhaps, the clouds.

in the hills; who slew that dragon boasting of his might, the sprawling demon, He, O men, is Indra,

12 Who—a strong Bull with strings[1]—let loose on their path the seven streams[2];—who, thunderbolt in hand, smote down Rauhiṇa as he was climbing heaven, He, O men, is Indra.

13 Heaven even and Earth bow down before him, at his very breath the hills are in fear: known to us as the drinker of our soma, and the wielder of the thunderbolt, He, O men, is Indra.

14 Who protects with his help both him that pours out the soma and him that brews it, who helps the singer and the sacrificer; to whom our prayer and our soma, and these our gifts are for an increase of strength, He, O men, is Indra.

15 O Mighty God, that hast rich gifts for all that worship thee, thou indeed art true: may we, O Indra, at all times be dear to thee, and, with our children about us, praise thy deeds.

### No. 7. Ṛgveda III. 59.

1 It is the voice of Mitra that leads us men, Mitra sustains earth and heaven: Mitra, with eyes that close not, watches over our tribes, to Mitra pour the fat oblation.

2 That man is blessed, O Mitra, who duly serves thee; none can slay him, none overcome him, whom thou dost guard; evil shall not reach him from far or near.

3 May we, kept free from sickness, and made glad with food, as we wander over earth's surface, abide ever in the realm of this God, and live under the good will of Mitra.

---

[1] To guide him, showing his power. The gods are often thus boldly called.

[2] The seven rivers of the Punjab, made full of water when the rains are won from the clouds. Compare "leader of the waters" above.

4 For this Mitra has been born to be had in honour, our kind king, our mighty ruler : he it is we must worship, may we live in his good will, in his kindly favour.

5 Approach with reverence the great Āditya, the leader of men, who is kind to the singer ; to him, Mitra the wonderful, pour into the fire the loved oblation.

6 Mitra sustains the tribes of men ; the help this God gives us shall win us fame that all shall hear of.

7 The Universal God, who encompasses heaven with his greatness, and earth with his glory.

8 To Mitra our five tribes go for help ; and he sustains all the gods.

9 A friend indeed[1] to gods and to men, to those that worship him, Mitra fulfils their hearts' desires.

## No. 8. Ṛgveda III. 61.

1 O Uṣas,[2] rich in blessing, wise and bountiful, accept the song of thy worshipper ; for now thou comest in due time, Goddess ever old, ever young, and bringest with thee all good things.

2 Shine out, O Dawn, a Goddess and immortal, on thy golden car ; awaken the sweet notes of the birds : let thy well-managed horses, whose splendour spreads all around, bring thee, a golden Goddess, to us.

3 O Dawn, before all the worlds thou risest up, the banner of immortality : moving to the old goal, but new every morning, roll forward now like a wheel.

4 Lo, the rich Dawn casts, as it were, her garment from her, and moves on Queen of the world ; this bountiful and wonderful Goddess brings heaven to life again, and srretches to the ends of earth and sky.

5 Come, bring to the shining Dawn your offering and bow down before her : high in heaven she spreads her light, giver of good things ; the beauteous Goddess has lit up the light places of the sky.

---

[1] The word Mitra means a friend. [2] Aurora, the dawn.

6 The holy Goddess has been awakened by the songs of the sky, and her glory spreads over the fruitful worlds : the shining Dawn is coming ; Agni, go forth to meet her, and ask for us the wealth we desire.[1]

No. 9. Ṛgveda IV. 46.

1 Drink, Vāyu,[2] the first brew of the honey at our sacrifice : for the first draught is thine.

2 Seated in thy chariot with Indra by the side, Vāyu, drink deep of our oblation, thou that art an hundred-fold our helper.

3 O Indra and Vāyu, let your hundred horses bring you to our feast, to drink the soma.

4 Your sacrificial car, O Indra and Vāyu, has a seat of gold, and touches the sky : up, mount upon it.

5 Its radiance spreads far and wide ; come in it to your worshipper : O Indra and Vāyu, come here.

6 See, O Indra and Vāyu, our oblation is poured : bring the gods, and with them drink it in the house of your worshipper.

7 Here let your coming be ; here, O Indra and Vāyu, unyoke your horses, and drink our soma.

No. 10. Ṛgveda IV. 54.

1 God Savitṛ[3] is now to be praised of us, to be worshipped by us men now in the morning. He it is that deals blessing to men; may he give to us excellent wealth.

2 For first thou givest to the holy gods immortality, thy choicest portion : and then, O Savitṛ, to men, for their lot thou dost give lives in succession upon lives.

3 If in thoughtlessness we have done anything against the folk of the gods, in weakness, in insolence, men as we are, whether among the gods, Savitṛ, or among men, do thou free us from the guilt of it.

---

1 A verse is omitted. 2 The Wind. 3 The Sun.

4 None can stay that work of this god Savitṛ, whereby he maintains the whole world : what his fair fingers do in the circle of earth and in the vault of the sky stands sure.

5 Indra and the gods thou didst place in the high hills giving them there rich abodes : flying hither and thither, all, Savitṛ, obey the command.

6 O Savitṛ, may the thrice-poured soma, which day by day gladdens thee, be for a guard to us ; may Indra too, and Earth and Heaven, Sindhu with the Waters, Aditi with the Ādityas, protect us.

No. 11. Ṛgveda V. 26.

1 O holy and divine Agni, with thy pleasant tongue of flame bring the gods here and worship them.

2 We have fed thee with butter, O glorious one, that gazest up into heaven : bring the gods to our feast.

3 Thou dost call them to our feast ; we have kindled thee and thou dost shine : dost shine mightily, O wise Agni, at our sacrifice.

4 Agni, come with all the gods and partake of our sacrifice; we have chosen thee for our priest.

5 See thy worshipper pours out of the soma for thee : Agni, give him strength : with the gods sit down on the rushes.

6 Thou art kindled, O Agni, conqueror of thousands, and kindled dost further our sacrifice : a messenger to the gods, worthy to be praised.

7 Put Agni upon the altar, he to whom all creatures are known, who it is that carries our oblation : a God and Priest ever young.

8 And let our sacrifice go forward till it reaches all the gods : strew rushes for a seat for them.

9 Here may the Maruts sit, and the two Aśvins, and Mitra, and Varuṇa : the gods in all their tribes.

No. 12. Ṛgveda V. 83.

1 Call on the strong Parjanya[1] in this hymn, praise him, worship him, and bow down before him : for now, loud roaring, the Bull, in quick showers of rain, puts his seed within the plants, and they bring forth.

2 On every side he smites down the trees, smites down the spirits of darkness ; the whole creation trembles before him of the mighty spear : even the guiltless flee before his onset, when Parjanya thundering smites down the evil-doers.

3 Like a charioteer striking his horses with the whip, he puts forth his messengers of rain : from afar the thunderings of the lion arise, when Parjanya fills the sky with rain.

4 The winds blow, the lightnings fly, the plants spring up, the sky pours : food for the whole world is made, when Parjanya comes to Earth's help with his seed.

5 Thou at whose word Earth bends low, thou at whose word cattle and the many-coloured plants scatter, O Parjanya, do thou grant us thy great protection.

6 And you, ye Maruts, give us rain from heaven, make the streams of the strong horse run down : forth, Parjanya, with thy thunder ; pour down on us the rain, O Heavenly Father.

7 Roar and thunder, sow the seed, fly around with watery car : drag after thee the water-skin loosened and head downwards, let the high and the low places be made one.

8 Draw up thy great bucket and pour it out, let loose its streams that they may rush onwards : water heaven and earth with fatness, let there be good drinking for the cattle.

9 When, Parjanya, roaring and thundering, thou dost smite down the evil-doers, this whole world rejoices before thee, and everything that is upon the earth.

---

1 The god of the rain.

10 Thou hast rained down the rain : now hold it in : thou hast made the deserts passable for us, thou hast quickened the plants for food to us, and hast fulfilled the desire of thy children.

## No. 13. Ṛgveda VI. 53.

1 We have yoked thee, O Pūṣan, lord of paths, like a chariot to our hymn, that we may obtain food.

2 Bring to us the wealth that men desire, bring to us a manly, liberal, kindly patron.

3 And him that will not give do thou, Pūṣan, urge forward to a gift : break down the heart of the churl.

4 Open up paths that we may obtain food, slay our enemies : let our desires be accomplished, O fierce God.

5 Pierce the hearts of the churls with thy weapon, O wise one : subdue them to us.

6 Strike them with thy weapon, O Pūṣan, seek out for us that which is dear to the heart of the churl : subdue them to us.

7 Pierce and tear the hearts of the churls, O wise one : subdue them to us.

8 Thou bearest, Pūṣan, a weapon to stir up prayer : with it pierce and break up the heart of every one.

9 Thou hast a goad furnished with thongs of cowhide for driving cattle ; we seek its protection.

10 And make this our prayer availing, for kine, for horses, for wealth that becomes men.

## No. 14. Ṛgveda VI. 54.

1 Lead us, Pūṣan, to a wise man who shall straightway direct us ; who shall say, Here it is.

2 May we meet Pūṣan who shall show us houses : and say ; 'There they are.'

3 Pūṣan's wheel is not broken, its box does not fall : its tire is not shattered.

4 And if one serves this God with an offering, Pūṣan will not be angry with him : he shall get wealth first.

5 May Pūṣan go after our cattle, may Pūṣan protect our horses, may Pūṣan give us food.

6 O Pūṣan, go after the cattle of thy worshipper, who pours out the soma for thee; and of us who praise thee.

7 Let nothing be lost, or injured, or fall into a pit : come to us with our cattle all safe.

8 Pūṣan hears us : therefore, do we call upon him, the watchful God who loses nothing that is his, the Lord of wealth.

9 May we, Pūṣan, living in thy land suffer no evil : see we are here thy worshippers.

10 May Pūṣan stretch out his right hand far and wide; and drive back to us our lost.

No. 15. Ṛgveda VI. 55.

1 Come, O son of deliverance, may we meet thee, O shining one; guide the chariot of our sacrifice.

2 For thou art the best of charioteers, O God of the braided hair, and art Lord of much substance : we ask our friend for wealth.

3 Thou art a river of wealth, O shining God, a mass of riches, O goat-drawn God : the friend of every pious man.

4 Let us praise Pūṣan, the God drawn by goats, the giver of food : they call him the lover of his sister.

5 I invoke him as the wooer of his mother, may the lover of his sister hear us : brother of Indra, and my friend.

6 May his sure-footed goats bring here the God Pūṣan on his chariot—Pūṣan, who visits mankind.

No. 16. Ṛgveda VI. 56.

1 He who says of Pūṣan, He is an eater of gruel : him the God will not hear.

2 He is the most skilful of charioteers : Indra, Lord of the good, goes forth to slay his enemies with Pūṣan for his companion.

3 And this most skilful charioteer straightway drove that golden wheel of the sun through the speckled cloud.

4 What we ask of thee, O wondrous God, that art sought of many, do that for us to-day.

5 Lead this our troop looking for cattle to where they may find them : Pūṣan thou that art heard of from afar.

6 We seek thy blessing which drives away ill-luck ; for the day and the morrow and all eternity.

No. 17. Ṛgveda VI. 57

1 Let us call on Indra and Pūṣan for friendship and good luck : so shall we obtain food.

2 One sits down to drink the soma poured from the two spoons : the other eats his gruel.

3 Goats carry the one, his two brown horses the other : for with them Indra slays his foes.

4 When the mighty Indra brought the great waters : then Pūṣan was his friend.

5 We cling to Pūṣan's good-will as to the branch of a tree, to Pūṣan's and to Indra's goodwill.

6 We stir up Pūṣan as a charioteer shakes his reins ; Pūṣan and Indra, that they may give us prosperity.

No. 18. Ṛgveda VII. 28.

1 O Indra, listen to our prayer ; come yoke thy horses and drive them to uswards, : all mortals call upon thee in every place, but hear *our* prayer, O life-giver.

2 Thy greatness Indra, reached our cry, and thou protectest the song of the singer, O mighty one : when thou dost take thunderbolt in thy hand, great fierce God, none can resist thee.[1]

4 In the days when evil men do penance for their sin, in these days be gracious to us, O Indra : the sins which Varuṇa, the wise God, sees in us— from their guilt, may Indra deliver us.

---

1 A verse is omitted.

5 Let us call on this mighty Indra, that he may give us great wealth and substance : who is the hearer of prayer— and do you, gods, protect us always with your blessings.

No. 19. Ṛgveda VII. 49.

1 With the ocean at their head they come from the midst of the heavenly sea,[1] pure, never resting : Indra with his thunderbolt has ploughed up a path for them— may these divine waters protect me.

2 The waters of the sky, the waters of the rivers, the waters of the wells; the bright and cleansing waters, whose goal is the sea— may these divine waters protect me.

3 In the midst of them goes Varuṇa, the King marking truth and falsehood of men : they so pure and bright, dropping honey— may these divine waters protect me.

4 There is Varuṇa the King, there is Soma, there all the gods find strength : Agni, the friend of man, goes down into them— may these divine waters protect me.

No. 20. Ṛgveda VII. 54.

1 Lord of the house, recognize us for thine own, bless our coming in,[2] free us from sickness : grant those things which we ask of thee, protect us, man and beast.

2 Lord of the house, be a furtherer to us, increasing our kine and our horses : may we not grow old in thy friendship, cherish us as a father cherishes his children.[3]

---

[1] In the sky. Compare *Genesis*, Chap. 1. ver. 6, 7. And God said, Let there be a firmament in the midst of the waters, and let it divide the waters from the waters. And God made the firmament, and divided the waters which were below the firmament from the waters which were above the firmament : and it was so.

[2] The Lord shall preserve thy going out, and thy coming in, from this time forth, and even for evermore.— *Psalms*, cxxi., ver 8.

[3] Like as a father pitieth his children, so the Lord pitieth them that fear him.— *Psalms*, ciii., ver. 13.

3 Lord of the house, may we rejoice in thy pleasant friendship : protect us both when we work and when we rest—and do you, gods, always protect us with your blessings.

No. 21. Ṛgveda VII. 68.

1 O bright Twin Horsemen,[1] come here on your fair steeds, receive, O wondrous ones, the prayer of your servant, and eat the oblation which we have brought.

2 The plant that maddens[2] is ready for you : arise and come to eat of my oblation : across the cries of the foe listen to ours.

3 Your chariot is pressing forward swift as the wind : across the worlds, O Horsemen, bringing us help an hundredfold : coming to us, O bridegrooms of Sūryā.[3]

4 When the holy stone lifts up its voice, and calls you, as it presses the soma for you : then, O fair Horsemen, let the priest draw you here by our offerings.

5 There is rich nourishment with you, of which you gave freely to Atri, who enjoys your protection, being dear to you.

6 That too was your doing, O Horsemen, when you came back to the aged Cyavāna and gave him a body to serve him from that time forth.

7 Your horse delivered Bhujyu when his treacherous companions had deserted him in mid sea.

8 You gave strength to Vṛka when he was weary, you heard Śayu when he called upon you ; you filled the cow with milk like a stream, and gave strength to the barren, O Aśvins.

9 Waking early in the morning I too praise you in choice songs, glad at heart : may the cow give me food and drink—and do you, gods, always protect us with your blessings.

---

[1] The Aśvins. [2] The soma plant. [3] The sun Goddess.

## No. 22. Ṛgveda VII. 75.

1 The Dawn, born in heaven, has unfolded herself at the appointed hour, and comes towards us, unveiling her majesty: she has driven before her the spirits of night and hateful darkness; chief of the Aṅgirases, she has wakened the paths to life.

2 Wake us to-day for good, O Dawn, help us to great good luck: O Goddess, friend of man, bring to us wealth manifold and glorious among men, wealth that shall be heard of.

3 See how the bright and deathless rays of the admired Dawn advance: they spread in all directions, begetting the works of God, and filling the mid worlds.

4 While she yokes her chariot from afar, and straightaway traverses the five tribes, looking down on the ways of men, Daughter of the Sky, Queen of the World.

5 The Bride of the Sun, with her swift mares, bringing gifts to men, disposes of wealth and riches: our seers praise her who takes our youth away; the beneficent Dawn shines, praised by our singers.

6 The red and beauteous horses appear bringing on the shining Dawn: She comes, bright, on her radiant chariot, and brings a jewel for her faithful worshipper.

7 True with the true, great with the great, goddess with the gods, holy with the holy, she breaks down the strong places, and gives us kine: our lowing cattle greet the Dawn.

8 Now give to us, O Dawn, treasure of cattle, treasure of men, treasure of horses, treasure of food: make not our altar a reproach among men— and do you, gods, always protect us with your blessings.

## No. 23. Ṛgveda VII. 83.

*An historical hymn in which the victory of Sudās, King of the Tṛtsus, over ten confederate kings is, by the Vasiṣṭhas, the family*

*priests of Sudās, ascribed to the interposition of Indra and Varuṇa. The king and his priests speak alternately.*

**The Vasisthas :**

1 They looked to you, O Men, and to your friendship, and went forward, our warriors with their broad axes : you slew for us our barbarian and our Aryan foes, you, O Indra and Varuṇa, helped Sudās with help.

2 Where men come together with uplifted banners, in the fight on which hangs all that is dear, where Earth, and they that dwell thereon shake for fear, there, O Indra and Varuṇa you comforted us.

**Sudās :**

3 The ends of the earth were darkened with dust; a cry, O Indra and Varuṇa went up the sky : those who were my foes among the peoples had hemmed me round, you heard my call and rushed forth to help me.

**The Vasisthas :**

4 O Indra and Varuṇa, with your darts you smote Bheda and he could not stand, so you delivered Sudās : you heard the prayers of these men, when they called upon you ; the intercession of the Tṛtsus availed with you.[1]

**Sudās :**

5 O Indra and Varuṇa, I was tormented on all sides by the wiles of my foe and by the enmity of them that hated me : but you dispose of the wealth of both sides, and, you helped me on that great day.

**The Vasisthas :**

6 On you both armies[2] call in the day of battle, that, with Indra's help, and Varuṇa's, they may win them wealth : there Sudās was hemmed in by ten kings ; then you helped him with the Tṛtsus.

7 The ten kings leagued together, the godless ones, could not, O Indra and Varuṇa, fight with Sudās ; the intercession

[1] [See note 2 on this verse, p. 229.]
[2] [See note on this verse, p. 231.]

of his priests availed, for the gods heard their call and came.

8 In the battle of the ten kings, Sudās was surrounded on all sides, and you, O Indra and Varuṇa, helped him : for there the pious Tṛtsus, clad in white, and with their hair braided, worshipped you with prayer.

9 The one smites down our enemies in battle, the other ever guards the law : we call on you both, O mighty ones, in this our hymn : to us, O Indra and Varuṇa, grant your protection.

10 To us may Indra, Varuṇa, Mitra, and Aryaman grant glory, grant their mighty and great protection : as we yearn after the everlasting light of the holy Aditi, and the word of God Savitṛ.

No. 24. Ṛgveda VII. 86.

1 Our tribes by the strength of Him,[1] who fixed apart the two great firmaments, who rolled out the wide and lofty sky with all its stars, and stretched out the earth.

2 I say to my own heart, When shall I come into Varuṇa's presence ? Will he not be angry with me ? Will he receive my prayer ? When shall I see his mercy and rejoice ?

3 I ask myself what my sin was, I try to find it out ; I go to those that know, to ask of them : one answer only the wise men give me, and say:- It is Varuṇa that is angry with thee.

4 What is the great evil I have done, O Varuṇa that thou goest about to slay thy worshipper and friend ? Declare it to me, mighty and glorious one ; then shall I, sinless, come quickly to thee with adoration.

[1] For I am the Lord, I change not ; therefore ye sons of Jacob are not consumed.— *Malachi*, Chap. iii., ver. 6.

5 Loose from me the sins of fathers[1] and those which I myself have done: loose me, O king, as a thief who has wrought atonement; loose me as a calf from the snare of sin.

6 It was not my own strength, O Varuṇa; it was fate, wine, anger, dice, want of thought: — — — —; even sleep makes me to sin.

7 Free from sin I will worship, as his servant, a forgiving and glorious God; this gracious God makes wise the simple,[2] and, wiser than the wise man, helps him to all good.

8 O glorious Varuṇa, may this my song go up into thy heart: bless me resting, bless me working; and do you, gods, always protect us with your blessings.

## No. 25. Ṛgveda VII. 88.

1 Bring, O Vasiṣṭha[3], a pure and acceptable hymn to the gracious Varuṇa, who drives towards us that holy and mighty Bull[4] with its thousand boons.[5]

3 When I, with Varuṇa, climbed into the boat,[6] when we urged it through the mid-stream, when we rode on the backs of the waves, the God and I swung happily in that swing.

4 Varuṇa put Vasiṣṭha in the boat, Varuṇa like a cunning workman by his strength made Vasiṣṭha a prophet: the wise God, when the days were bright made Vasiṣṭha his praiser, so long as the days and dawns endured.

---

1 For I the Lord thy God am a jealous God, visiting the iniquity of the fathers upon the children, unto the third and fourth generation of them that hate me.— *Exodus*, Chap. xx., ver. 5. And as Jesus passed by, he saw a man which was blind from his birth. And his disciples asked him saying, Master, who did sin, this man or his parents, that he was born blind?— *John*, Chap. ix., ver. 1, 2.

2 The law of the Lord is perfect, converting the soul: the testimony of the Lord is sure, making wise the simple.— *Psalms*, xix., ver. 7.

3 The poet addresses himself.

4 The Sun.

5 A verse is omitted.

6 Perhaps the Sun.

5 Where are those old kindnesses of ours, when we walked together without hate;[1] when, O glorious Varuṇa, I entered thy great and holy house with its thousand doors?

6 I was thy close kinsman, Varuṇa, dear to thee, thy friend: but I have done evil against thee: I have sinned against thee; let me not suffer, O avenging God, defend me, for I call upon thee.

7 O Varuṇa, loose my bonds from me, and bring me to dwell in that abiding city; send me help from inner heaven— and do you, gods, always protect me with your blessings.

No. 26. Ṛgveda VII. 89.

1 Let me not, O King Varuṇa, go down to the earthy house: have mercy, O Lord, have mercy.

2 For I go tottering, O Thunderer, like a blown-up skin: have mercy, O Lord, have mercy.

3 My strength was very weakness, and I went wrong, O pure God: have mercy, O Lord, have mercy.

4 Thirst found thy worshipper as he stood in the midst of waters: have mercy, O Lord, have mercy.

5 Whatever be the evil, O Varuṇa, we men do against the folk of the gods however in thoughtlessness we transgress thy laws— do not, O God, punish us for that sin.

No. 27. Ṛgveda VII. 102.

1 Sing aloud to Parjanya,[2] the bounteous son of the Sky: may he find us corn.

2 He puts the seed in plants and cows and mares; he puts it in women.

3 Pour into his mouth the sweet oblation: may he ever give us food.

---

[1] Lord, where are thy former loving kindnesses, which thou swearest unto David in thy truth?— *Psalms*, lxxxix., ver. 49.

[2] The god of the rain.

## No. 28. Ṛgveda VIII. 30.

1 There is no child among you, O gods, nor young man: all of you are strong.

2 So we sing and praise you, devourers of your foes, the three and thirty gods worshipped of Manu.

3 Protect us, defend us, speak for us, lead us not astray from the path of our father Manu.

4 May all the gods who are here and are friends to man grant their mighty protection to us, and to cow and horse.

## No. 29. Ṛgveda X 14.

### *A Funeral Hymn*

1 To him that passed along the great heights, and sought out a path for many, Vivasvat's son, the gatherer of men, Yama,[1] the King—to him bring worship and offering.

2 Yama first found out for us the road; this is a pasture land which none can rob us of: thither the living go their several ways, along the road by which our fathers, that were before us, passed.

3 Mātalin with the Kavyas, Yama with the Aṅgirases, Bṛhaspati with the Ṛkvans grow there in strength; they serve the gods, and the gods serve them; rejoicing together, the gods in our sacrifice, the fathers in our oblation.

4 Here, O Yama, is a place for thee, join thyself to our father Aṅgirases and sit down: may the spells said by our wise men bring thee; rejoice, O King, in this our offering.

5 Come with the holy Aṅgirases; with the Vairūpas here, O Yama, rejoice: I summon Vivasvat, who is thy father; sit down in the place made at my sacrifice.

---

[1] The god of the dead.

6 Our fathers Aṅgirases, the Navagvas, the Atharvans, the soma-loving Bhṛgus— may these holy ones have us in their good will, may they have us in their kind favour.

( *To the corpse* )

7 Go forth, go forth, by the old paths, by which our fathers, that were before us, passed : thou too shalt look on the Twin Kings rejoicing in our sacrifice, on Yama and on God Varnṇa.

8 Go meet the fathers in heaven on high, meet Yama, meet the good works which thou hast done :[1] leave here all evil, and go home, there glorious meet another body.[2]

( *To the bystanders*[3] )

9 Stand aside, go away, disperse, the fathers have made this place for him, furnished with days and waters and nights : Yama will give him rest.

( *To the corpse* )

10 Run and outstrip the two dogs of Saramā, the dappled dogs, each with four eyes : run straight from them ; so shalt thou come to the gracious fathers, who live in joy with Yama.

---

11 Those watch-dogs of thine, O Yama, warders of the path and watchers of men— give them, O King, charge over this man, grant him wealth and health.

12 With wide nostrils, insatiate, these two dark messengers of Yama go up and down among men : may they to us here to-day grant again sweet breath, that we may see the sun.

---

[1] I heard a voice from heaven saying unto me. Write, Blessed are the dead which die in the Lord from henceforth : Yea, saith the Spirit, that they may rest from their labours ; and their works do follow them.— *Revelations*, Chap. xiv., ver. 13.

[2] There is a natural body, and there is a spiritual body.— I *Cor.*, xv., ver. 44.

[3] [ See note 1., p. 254. ]

13 To Yama pour the soma, to Yama bring the offering: to Yama the well-furnished sacrifice goes, with Agni for its herald.

14 To Yama bring the fat oblation, and draw near: may he bring us to the gods, to live a long life in heaven.

15 To Yama the King pour out the honied oblation: then bow low before the sages born in old time, our fathers, who made for us this path.[1]

No. 30. Ṛgveda X. 90.

1 The Man had a thousand heads, a thousand eyes, a thousand feet: he covered the earth on all sides, and stretched ten fingers' length beyond it.

2 The Man was all that is and all that will be: ruling over immortality, he was all that grows by food.

3 Such was his greatness; and the Man was greater still: this whole world is a fourth of him, three-fourths of him are immortal in the sky.

4 For with three fourths the Man went on high; but a fourth of him remained here, and then spread on all sides, over the living and lifeless world.

5 From him Virāṭ was born, and the Man from Virāṭ: when born he stretched beyond the earth, behind and before.

6 When the gods made sacrifice with the Man for their offering, Spring was the butter for him, Summer the fuel, Autumn the offering.

7 They be-sprinkled this sacrifice on the altar, the Man born in the beginning: the gods, the holy ones, and the sages took him for their offering.

8 From that sacrifice fully made was produced the butter: it made the creatures that are in the sky, the beasts of the forest, and those that dwell in villages.

9 From that sacrifice fully made the Ṛgveda and the Sāma-

[1] A verse is omitted.

veda were born : from it the Atharvaveda was born, from it the Yajurveda was born.

10 From it horses were born, and all animals with two rows of teeth : from it cows were born, from it were born all goats and sheep.

11 When they divided the Man, into how many parts did they shape him ? what was his mouth, what his arms, what his thighs, what his feet ?

12 The Brāhmaṇa was his mouth, of his arms the warrior was made, his thighs became the husbandman, and the pariah was born from his feet.

13 The moon sprung from his mind, and the sun was born from his eyes : Indra and Agni were born from his mouth, Vāyu from his breath.

14 From his navel came the mid-world, from his head rolled the sky : from his feet came the earth ; from his ear the east and the west : thus they framed the world.

15 Seven logs were put round for him, thrice seven faggots were made : when the gods made sacrifice, and bound the Man for their offering.

16 With sacrifice the gods sacrificed, these were the first rites : then these great ones sought out heaven, where are the holy gods that were before them.

## No. 31. Ṛgveda X. 119.

1 *Indra speaks*:— This, this is my thought, I will get me cow and horse : have I not drunk the soma ?

2 Like rushing winds the draughts I have drunk carry me along : have I not drunk the soma ?

3 The draughts carry me along as swift horses a chariot : have I not drunk the soma ?

4 Prayer is drawing nigh me, like a lowing cow approaching her dear child : have I not drunk the soma ?

5 I as a carpenter with a plank, turn the prayer round in my heart : have I not drunk the soma[1] ?

---

[1] A verse is omitted.

7 The two worlds reach not the half of me: have I not drunk the soma?

8 Over heaven in my might, over this mighty earth I stretch: have I not drunk the soma?

9 Ha! I will put earth down this way or that way: have I not drunk the soma?

10 -- — I will smite earth this way or that way; have I not drunk the soma?

11 One half of me is in the sky, the other I have drawn down here: have I not drunk the soma?

12 I am great of the great: I have risen to the navel of the world: have I not drunk the soma?

13 I have taken, and go away satisfied, to carry the offering to the gods: have I not drunk the soma?

## No. 32. Ṛgveda X. 121.

1 Hiraṇyagarbha[1] come in the beginning, born sole Lord of every creature: he bears up earth and sky-- to what god should we bring our oblation?

2 He is the giver of breath, the giver of strength; all creatures wait on his command, yea, even the gods: his shadow is immortality; and death is his-- to what god should we bring our oblation?

3 He is the mighty and only Lord of all this world of breath and sleep[2]: he rules over man and beast-- to what god should we bring our oblation?

4 His are those snowy hills: his they say, the ocean with the great river: his are the regions of the sky, his the two arms— to what god should we bring our oblation?

5 He established the great sky and the earth: he fixed fast the firmament of heaven, and measured out mid sky— to what god should we bring our oblation?[3]

---

[1] Goldseed. [2] Earth, as distinguished from heaven, whose inhabitants "slumber not nor sleep." [3] A verse is omitted.

7 When the great waters swept over the world, bringing the seed and begetting Fire, then he came, the one soul of the gods— to what god should we bring our oblation ?

8 He looked over the waters in his might, as they brought strength and begat the sacrifice : he alone is God of Gods — to what god should we bring our oblation ?

9 May he not injure us, who is the begetter of the earth, the true and faithful one who begat the sky, who begat the great and shining waters.

10 Lord of every creature, thou rulest over all, and there is none beside thee : give us, that call upon thee, the desires of our hearts : may we be lords of all good things.

## No. 33. Ṛgveda X. 125.

*The Word speaks :*

1 I walk with the Rudras and the Vasus, with the Ādityas too, and all the host of gods : I bear up the Two, Mitra and Varuṇa ; I sustain Indra and Agni, and the Two Aśvins.

2 I bear up the soma stream, I Tvaṣṭṛ, Pūṣan, Bhaga : I give wealth to him that brings an oblation, to the pious house-holder, to him that pours out the soma.

3 I am the Queen, the gatherer of riches, I was the first to know the holy ones : therefore, have the gods put me in many places, making me enter and dwell everywhere.

4 By me, whoever sees, or breathes, or hears what is said, eats food : they know it not ; but are under my control, listen one and all, this is a true thing I say.

5 Verily I myself speak, and say what shall be welcome to gods and men : whomsoever I love I make strong, I make him a Brahman, I make him a prophet and a wise man.

6 I bend the bow for Rudra that his arrow may smite down the man who hates God : I make strife among the people ; I pervade heaven and earth.

7 I set my Father over all the world; my seat is in the waters in the sea: thence I spread through all worlds, and touch with my head the sky.

8 I blow as the wind blows, taking hold of all worlds: past heaven, past earth: such is my might.

## No. 34. Ṛgveda X. 168.

1 O the greatness of the chariot of the Wind! it goes crashing with a sound of thunder: it touches the sky and reddens it, it moves along the earth, throwing up the dust.

2 They[1] rush along in the track of the Wind, they go after him as women to the market-place: with them the God moves along, King over all this world.

3 Moving along his paths in the sky he rests nowhere and never: friend of the waters, the first-born, the righteous one, say where was he born, whence did he come?

4 Breath of the gods, seed of the world, this God moves as he listeth: his sound is heard— but not his form; bring oblations to the divine Wind.

---

[1] The Waters.

# INDEX OF WORDS AND PASSAGES EXPLAINED IN THE NOTES

[ *The numbers refer to the pages in this edition.* ]


अंहस् 89.
अकर् 137.
अक्र 99.
अक्षिपत् 279.
अग्ने 53.
अग्ने 160.
अङ्गिरस् 259.
अङ्गिरस्तम 219.
अचित्ती 154.
अच्छा वो देवीम् &c., 144.
अज् 183.
अजर 93.
अतः 71.
अत्यक्तुः 95.
अत्येतवै, अकर्धन्वानि 172.
अत्रये 212.
अदृश्रन् 223.
अद्भुता 71.
अद्रुह् 55.
अद्रिवः 249.
अध न्वस्य संदृशम् &c., 243.
अनन्तमन्यद्रुशद् &c., 87.
अनमीवो भवा नः 206.
अनष्टवेदस् 182.
अनिमिषा 129.
अनिविशमान 202.
अनीक 82.
अन्तर्वरुणे 235.
अन्धस् 244.
अपधा 116.
अपेत वीत &c., 262.
अप्रति 229.
अप्राः 82.
अभिचक्षे 88.
अभिमाति 75.
अभिष्टि 136.
अभीशूँरिव 195.
अमन्तु 282.
अया 98.
अयास् 112.
अयुक्त 86.
अरं कृ 241.
अरावन् 215.
अरुणानि कृण्वन् 297.
अरुष 223.
अर्कमानृचुः 56.
अर्कैरबोधि 146.
अर्यः 241.
अर्वाश्वस्ते हरयः &c., 196.
अशिश्नत् 198.
अश्मन् 116, 244.
असत् 98.
असुतृप् 265.
अस्ति ज्यायान् &c., 240.
अस्थुर्जनानामुप &c., 228.
अस्य घोषः 297.
अस्य त्वेषा अजराः &c., 93.
अस्य मूर्धन् 296.
अहभिः 199.
अहोभिरद्भिः &c., 263.
आ 79, 96, 131.
आघृणि 175.
आदिशे 188.
आनट् (वि), महिमा हवं 197.
आनृचुः 56.
आपः 282.

आरा 176.
आवः ( अप, वि ) 218.
आशाते इति 67.
आस्ये हविर्जुहोत 251.
आहनस् 291.
इच्छन्तीः 77.
इतऊति 214.
इति 122.
इत्था 111.
इदानीमह्नः 152.
इन्दु 207.
इन्द्रज्येष्ठान् &c. 157.
इरा 168.
इय 182.
इष्टव्रत 137.
इष्टापूर्त 262.
इह स्थन 255.
ईम् 119.
ईशे 223.
उत घ स रथीतमः 186.
उदिता 89.
उपार 240.
उपावसु 191.
उरुक्रमस्य स हि बन्धुः 110.
उरुगाय 103.
उरुचक्षस् 77.
उर्वः 138.
उषसामिषण्यन्त्वृषा 147.
उषा याति 143.
ॐ 254.
ऊती 126.
ऊर्जं मदन्ति 204.
ऊर्णु ( वि ) 153.
ऋच् 56.
ऋञ्ज् 99.
ऋञ्ज् ( नि ) 97.
ऋतस्य शुभ्रे 146.
ऋष्व 70.
एतग्व 84.
एना 257.
एव 157.
ओमन् 213.
ओषधीः 168.
ओषम् 280.
कतमच्चनाहः 300.
कनिक्रदत् 166.
कम् 102.
करत 73.
करते 243.
करम्भात 188.
कर्तोः 85.
कर्त्वा 72.
कस्मै देवाय 284.
किकिर 177.
किमाग आस &c., 237.
कीरि 121.
कुचर 105,
कुप् 115.
कुवित् 98. 277.
कोश 180.
क्रतु 53.
क्रत्वा 92.
क्रन्दसी 123, 288.
क्व 246.
क्षत्र 57.
क्षत्रश्री 66.
क्षामि, अधि 78.
क्षिति, पञ्चक्षिति 221. 247.
क्षेमे उत योगे 209, 242.
खनित्रिम 202.
गमध्यै 112.
गयस्फान 207.
गव्य् 226.
गव्यूति. 76.

गहि 53.
गातु 257.
गातुमती 209.
गावो भूरिशृङ्गाः 112.
गिरिष्ठा 105.
गुहा 118.
गृहः 282.
गो, परुष 189.
गोओपशा 178.
गोपीथ 52.
घृतस्नु 161.
घोरम् 119.
चक्रे ( आ ) 78.
चक्र 180.
चक्र ( सूरः ) 190.
चत्वारिंशयां शरदि 125.
चन 228. 240.
चरणीयमान 141.
चि, ( वि ) पथः 175.
चिकितुषी प्रथमा यज्ञियानाम् 293.
चिकित्वाँ 72.
चित्रं ह यद्वां भोजनं 212.
चित्रामघा 223.
चिनुहि 175.
च्यवना कृतानि 117.
छन्द् 279.
छन्दस् 272.
जगतः 285.
जज्ञे 198.
जनयन्तो दैव्यानि व्रतानि 221.
जनश्री 187.
जनाः ( पञ्च ) 135.
जरयन्ती 223.
जर्भुरीति 169.
जसमान 216.
जात एव 114.
जातवेदस् 163.
जिहीळानस्य 64.
जीरदानु 166.
जीवसे 80, 265.
ज्ञा ( प्रति ) 205.
तं त्वा 161.
ततनन् 245.
तनु, तनू, 235 238.
तारिषत् 73.
तिरस् 60.
तिरो अर्यो &c., 210.
तुर इयाम् 237.
तूताजि 198.
तृत्सूनां पुरोहितिः 229.
तृप् 238.
त्य 52.
त्ये 220.
त्रयश्च त्रिंशाच्च ये स्थ 253.
त्रिकद्रुकेभिः &c. 266.
त्रिधातु 109.
त्री 107.
त्रेधा 103.
त्वेष 93.
दक्ष 154.
ददत्, यद् 201.
ददद्रुस्त्रियाणां प्रति &c. 224.
दधाता 164.
दर्शम् 78.
दशाङ्गुलम् 267.
दस्र 190, 289.
दा ( अनु ) 124.
दाधार 109, 129.
दामन् 153.
दान्मः 239.
दाशराज्ञ 232.
दाशुषे 67.

दास वर्ण 117.
दिदृक्षेण्य 236.
दिदेशति ( आ ) 188
दिविस्पृक् 297.
दुर्मित्रासः 199.
दुष्कृत् 167.
दृशये सूर्याय अस्मभ्यम् 264.
देवया 211.
देवव्यचस्तम 164.
देवासः 55.
दैव्य जन 154.
दैव्यानि 221.
दोधतः 277.
द्यविद्यवि 63.
द्यावापृथिवी 82, 92.
द्रापि 73.
द्रुह्वाणो जनानाम् 75.
द्वादश 69.
द्विता 200, 225.
धर्माणि 163.
धा ( ओमानं ) 213.
धीरा त्वस्य महिना जनूंषि 234.
धीवतोधीवतः 185.
धृतव्रत 67.
ध्रुति 239.
ध्रुवासु त्वासु क्षितिषु &c. 247.
ध्वज् 228.
न 65.
नंनमीति 169.
न ऋते 123.
नपात् 90.
न प्रमिये.... तद्यथा 155.
नमस्यन्तः 84.
नर 56.
नर्य 174.
नवग्व 260.
नव्यसीं धीतिम् 90.
नाकस्याधि रोचने 59.
नाभा 96.
नाव: 68.
निपाद् 171.
निर्णिज् 74.
निशृम्भ 187.
निस् 89.
नुद् ( प्र ) 234.
नृचक्षस् 264.
नृवत् 178.
नृम्ण रोदसी निनेथ 197.
नेशत् 181.
पथस्पते 174.
पदेभिः 101.
पप्रथत् 235.
पर-अवर 123.
परः 54.
परमे व्योमनि 91.
परस्तात् 183.
परेयिवस् 256.
पर्जन्य 165, 251.
पर्यभूषत् 114.
पर्वत 60.
पर्षद् 215.
पशुतृप् 238.
पस्त्या 70.
पस्त्यावत् 159.
पाथः 110.
पावक 160, 203.
पिपृता 89.
पुनान 201.
पुरंधि 139.
पुराणी...युवतिः 139.
पुरुष एवेदं &c., 268.
पुरुषता 225.

पू 199.
पूरुषत्वता 155.
पूषन् 173.
पूष्णा 179.
पृथिवीं व्यथमानाम् 115.
पृथुपर्शु 227.
प्र 53, 195.
प्रकुपिताँ 115.
प्रजावतः 69.
प्र णः 73.
प्रति 52.
प्रतीत्य 214.
प्रत्यञ्च् 140.
प्रदिशः 286.
प्रमिये 156.
प्रवत् 256.
प्राञ्चा 226.
प्राणतो निमिषतः....जगतः 285.
प्रेष्ठाम् 243.
बन्धु 110.
बोधि 219.
ब्रह्मचोदनी 177.
ब्रह्मन् 121, 283.
ब्रह्मा ण 196.
ब्रू Ātm. 228.
भात्वक्षस् 94.
भूमिम् अत्यरिच्यत पश्चात् 270.
भूरि 2?3.
भूर्णि 241.
मज्मना 92.
मध्या 85.
मनीषा 173.
मनोर्देवा यज्ञियासः 253.
मन्तुमः 190.
मरुद्भिः 53.
मर्त्यो 53.
मसि ( termn. ) 63.
मह् 53.
महाँ 132.
महावध 167.
महि 170.
महित्वा 285.
महिना 133, 296.
महिष्वत् 212.
मा ( वि ) 102, 115.
माकिः, माकीम् 181.
मातरिश्वन् 91.
मातलि, मातलिन् 258.
मातुर्दिधिषु 186.
मानुषेष्वा 76.
माया ( महो मित्रस्य &c., ) 146.
मितज्ञु 132.
मुमोचत् 247.
मृग 105.
मृगो न भीमः &c., 103.
मृळीकं सुमना &c., 236.
मृन्मय गृह 248.
मृष् 178.
म्रदा 175.
य आपिर्नित्यो &c., 246.
य उपजायते ( मास् ) 69.
यक्षिं 160.
यक्षिन् 247.
यत् 128.
यत्रा नरो देवयन्तो &c., 82.
यन्धि ( प्र ) 219.
यम् ( वि ) 158.
यशम् 76.
यस्मिन्नाजा भवति किंचन प्रियम् 227.
यस्य छायामृतं तस्य &c., 284.
यस्य त्री पूर्णा &c., 106.
या 143.

यात् 245.
यातयज्जन 132.
यामनि 80.
यासां राजाः...याति मध्ये 203.
याहि ( उप ) विद्वान् 196.
यु ( प्र ) 240.
युग 83.
युजान 221.
युयोतम् 213.
युवभ्याम् 212.
युवां नरा पश्यमानास आप्यम् 226.
युवां हवन्त उभयासः 230.
यो अस्कभायत् 102.
यो देवेषु... एकः 288.
यो विपश्यति यः प्राणिति 293.
योषा सूर्यस्य 223.
रक्षितारौ 264.
रजस् 55.
रद् 202.
रध्र 120.
रम 115.
रसा 286.
राज् 80.
रायः 182, 185.
रिख् 177.
रिशादस् 58.
लोक 274.
व: 99.
वक्षि 160.
वच् ( अधि ) 254.
वयुन 221.
वराय 97.
वरिमन् 131.
वर्मन् 156, 296.
वर्तीत 212.
वसु 91.
वसुभिः सह प्रियः 91.
वस्त 73.
वस्यइष्टि 65.
वस्वः 96.
वस्व उभयस्य 230.
वाह्नि 193, 223.
वां वास्तूनि 111.
वाज 138.
वाजिनीवती 223.
वात 148.
वाम् 184.
वायु 148.
वार् 139.
वास्तोष्पति 204.
विज इव 119.
विततं संजभार 85.
विदथ 100.
विपृच्छम् 237.
विमन्यु 65.
विमुचो नपात् 184.
वि यस्तस्तम्भ रोदसी चिदुर्वी 234.
विवास 166.
विश्वपिश् 223.
विश्वमिन्व 196.
विश्ववेदस् 96.
विश्वान्यद्भुता 71.
विश्वे देवाः 55.
विष्टा 298.
विसीमहि 64.
वी adj. 98.
वीतिहोत्र 162.
वीनाम् 68.
वीर्य 104.
वृक्तबर्हिस् 136.
वृध् (यांश्च देवा वावृधुर्ये च देवान् ) 258.
वृषन् 106, 147.

वृष्ण्यावत् 167.
वेदा 68.
वेनन्ता 67.
वैरूप 259.
वोचत् 77, 102.
व्रत 63, 221.
व्रते 182.
शक्तम् 217.
शग्म 100, 208.
शम् *adv.* 206.
शम् *v.* 126.
शम्बर 124.
शरु 295.
शशमान 126.
शिक्ष् 130, 232.
शिवेभिः 100.
शुचि 203.
शुष्म 114.
शूष 105.
श्रद्धा 119.
श्रवस् 134.
श्रवस्यु 221.
श्रुत 294.
श्रुधी 79.
श्वाघ्निन् 118.
षसाद (नि) 70.
संगमनं जनानाम् 257.
संगमनी वसूनाम् 292.
संदित 64.
सं प्रेरते अनु वातस्य &c., 298.
संभृता 194.
संयत् 251.
संवृक् 116.
संसद् 209.
सः 80.
सक्षीमहि 209.
सख्या 246.
सचा 194.
सचावहै यदवृकं 246.
स जनास इन्द्रः 114.
सतोमहान्तः 252
सत्य 156, 224.
सत्ति 163.
सधस्थ 87.
सनुयाम् 277.
सम 177.
समन 299.
समानं चित् रथमातस्थिवांसा 122
समानमर्थं चरणीयमाना 141.
समुद्रमीरयाव मध्यम् 244.
समुद्रार्थ 202.
समुद्रियः 68.
सयुक् 299.
सरथम् 299.
सर्तवे 125.
सर्वताति 191.
सलिल 201.
सवासः 159.
ससत् (अ) 95.
सात (अव) 200.
साध्य 271.
सानसि 133.
सिन्धवः 94.
सिन्धुन् (सप्त) 116.
सिम 87.
सीमहि (वि) 64.
सु or सू 151, 153.
सुक्षत्र 57.
सुदंसस् 144.
सुपथा 73.
सुप्राव्ये 292.
सुवर्चाः, सं गच्छस्व तन्वा 262.

सुवासि 153.
सुवृक्ति 145, 232.
सुशेव 132.
सूनृता ईरयन्ती 139.
सूर्यावसु 211.
सेति 119.
सेना 97.
सो अन्नमात्ति यो &c., 293.
सोम्य 260.
सोम्यम् 62.
सौमनस 260.
स्तर्यम् 217.
स्तवते ( प्र ) 104.
स्तोषाम 186.
स्थन 255.
स्नुमिः 245.
स्पश् *v.* ( अनुपस्पशान ) 257.
स्पश् *s.* 74.
स्यूमन् 142.
स्वः 228, 239.
स्वधया मदन्ति 107.
स्वधावः 237.
स्वपा महोभिः 245.
स्वर्जनन्ती 144.
स्वर्दृश् 161, 228.
स्वसर 143.
स्वसुर्जारः 186.
स्वावेश 205.
स्वाहा 258.
हन्तवै ( ब्रह्मद्विषे शरवे ) 295.
हव्यदाति 162.
हि ( termn. ) 96.
हित्वाय 262.
हूयसे 52.
होतेव क्षदसे प्रियम् 77.

Library IIAS, Shimla
00005300